वगतीति॥ ज्ञानावगत्योरेकार्थत्कथं तेन व्यकथ्येत्याशंक्याह तु फलभावेनेत्याह॥ ज्ञानेनेति ब्रह्मावगतेरपीच्छानिच्छा सिद्धानित्यदि १२
तुल्याभावात्रैतमिश्रत्याशंक्योक्तं ब्रह्मेति॥ पुमर्थत्वेत स्याहेतुत्वहा दन सचित्तं विशदयति निःश्रेयेति॥ समस्तसंसारबीजमुमादिर
विद्यांतस्यास्तामादित्वेनात्यप्रवृत्तानर्थस्य च तस्यैव संसारस्यो क्कावगत्या ध्वस्तेरितियावत्॥ स्वत्रार्थर व्याख्यामुपसंहरति त
स्मादिति॥ विशिष्टाधिकारित्वं तदर्थः ब्रह्मज्ञातुकामेन ब्रह्मविचारयितव्यमिदं शास्त्रमारब्धव्यमित्यर्थः॥ वंधमित्यात्वेन सिद्धेपि वि
षयादेर्वित्वंतरेण तद्यत्तिप्रसमाधातुं वर्णकांतरमवतारयति त्वा यावाक्षिपति दिति॥ योगेव जिज्ञासायास्तु ब्रह्मकुतश्चित्
ज्ञातमज्ञातं वेति विकल्पार्थः॥ आधेयस्त्वत्रयतिपाद्यतयास्य ब्रह्म विषयो॥ नन्वप्रत्यक्ष्य त्वाभावादज्ञानेनानवगमान्नामा वास्य

फलमपि तद्वगतिरिति विषयाद्यसिद्धिरित्याह यदीति॥ यन्न कदाचिदपि केनचिदाकारेण बुद्धावारोहति तस्याप्रतिपादत्वे॥ शक्य
प्रतिपाद्यतया न शास्त्रेणासंबंध अप्रतिपाद्यत्वेत दवगतिर्निष्फलमपीतिसंबंधाद्यसिद्धाद्वितीयं दूषयति अथेत्यादिना॥ ब्रह्मणः सा
मान्यतो ज्ञातस्य विशेषविनाविचारमज्ञाता द्विचारयोग्यते द्वितीयमपि समाधत्ते उच्यत इति॥ तत्र प्रसिद्धो स्ताब्रह्मणः शक्यप्रतिपाद्य
तयासंबंधाद्यपत्यस्तीति॥ प्रसिद्धत्वमस्ति त्वम प्रसिद्धमप्रसिद्धं वेत्यधिकारात् ब्रह्मणो निरूपाधिकं रूपमाह नित्येति॥ कार्यैक्यवाच्यतो
नित्यपदं तत्त्वापत्यं व्यावर्तयुं शुद्धेति॥ अरवणु जाच्छस्वा व्यावर्त्यव्यानर्तयति बुद्धेति॥ ताद्रूप्याद्ये कामासेना धृष्तचेतस्त्वं व्युदस्यति मुक्ते
ति॥ मोक्षावस्थायामेव नित्यत्वादीत्याशंक्याह॥ स्वभावमिति॥ भानाभानकृता मुक्तिबंधयोर्भेदबुद्धिरितिभावः॥ सोपाधिकं ब्रह्मरू
पमाह॥ सर्वज्ञमिति॥ न तु नसामान्ये नापि लोके ब्रह्मज्ञातं तस्याकरूपस्याध्यक्षाद्यगम्यत्वान्नापि श्रुत्यादीसत्वकुतब्रह्मशब्दस्याज्ञा
तसंगतित्वात् अतएव न पदमात्रादपि तद्धीरित्यत्राह॥ ब्रह्मेति॥ श्रुतिसंगत्योर्ब्रह्मशब्दोऽन्यथानुपपन्नो निगमाद्यनुग्रहो ते विशिष्टवाक्या
र्थाच्चाविपदार्थाकांक्षानुग्रहीतश्च नियतपदार्थधीहेतुस्तथा विशिष्टेपि ब्रह्मणि संभावनाहेतुरिति युक्तात्स्य प्रसिद्धत्वे त्यर्थः॥ बृह
ति धात्वालोचनायामपि तत्प्रसिद्धिरित्याह बृहतेरिति॥ संकोचकप्रकरणोपपत्तभावेव द्धिकर्मणोबृहति धात्वोर्निरंकुशमु
हत्वबोधित्वाद्वच्छेदत्रयशून्यत्वसिद्धेर्निरपदस्यतत्सरत्वाद्दोषभयपिष्ट्वाद्यभावेन शुद्धत्वाद् जडत्वेन बुद्धत्वाद्विद्यापरतंत्रत
या मुक्तत्वात् कुतश्चिदप्यव्यावृत्तज्ञानशक्तितया सर्वज्ञतादि सिद्धेश्चित्तिर्थ्यानुरोधे दर्वोक्तसिद्धिः॥ नित्यत्वादिशून्ये निरंकुशमह
त्वायोगात् तथा च पदशक्तेरेव प्रसिद्धं ब्रह्मेत्यर्थः॥ तत्पदार्थस्य नित्यत्वादिना प्रसिद्धिमुक्त्वा त्वंपदार्थात्मनापि प्रसिद्धिमाह॥ स
र्वस्येति॥ आत्मापि प्रत्यक्षाद्यगोचरत्वात् प्रसिद्धो नेत्याशंक्याह सर्वो हीति॥ प्रमाया प्रमाणासाधारणीप्रतीतिमप्रतीति निरासेन स्फा
रयति नेति॥ अहमस्मीति॥ न न प्रत्येति किंतु प्रत्येत्येवेति योजना॥ आत्मनः शून्यस्यैव प्रतीतेर्नास्ति त्वं प्रसिद्धिरिति शून्य
वादमाशंक्याहयदीति॥ आत्मनः शून्यस्य प्रतीतावहं नास्मीति प्रतीतिः स्यात्॥ सर्वश्च लोकोऽहमस्मीति प्रत्येति सतस्तदस्तित्व
धीरित्यर्थः॥ आत्मप्रसिद्धावपि कथं ब्रह्मप्रसिद्धिस्तत्राह॥ आत्मा चेति चेतन्याविशेषादयमात्मा ब्रह्मेत्यादिश्रुतेश्च ब्रह्मात्मनो
रेक्यमित्यर्थः॥ प्रसिद्धत्वोक्त्या संबंधादेसिद्धेस्तत्पक्षोक्तदोषं स्मारयती यदीति॥ व्यवहारभ्रमो विना विचारमात्मत्वेन ब्रह्म यदि

प्रसिद्धमस्तित्वं हि तल्लोकादेवेत्यवगतं ब्रह्मेत्यनन्यलभ्यत्वेन शास्त्राविषयत्वात्तदवगतेश्चाफलत्वात्पुनरपि चासमजिज्ञास्यमिति योजना
आनंद० धर्मिप्रतिविप्रतिपत्त्यादरुविदइतिन्यायेन परिहरति नेत्यादिना ॥ आत्मनोऽहमिति प्रसिद्धत्वेऽपि तद्विशेषे विप्रतिप । त्ते ॥ त
स्या ॥ वस्तुतो ब्रह्मविषयतया सामान्येन सिद्धमपि तद्विशेषतोऽसिद्धेस्तस्तद्विशेषे हेतोः शास्त्रस्य प्रवृत्तिविषयो भवति च तदवगति
१३ स्तत्फलं सामान्यतः सिद्धत्वाच्च विशेषतस्तच्छास्त्रं प्रतिपादयितुमिति संबंधसिद्धिरित्युक्ता ब्रह्मणो जिज्ञास्येति चावः विप्रतिपत्तीरे
व दर्शयन्नादौ स्थूलदर्शनमतमाह ॥ देहेति ॥ देहातिरिक्तं चैतन्यं स्वतंत्रमस्वतंत्रं वा नास्ति देहाकारपरिणतभूतचतुष्टये तत्र तमि
व तदिति मात्रग्रहणं मृतदेहव्यावृत्त्यर्थं चैतन्यविशिष्टमित्युक्तं ॥ आत्मेत्यत्रालंबनमुच्यते प्राकृताः शास्त्रासंस्कृतधियोऽदृष्ट
मात्राविकल्पितप्रवृत्तयो जनाः जन्ममरणमात्रधर्माणो लोकायतिकाः भूतचतुष्टयतत्त्ववादिनो देहस्य लिंगमिंद्रियस्थानपेक्षमधिकर
णं तत्र मनुष्योऽहमिति बुद्धेरुत्पत्तेरित्यर्थः ॥ सत्यपि देहे नेत्रादौ चासति त्वापादौ रूपाद्यज्ञानात्तेषामिंद्रियानुविधानात्तेष्वेव तस्य
दृष्टेस्तेषु चाहं बुद्धेस्तेषामेवात्मतेति पक्षान्तरमाह इंद्रियाणीति ॥ न च तेष्वनेकेषु भोग्ययोगो वरगोष्ठीवन्मिथो गुणप्रधानभावाक्र
मेण तद्योगात् न च नानात्वेऽपि प्रत्यभिज्ञानुपपत्तिरेकदेहाश्रयत्वेनोपपत्तेरित्याशयः ॥ स्वाप्ने नेत्राद्यभावेऽपि केवले मनसि ज्ञानदृष्टेः
रहंधियश्च तस्मिन्नेवैकत्वादिंद्रियानुविधानस्य च रूपादिधियां तद्धर्मत्वेऽपि तत्कारणत्वादुपपत्तेरेकदेहस्थत्वेन प्रत्यभिज्ञायामे
कत्वासादस्थानामपि तत्संगात्मन एवात्मेति मतान्तरमाह मन इति ॥ लोकायतमतमन्येऽनुक्तायोगाचारमतमाह ॥ विज्ञानेति ॥ आश्र
यं व्यावर्तयितुं मात्रपदं सिद्धान्ताद्विशेषार्थं क्षणिकमिति देहादेर्ज्ञेयत्वात् घटतुल्यत्वान्मनसोऽनन्तरबुद्ध्यनतिरेकादाश्रया
न्तरस्यादृष्टत्वात्क्षणिकत्वानेऽपि सादृश्यात्प्रत्यभिज्ञानाद्बंधमोक्षयोः संतानाश्रयत्वाद्युक्तं योगाचारमतेनमित्यर्थः ॥ माध्य
मिकमतमाह शून्यमिति ॥ स्वापे धियोऽप्यभावादेकस्मात्सुनरहमित्युत्पादस्तदालंबनाहंधीरित्यर्थः ॥ तार्किकादिमतमाहास्तीति
॥ शून्यातिरिक्तत्वमस्तित्वं ॥ अहमस्मीत्यनुभवात् तदालंबनस्यात्मत्वात् तस्य प्रत्यभिज्ञया स्थापितत्वात्तस्याश्च भ्रांतितयासाद
श्यानधीनत्वादविकारस्य क्रियाफलत्वायोगात्क्रियावेशात्मत्वात् कर्तृत्वस्येवमात्मकत्वाच्च संसारस्यात्मनो मुक्तेरेवं रूपते ॥ १३
त्यर्थः ॥ सांख्यमतमाह सोऽकर्तेति ॥ करोमि जानामीति धीयोऽहंकारानुरागात् केवलात्मायोगात् क्रियावेशात्मत्वात् कर्तृत्वस्येव भो

गस्यविद्वसानत्वात्तद्रूपात्मनो युक्तायोक्तरूपतेत्यर्थः ॥ तत्त्वमर्थेऽपि विवादद्वारा तदर्थे तत्र सूचयित्वा साक्षादेव तत्र विवादमा
हास्तीति ॥ देहाद्यतिरिक्ताद्भोक्तुरन्यतिरिक्तत्वं तद्व्यतिरिक्तत्वं तत्समर्थनार्थं सर्वज्ञ इत्यादिविशेषणं ॥ स्वपक्षमाहात्मेति ॥
स हीश्वरो भोक्तुः स्वरूपं वहत्यर्थं न्वियेन स्वतोऽनवच्छिन्नत्वस्योक्तत्वाच्चैतन्ये भेदयोगादेस्य श्रुतेश्चेश्वरस्या तद्रूप्यादितिभावः
विप्रतिपत्तीरुपसंहरत्येवमिति ॥ मानयुक्ती विना विवादमात्रान्न सर्वपक्षेषु तेषां शंक्याह युक्तीति अंत्यपक्षवादिनो युक्तिः
वाक्याभासाः अन्ये तदाभासाश्रया इत्युत्तराधिकरणेषु व्यक्तीभविष्यति तथापि यस्य यस्मिन्पक्षे प्रद्धा सतं माश्रित्य स्वार्थं
साधयिष्यतीति किं विचारेणेति तत्राह तत्रेति ॥ विवादः सप्तम्यर्थः ॥ मिथो विरुद्धधीषु कस्याश्चित्तत्त्वधीत्वात्तस्या विचारसा
ध्यत्वात्तद्धीनस्तत्त्वधीविधुर्यान्न पुमर्थभागित्यर्थः ॥ किंचाविचारे तत्त्वज्ञानान्नास्तिकत्वेऽपि केचात्महनो जना इति श्रुतेः श्रुत्यर्थ
बहिर्मुखो नर्थं गच्छतीत्याह ॥ अनर्थं चेति ॥ सूत्रतात्पर्यमुपसंहरति तस्मादिति ॥ विषयादिसत्त्वं तदर्थः ॥ ब्रह्मजिज्ञासोपन्यासमु
खेन विशिष्टमीमांसा प्रस्तूयत इति संबंधः ॥ विशिष्टज्ञानेच्छाव्याजेन विचारारंभपरं सूत्रं ॥ न हीष्टज्ञानं वासना त्यागकर्त्वमित
थाच्चेष्टप्रमाणज्ञानोपायविचारकार्यतार्थं सूत्रमित्यर्थः ॥ किमुपसंकरणमिति ॥ तत्राह तदविरोधीति ॥ तेषां वेदांतानामवि
रोधिनस्तर्काः ॥ मीमांसायां न्यायैर्वेदप्रामाण्यमुक्त्वा द्युपयोगिनो यस्य उपकरणं सा तथा ॥ धर्ममीमांसा यास्तर्कत्वेऽपि तर्कान्तराणा
मुपकरणत्वेति भावः ॥ किं प्रयोजनासेत्यत आह ॥ निःश्रेयसेति ॥ ब्रह्मज्ञानद्वारेति वक्तव्यं ॥ प्रथमसूत्रेण शास्त्रारंभमुपपाद्य त
दारंभमाणो जन्मादिसूत्रस्य पातनिकामाह ॥ ब्रह्मेति ॥ जिज्ञासापदस्यावयवार्थत्यागेनांतर्नीतविचारार्थत्वमुपेत्य ब्रह्मज्ञानानु
कामेनेदं शास्त्रं श्रोतव्यमित्युक्तमित्यर्थः ॥ ब्रह्मणो जिज्ञास्यत्वोक्त्यार्थिकमायादिविचाराणां प्रतिज्ञातत्वेऽपि ब्रह्मप्रमाणं ब्रह्म
युक्तिरित्यादिविशिष्टविचाराणां विशेषणविषयपेक्षत्वात् पदो ब्रह्मस्वरूपं वाच्यमित्याह ॥ किंलक्षणमिति ॥ श्रोतस्य ब्रह्म
णः श्रोतलक्षणद्वयावेदकं सूत्रं सूत्रकारं पजयच्चवतारयस्यत इति ॥ यत्नोवाङ्मानीत्यादिवाक्यं ब्रह्म लक्षयति जन्मय
ति ॥ वेत्येकस्योजयहेतुत्वासंभवसंजयाभ्यां संदेहे श्रुतेरनुमानानुगुण्यदेकस्योजयहेतुताया दृष्टान्ताभावेनाशंक्यानुमान

आनंद० त्वादेकत्तरहेतुत्वस्य लक्षणत्वे वस्तुस्तु परिच्छेद्य द्वयस्याब्रह्मत्वान्न लक्ष्यतीति प्राप्ते पुरुषमतिप्राप्तवत्वेनानुमानस्य संभावित
दोषस्यापौरुषेयत्वेनापास्तदोषागमानुग्राहकत्वतर्कत्वादतीन्द्रियेर्थे स्वतोप्रामाण्यादागमिकोन्वयहेतुत्वे सुखादिदृष्टांतेन संभा
१४ वनामात्रहेतुत्वाद्वस्तुतोपरिच्छेद्यलक्ष्यस्य ब्रह्मत्वसिद्धेर्जगज्जन्मादिनिमित्तोपादानं सर्वज्ञं सदानंदं ब्रह्मेति लक्ष्यतीति सिद्धान्त
माह जन्मेत्यादिना ॥ अधिकरणे वाक्योक्ता व्यापकत्वसंगतिरुक्ता ॥ अधीतिविधुपादादिलोपनिषद्वाक्यस्य स्पष्टब्रह्मलिं
गस्य लक्षणद्वयपरत्वेन ब्रह्मणि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसंगतयः ॥ पूर्वाधिकरणस्थ ब्रह्मलक्षणपरीक्षणात्तल्ल
क्षणमेव पूर्वोत्तरयोस्तत्र फलं पदच्छेदः पदार्थोक्तिः । पदविग्रह इति त्रयं व्याख्येयं दर्शयति जन्मेति जन्म स्थिति भंगं यस्मा त्पतेत
द्गुणसंविज्ञानस्तत्र तद्भावबहुव्रीह्यर्थे स्यपदार्थो गत्वेतेन तद्गुणत्वेन संविज्ञानं यत्र समासे स तथा ॥ सर्वस्य विशेषणत्वेस
मासायोगात्तदर्थैकदेशस्तथा । तेन विशेष्यैकदेशं विशेषणं कृत्वा समास इत्यर्थः ॥ तत्र फलमाह जन्मस्थितीति जन्मादि
रस्य छित्त्वादेरित्यतद्गुणसंविज्ञाने स्थितिभंगमात्रं जन्मादिशब्दार्थः स्यात्तत्तच्च जन्यकारणत्वाज्जगतो नोपलक्षण
त्वसिद्धेन्न च स्थितिलयमात्रहेतुत्वं तथा । जन्माहेतोरन्यत्वे लक्ष्यस्यपरिच्छेदाद्ब्रह्मत्वादतो जन्मानो पि विशेष्यांतर्भावा
द्धर्मजातस्यैस्य संहरत्ति प्रधानस्य हेतुब्रह्मत्वेत्युपलक्षणसिद्धिरित्यर्थः ॥ तादृग्धर्मजातं ग्रहीत्वा नपुंसकप्रयोगः ॥ नन्वनादौ
संसारे कथमादित्वं जन्मनो गृह्यते तत्राह ॥ जन्मन श्चेति ॥ एतत्सूत्रलक्षित श्रुतो जन्माद्युच्यते तदपेक्षया सूत्रेपि तस्यादि
त्वमित्यर्थः ॥ श्रुतावपि कथमयुक्तमित्याशंक्याह वस्त्विति ॥ वस्तुनोवृत्तं जनिस्थितिवालीयत इति च जावः ॥ जन्मना लब्धा
त्मकस्य स्थित्यादियोगात् ॥ अतो नानादेः संसारस्यादिर्जन्म किंतु प्रति वस्तु तस्यादित्वमिति तदपेक्षं श्रुतिसूत्रयोस्तदा १४
दित्वमित्यर्थः ॥ श्रुतिनिर्देशं विशदयति श्रुतीति ॥ अनुक्रलेजन्मादिलक्ष्येति शेषः ॥ तत्र हेतुसत इति ॥ वस्तुवृत्तं
विजन्जते वस्तितिः ॥ जन्मादित्वस्यानुगुणमिति विवक्षित्वाहेतुमाह जन्मनेति ॥ इदमस्संनि ॥ हितत्वादिचित्वात्प्र
त्यक्षमान्यपरामर्शित्वमाशंक्यपतीतिमात्रं संनिधिरितिग्रहीत्वाधातिपदिश्चर्थमाह अस्येति । सर्वस्य जगतो

का

न जन्मास्तित्वियदादेरनादित्वादित्याशंक्याविय दधिकरणन्यायेन विनत्तमर्थमाह षष्ठीति ॥ जगतो जन्मादेर्वा ब्रह्मणा
संबंधात् लक्षणत्वात्याशंक्याह यत इति ॥ न जगज्जन्मादिवाब्रह्मलक्षणं किंतु तत्कारणत्वं तज्ज्ञाते ब्रह्मणि संभावित
मित्यर्थः ॥ सूत्रपदान्येवं व्याख्याय पूर्वसूत्रब्रह्मपदानुषंगेण लब्धवाक्यार्थमाह अस्येत्यादिना ॥ प्र
धानादिहेतुत्वनिरासेन ब्रह्महेतुत्वं संभावयितुं कार्यप्रपंचं श्रुतिसिद्धं देशपेन विशिनष्टि नामेति तृतीयेद्धं नावेद्यादौ
स्वनामरूपगर्भविकल्प वीक्यात्क्रियादृष्टे र्जगतो पितथात्वानुमानादचेतनभावकर्तृकत्वमयुक्तं । विमतं चेतनभावकर्तृ
कं नामरूपात्मकत्वात् घटादिवदित्यर्थः ॥ तर्हि चेतना भावाश्च जीवत्वे दाः ॥ नामरूपे बुद्धावालिख्य जगत्कृत्न्यिष्यन्ति किं ब्रह्म
णेत्याशंक्याहानेकेति ॥ न चान्यतरस्यार्थिकत्वादुक्तत्वग्रहानर्थक रूप्यिगादिनां कर्तृत्वेप्यनेकत्वात् पित्रादिनां च श्राद्धादौ ।
नेकत्वेप्यकर्तृत्वात् ॥ तथा च जीवानामपि सर्वज्ञकोटि निवेशाज्जगत्कर्तृत्वायोग्यतेत्यर्थः ॥ सेवादिफलवद्व्यवहितफलत्वात्
कर्म्मफलस्येश्वरत्वदात्रकत्वानुमानात्तदात्मकं जगदीश्वरकर्तृकमित्याह ॥ प्रतिनियतेति ॥ प्रतिनियता निदेशकालनिमि
त्तानि येषां क्रियाफलानां तदाश्रयो जगत्तास्य निविग्रहः ॥ प्रतिनियतो देशः स्वर्गफलस्य मेरुपृष्ठं संग्रामादेर्भूमंडलं का लो
पि स्वर्गस्य प्रतिनियतो देहपाता दूर्ध्वं पुत्रफलस्य बाल्यादुर्द्धं निमित्तमपि प्रतिनियतं दंडल राज्यामरणादि स्वर्गादे
र्भाादेस्तु राजप्रसादादि ॥ न चेदमीदृशं जगदसर्वज्ञो निर्मातुमर्हतीत्यर्थः ॥ विचित्रकार्यत्वाच्च जगतो विशिष्टबुद्धि
मत्कर्तृकत्वं घटादिवदनुमेयमित्याह मनसेति एतेन कर्तुः सर्वज्ञशक्तित्वं संभावितं ॥ कल्पितकारणत्वेन सजा
तीयप्रधानादेर्विजातीयाच्च कार्याद्ब्रह्म व्यवच्छेदकतया जगद्धेतुत्वे तटस्थलक्षणोक्तिते ब्रह्मणः स्वरूपलक्षणं
विवक्षितं विशिनष्टि सर्वज्ञादिति ॥ आदिद्वितीयत्वं सत्यचिदात्मत्वं स्वतंत्रतया निरतिशयसुखत्वं च विशेषणा
र्थादि दर्शितं ॥ नन्वन्येपि परिणामाद्यो विकारा जन्मादित्वादिग्रहणेन किं न गृह्यन्ते तत्राह ॥ अन्येषामिति ॥ अ
जातस्यास्थितस्यानष्टस्य च परिणामाद्ययोगात्तेषां तदधीनत्वात्तद्ग्रहणेनैव ग्रहात् जन्मस्थितिनाशानामेवत्रोपा

दानमित्यर्थः ॥ ननु निरुक्तकारस्य जायतेऽस्ति विपरिणमते विवर्धतेऽपक्षीयते विनश्यतीति सत्त्वं मूलीकृत्य जन्मादिशब्देन
आनंद० षण्णामपि विकाराणां ग्रहे हेतोर्न त्वर्थो वा किं क्लेशः सूत्रत्राहयास्केति ॥ जन्मादिसूत्रस्य नैरुक्तोक्तिमूलतया नेन तदुक्तविकार
ग्रहे तद्वाक्यस्य पौरुषेयत्वान्मूलमानापेक्षत्वादागमस्य तन्मूलत्वे सूत्रस्यैव तत्त्वसिद्धौ नैरुक्तोक्तिमूलतानर्थक्यादयद्यत्
२५ तदुक्तिमूलं वाच्यं ॥ तत्र महाभूतसर्गादूर्ध्वं संभावितं भौतिकविचारगोचरं तत्तो यथोक्ताधस्ताधीनो नैरुक्तोक्तिमूलत्वे
सूत्रस्य जन्मादिषट्कं जगतो यतस्तद्ब्रह्मेत्युक्ते तत्पंचकस्य भौतिकविकारहेतुत्वात्तदेव ब्रह्मेति लक्षितं न भूतपंचकस्य ज
न्मादयो मूलकारणाद्भवन्ति ॥ योगस्थैर्यान्नेतद्ब्रह्ममूलभूतं नैरुक्तसूत्रस्य तद्गोचरत्वात्तस्मान्मूलकारणं ब्रह्म न लक्षितं
मित्याशंक्या निरसितुं ब्रह्मणः सकाशादुत्पत्तिर्या जगतः श्रुता यो च तस्मिन्नेव तस्य स्थितिलयौ स्मृतौ तज्जन्मादिशब्देन गृह्यंते न त
द्विषयेयत इत्यादिवाक्ये बुद्धिस्थे जगज्जन्मादिकारणं ब्रह्म लक्षितं भवतीत्यर्थः ॥ न चैवमपि जन्मैव सूत्र्यतां तन्नांतरीयकतया
स्थितिभंगसंभवतीति युक्तं जन्ममात्रस्य निमित्तादपि संभवात् त्रिभिरस्योपादानतासूचनाद्ग्रन्थस्थितिलययोगश्चचज
गदाधारत्वादेवोपादानत्वे जन्मस्थितिवचनानर्थक्यं प्रकृतिविकारानन्दैनोस्तिसिद्धये त्रयाणामादेयत्वात् अन्यथा ब्रह्मणो जग
दुपादानत्वेपि तदुत्पत्तिस्थित्योरन्योधिष्ठाता कुंभोद्भवे कुंभकारवद्राज्यस्थेम्नि राजवच्चेत्याशंकेत तन्माशंकीतिइति त्रयाणां
ग्रहणमिति भावः ॥ युक्तिं विना लक्षणस्यातिव्याप्त्यसमाधेरर्थादनेन सापि सूत्रितेति तामुपन्यस्यति नेत्यादिना मरूपाभ्यामि
त्यादिनोक्तविशेषणचतुष्टयविशिष्टस्येत्याह यथोक्तेति ॥ सर्वज्ञं सर्वशक्तिसमन्वितमित्युक्तं स्मारयति यथोक्तविशेषणा
मिति ॥ उक्तस्य — — गतो नोक्तमीश्वरं मुक्त्वान्यस्मादुत्पत्त्यादिसंभावयितुं शक्यमिति संबंधः ॥ ननु सर्वे विकाराः सुखदुःखमोह २५
सामान्यप्रकृतिकास्तदन्वितस्वभावत्वाद्यदन्वितस्वभावास्ते तत्प्रकृतिका यथा मृदन्वितस्वभावाः शरावादयो मृत्प्रकृति
का इत्यनुमानात्प्रधानाज्जगज्जन्मादि स्यादित्याशंक्याह ॥ न प्रधानादिति तच्च चेतनं जगदनभिज्ञं न तस्य स्योपत्त्या विकर्तुं
मीष्टेश्चं तर्बहिर्भावेन सुखादीनां घटादीनां चाध्यक्षेण नेदयाद्दे कार्थज्ञाने चैकस्यैव कर्तुः सुखाद्यात्मत्वेन युगपत्तद्ग्रहापातान्नैव

त्वसिद्धेर्न प्रधानकारणतासूचनानुपपत्त्यधिकरणे चैतत्स्फुटं ध्वनयिष्यतीति भावः ॥ सर्वेति ॥ कार्यद्रव्यस्य परिमाणादणुतरपरिमा
णसंयोगसचिवसमानजातीयानेकद्रव्यारब्धं कार्यद्रव्यत्वात् पटवदित्यनुमानादणुभ्यो जगज्जन्मादि संभावितमित्याशंक्याह
नाणुभ्य इति ॥ दीर्घविस्तीर्णदुकूलारब्धरज्जुद्रव्यस्य स्वप्रकृत्यपि कार्यद्रव्यत्वेनानैकान्त्यात् ॥ वैशेषिकाधिकरणे चाणुकारणता
निराकरणान्न तेभ्यो जगज्जन्मादीत्यर्थः ॥ शून्यवादिनस्तु सर्वं कार्यमभावपूर्वकं योग्यत्वे सत्यदृष्टपूर्वावस्थत्वात्तत्परकीयात्मवदि
ति व्यतिरेकेण शून्यस्य जगद्धेतुतामाहुस्तान्प्रत्याह नाभावादिति ॥ घटस्य पूर्वावस्था मृदध्यक्षेति हेत्वसिद्धेः न शून्यस्य जग
द्धेतुतेत्यर्थः ॥ केचित्तु हिरण्यगर्भं संसारिणमेवागमाज्जगद्धेतुमाचक्षते तान्प्रत्युक्तं न संसारिण इति ॥ आगमस्य वेदविरो
धेनामाणयोगान्नासौ जगद्धेतुरित्यर्थः ॥ स्वभाववादिनस्तु नचेति ॥ उत्पत्त्यादिर्जगतः संभावयितुं न शक्यमिति संबंधः
स्वभावादुत्पद्यत इति स्वयमेव स्वस्य निमित्तमिति वा निमित्तानपेक्षमिति वा विवक्षितं नाद्यः स्वाश्रयत्वात् । न द्वितीयः भावाभाव
योरनिमित्तत्वे यौगपद्यापातात् ॥ स्वतः सिद्धसामर्थ्यानां चार्थानामन्योपकार्योपकारकत्वस्याध्यक्षत्वादित्यर्थः ॥ उक्तलक्षण
व्यतिरेक्यनुमानादेवोक्तयुक्तिसहितात् ब्रह्मणोऽस्तित्वादिसिद्धेः शास्त्रयोनित्वाद्यधिकरणं वैयर्थ्यमित्याशंक्याह एतदेवेति
युक्तिमदुक्तं लक्षणमेव स्वतंत्रमनुमानं सद्विशिष्टेश्वरनिश्चायकमिति यद्वैशेषिकादिमतं तदयुक्तं ॥ लक्षणं हि युक्तिमद
पि सिद्धस्य ब्रह्मणः सजातीयादिभ्यो व्यावर्तकं तु तदीयं दृशमिति तत्स्वरूपनिश्चायकं कार्यलिंगकानुमानं च कारणसत्तामात्रे
पर्यवस्यत् तदेकत्वादौ तटस्थं न च तदेकत्वसिद्धौ तदीयं सर्वज्ञत्वादि सिद्ध्यतु शरीरसंसोयं जगद्धेतौ नानात्वैकत्वस्य विसंशयो लाघ
वादुत्कटैककोटितां नीतो मूलकारणे विशिष्टे ब्रह्मणि संभावनेत्युच्यते ॥ संभाविते तस्मिन् प्रमाणावकाशादुत्तराधिक
रणार्थवत्तेति भावः ॥ अथेदं सूत्रमुक्तब्रह्मनिश्चायकं न वा न चेदप्रामाण्यात्तदुक्तलक्षणेपि विश्वासो न स्यात् ॥ आद्ये व्यतिरे
किणो लक्षणस्य सूत्रोक्तकार्यलिंगकानुमानवन्निश्चायकतेति चोदयति नन्विति ॥ तदेवेत्येवकारेणागमो वा तत्तदनुगुणयु
क्तिर्वा न सूत्रितेत्युच्यते ॥ प्रकृतानुमानं तदर्थः ॥ नावेदविन्मनुते तं बृहन्तमित्यादिश्रुतेर्वेदादिकं ब्रह्मेत्युक्तयुक्त्यनुगृहीत
लक्षणाख्यव्यतिरेक्यात्मकागमोक्तिपरं सूत्रमिति परिहरति नेत्यादिना ॥ कार्यानुमानस्य यत इत्यादिश्रुत्युक्तत्वेपि नानुमा

नात्मना निश्चायकत्वं तेन संभावनामात्राभिधानादागमात्मनात्तु निश्चायकत्वमिति भावः॥ उत्तरसूत्रे ध्वनितुल्यागमस्याधस्तनमिति व
क्तुं सूत्राणामित्युक्तं॥ सूत्रेषु कुसुमग्रथनवन्न वाक्यग्रथनं मुख्यमित्याशंक्याह वेदान्तेति॥ तेषामपौरुषेयत्वेन निर्दोषाणां स्वत
आनं० एव स्वस्वार्थनिर्णायकत्वाद्विचारानर्थक्यमित्याशंक्याह वाक्यार्थेति॥ वाक्यस्य तदर्थस्य च तात्पर्यनिश्चयार्थं संभावनार्थं च विचा
१६ रणा तस्याश्चावसानं तदुभयनिश्चयः॥ तेन निर्वृत्तो ब्रह्मसाक्षात्कारस्तस्माद्विचारोऽर्थवानित्यर्थः॥ विचारावधारितशक्तितात्पर्य
स्यां प्रमापकं शब्दं हित्वा शक्तिमात्रेणाप्रमापकं प्रमाणान्तरं ब्रह्मणि लाघवाद्देयमित्याशंक्याह धूनेति॥ ब्रह्मणस्तदगोचरत्वा
दित्यर्थः॥ तर्हि शब्दादेव ब्रह्मसिद्धेर्मननविधिर्युक्तिसूत्रं च कथमित्याशंक्याह॥ सत्त्विति॥ विमतं स्वभिन्नोपादानाधिष्ठातृ
कं कार्यत्वात्सुखादिवत्॥ विमतं चेतनप्रकृतिकं कार्यत्वात्तद्वदित्याहानुमानमपीति॥ तेषु सत्सु तदपि प्रमाणं स्वतन्त्रं निवा
र्यत इति संबंधः॥ विचारसंस्कृतवेदान्तानां स्वार्थबोधित्वसिद्धौ किं तेनेत्याशंक्याह तदर्थेति॥ तेषामर्थो जगतोऽभिन्ननि
मित्तोपादानत्वं तस्य ग्रहणं स्वीकारस्तस्य दार्ढ्यं तदुपयोगि संभावनात्मा निश्चयः तदर्थमनुमानमित्यर्थः॥ विमतं भिन्नोपाद
नाधिष्ठानं तर्ककार्यत्वात् घटवदित्यनुमानबाधेति चेन्नेत्याह वेदान्तेति॥ जगतश्चेतनोपादानता निमित्तत्वादिवेदविरो
धात्तन्निते तु मानमन्यत्तद्विरोधात्तदर्थसंभावनाहेतुरित्यर्थः॥ अगम्ये तु नेतर्कगम्यो वैदिकत्वात्परिशुद्धवस्तुवदित्याशंक्या
ह श्रुत्वेति॥ तर्कस्यापि स्वतन्त्रनिश्चयाय श्रुत्यैवेष्टत्वात्साध्यविकलतेत्यर्थः॥ कासौ श्रुतिरित्युक्ते श्रवणातिरेकेण मननं युक्त
नुसंधानं विदधती श्रुतिमाह श्रोतव्य इति॥ न केवलं श्रोतस्तर्कोऽत्रोपयुज्यते किं तु प्रतिबंधनिवर्तकत्वेन लौकिकोऽपीत्य
त्र श्रुतिमाह पण्डित इति॥ उक्तार्थधीसामर्थ्यं पाण्डित्यं अनुक्तेऽपि प्रयोजकशक्तिर्मेधावित्वं यथा कश्चिद्गांधार
देशेभ्यः समानीय चौरैररण्ये बद्धचक्षुर्नीतिर्निर्देशिकोपदेशतः॥ तदुक्तं स्वसाकल्येन ज्ञाता पण्डितः स्वयमूहापोहक्षमो १६
मेधावी गंधारानेव प्राप्नोति॥ एवं ब्रह्मणः सकाशाच्छिद्यविवेकदर्शननिरुद्धाविद्यादिभिः संसारारण्ये निःक्षिप्तो जन्तु
रतिकारुणिकगुरूपदेशतः स्वस्वभावं प्रतिपद्यत इत्यर्थः॥ श्रुतितात्पर्यमाह पुरुष इति॥ आत्मनः श्रुतेरित्यर्थः॥ ननु
धर्मीवद्विशेषाद्ब्रह्मापि श्रुत्याद्येवापेक्षते तत्कथं तत्र श्रुतिस्तर्कसहकारी करोतीत्यत्राह नेत्यादिना॥ दृष्टान्ते जिज्ञासो

धर्मो दार्ष्टान्तिके तादृग्ब्रह्मग्राह्यं॥ श्रुत्यादय इत्यादिशब्देन लिंगवाक्यप्रकरणस्थानसमाख्या गृह्यन्ते॥ तत्र पदान्तरनिरपेक्षः
शब्दः श्रुतिः॥ श्रुतस्यार्थान्तरेण विनाभावो लिंगं॥ अन्योन्याकांक्षासन्निधियोग्यतावन्ति पदानि वाक्यं॥ वाक्यद्वयसामर्थ्यमार
भ्याधीतविषयं प्रकरणं॥ क्रमवर्त्तिनां पदार्थानां क्रमवर्त्तिभिरर्थैर्यथाक्रमं संबंधः स्थानं॥ संज्ञासामान्यं समाख्या॥ गुणोपसं
हारेऽर्चेषामुदाहरणादि निवक्ष्यते॥ किं तर्हि जिज्ञास्ये ब्रह्मणि प्रमाणान्तरमिति प्रश्नपूर्वकमाह॥ किं त्विति॥ अनुभवो ब्रह्म
साक्षात्कारो विद्वदनुभवः आदिपदमनुमानादिसंग्रहार्थं श्रुत्यादीनामनुमानादीनां च यथासंभवं शक्तितात्पर्यावधृतिद्वारा अ
नुभवमुत्पाद्य ब्रह्मणि प्रामाण्यमनुभवस्य साक्षादेवेत्युक्तं द्विधा ध्वस्तत्वेनेति मत्वोक्तं यथासंभवमिति॥ वेदार्थत्वात्कर्मवद्
ब्रह्मण्यपि नानुभवः संभवतीत्याशंक्याह योग्यत्वमुपाधिरित्याहानुभवेति॥ न हि ज्ञाते विब्रह्मण्यनुभवं विना नैराकांक्ष्य
मतस्तज्ज्ञानस्यानुभवान्तत्वात्तस्मिन्नसावस्तीत्यर्थः॥ साधनव्याप्तिमाशंक्याह भूतेति॥ चकारश्शंकानिरासी न तु कर्म्मवाक्या
नामनुभवानपेक्षफलवत्त्वं अर्थज्ञानजनकत्वात् ब्रह्मवाक्यानामपि वेदप्रमाणत्वात् तादृग्धीजनकत्वं नेत्याह कर्त्तव्ये हीति॥ धर्म
स्यानुभवायोग्यत्वात्तदनुष्ठानस्य च शाब्दधीमात्रादेव सिद्धेर्धर्म्मवाक्यानां युक्तमुक्तधीजनकत्वं ब्रह्मणि त्वनुभवयो
ग्यत्वादाकांक्षानिवृत्तिरित्यर्थः॥ धर्म्मस्यापि ब्रह्मवदनुभवयोग्यत्वं वेदार्थत्वादित्याशंक्य कार्यत्वमुपाधिरित्याह पुरुषेति॥ चका
रोऽचापिशंकानिरासी॥ कर्त्तव्येऽपि तुल्यमसाध्यत्वमित्याशंक्य लौकिके वैदिके च कर्म्मणि साध्यत्वमाह कर्त्तुमिति॥ तत्र
लौकिकमुदाहरति॥ यथेति॥ तेन सहवैदिकं दृष्टान्तमाह समुच्चिनोति तथेति॥ कर्त्तुमकर्त्तुमित्यस्य दृष्टान्तमुक्त्वा कर्त्तुमन्य
थावा कर्त्तुमित्यस्य दृष्टान्तमाह उदित इति॥ इतोऽपि कर्म्मणो नानुभवयोग्यतेत्याह॥ तेनैव सहवैदिकं दृष्टान्तं समुच्चिनोति विधीति प्र
जेत्यादयो विधयो न हन्यादित्यादयो निषेधाश्च कर्म्मणि सावकाशाः तेन साध्यत्वादनुभवायोग्यतेत्यर्थः॥ तत्रैव हेत्व
न्तरमाह विकल्पेति॥ उदितानुदितहोमार्थे व्यवस्थितो विकल्पोऽयं ह्याग्रहणार्थ स्वेच्छिको न हिंस्याद्भूतानीत्युत्सर्गोऽग्नीषो
मीयं पशुमालभेतेत्यपवादः॥ ते च कर्म्मणि सावकाशाः तथा चाव्यवस्थितं कर्म्मानुभवयोग्यमित्यर्थः॥ ब्रह्मण्यपि तुल्य
त्वाद्व्यवस्थितत्वस्योक्तोपाध्यसिद्धिरित्याशंक्याह॥ न त्विति॥ प्रकारविकल्पवत्प्रकारिविकल्पं निरस्यति अ

॥स्तीति॥ वस्तुन्यपि विकल्पा आदृश्यन्ते वादिनामित्याशंक्याह विकल्पनास्त्विति॥ सम्यक्ज्ञानाधीनत्वाद्वस्तुनस्तस्य च पुरुषाधी
आनं द० नत्वाद्वस्त्वपि तथेत्याशंक्याह न वस्त्विति॥ कथं तर्हि तद्बुद्धिरित्याशंक्याह किं तर्हीति॥ पुरुषतंत्रत्वं निषेधे कूमेव कारणमा
नाधीनत्वं निषिध्यते विकल्पनानाम नःस्पंदितमात्रत्वेनासम्यग्धीत्वात्सम्यग्धियश्च वस्त्वधीनत्वे तत्र दृष्टान्तमाह॥ न
१७ हीति॥ आधेयाशंक्ये वधारणे पुरोवर्तिनि स्थाणावेकस्मिन्नेव स्थाणुरेवेत्यदुष्टकरणस्य धीरितरस्य तत्रैव पुरुषो वा
स्थाणुर्वेति संशयः॥ न हि तद्द्वयमपि सम्यग्ज्ञानमेकस्योभयत्वायोगादित्यर्थः॥ कथं तर्हि विज्ञानधीस्तत्राह तत्रेति
स्थाणुः सत्यमित्यर्थः॥ उक्तन्यायं संचारयत्येवमिति॥ दार्ष्टान्तिकमाह तत्रेति विकल्पनानां बुद्धिजन्यत्वेनावस्त्वनुसारिणीना
मसम्यग्धीत्वे सम्यग्धीयश्च वस्त्वनुसारित्वे पूर्वोक्तन्यायेन स्थिते सतीति यावत् न पुरुषतंत्रमित्येव कारार्थः॥ ततो
न धीधर्मा वस्तुनोपि तदधीनत्वे तिशेषः॥ ब्रह्मज्ञानस्य वस्त्वधीनत्वेन सम्यग्धीत्वे हेतुमाह भूतेति॥ परमार्थवस्तु
विषयत्वादित्यर्थः॥ ब्रह्मणः सिद्धत्वेनासाध्यतया धर्माद्वैधर्म्यमनुमानयोग्यत्वात्तत्रानुमानापेक्षायुक्तानुप्रवेशा
श्रोतुरुक्तं॥ इदानीं ब्रह्मणि प्रमाणान्तरप्रवेशेऽनुमानादिसूत्रमनुमानोपन्यासार्थं इत्यनुमितमिति शंकते नन्विति॥ सिद्ध
त्वाद्ब्रह्मणो धर्मवैलक्षण्ये मानान्तरगम्यत्वे त्वनुमानादि विचारं हित्वा वाक्यमात्रविचारो युक्तो ब्रह्मण्युक्तप्रवेशा
विशेषात्॥ अतस्सूत्रकाराणां वेदान्तवाक्यग्रथनार्थत्वमसिद्धमित्यर्थः॥ ब्रह्मणि सम्भावनाहेतुश्रुत्यनुगुणानु
मानादिप्रवेशात्॥ गुणनयात्तद्विचारस्यापीष्टत्वात्प्राधान्येन वेदान्तवाक्यग्रथनार्थ सूत्राणामिति समाधत्तेने
त्यादिना॥ मानान्तरमपि करणमेव ब्रह्मप्रमितावित्ति पक्षे प्रसक्तमनुमानादियाथातदिति विकल्प्य दूषयति
इंद्रियेति॥ ब्रह्मणि करणत्वेन मानान्तराप्रवेशादिति शेषः॥ पराचीत्यादिश्रुत्या प्रत्यक्षाविषयत्वं ब्रह्मणो विवृणो १७
ति॥ स्वभावत इति॥ संबंधाग्रहणादित्युक्तं व्यनक्ति सतीति॥ ननु सर्वं ब्रह्मसंबद्धमिदं कार्यमिति धिया किंस्या
त् कार्यमेव गृह्यमाणं ब्रह्मसाधयिष्यतीत्याशंक्याह कार्येति॥ तस्मात्कार्यहेतुमात्रं सिध्यति न सत्यज्ञानादिरूपं ब्रह्मत

त्वागमादेव धयमित्यर्थः॥ श्रौतार्थसामान्यद्वारा संभावनाहेतुर्मानान्तरमिति युक्ता सूत्राणां वेदान्तवाक्यग्रथनार्थतेत्युपसंहरति
तस्मादिति॥ ब्रह्मसूत्रस्य वेदान्तानां एतदधिकरणविषयत्वमुक्त्वा पृच्छति किं पुनरिति॥ जिज्ञास्यलक्षितं ब्रह्मेति सत्यमर्थः॥ वि
शिष्टाधिकारिणो ब्रह्मज्ञातुकामस्य जगत्कारणत्वोपलक्षणानुवादेन ब्रह्मप्रतिपादकं वाक्यं सोपक्रममाह जन्मादीति॥ न
नु प्रकृष्टप्रकाशश्चन्द्र इति स्वलक्षणवत्तेत्र शाखार्थं सचन्द्रस्तु प्रलक्षणमात्रा चन्द्रस्वरूपा दृष्टेरूपलक्षितस्य स्वरूपल
क्षणवाक्यं तत्राह तस्येति॥ ब्रह्मणो जगद्धेतुत्वानुवादेन स्वरूपनिर्णायकमानंदत्वविधिस्य वाक्यं ततः सत्यादिवाक्याच्च स्वप्र
काशानंदत्वोपयानं स्वलक्षणं ब्रह्मेति निर्णेतुं शक्यमित्यर्थः॥ तैत्तिरीयश्रुताविव श्रुत्यन्तरेपि ब्रह्मणो लक्षणोक्तादीनि वाक्यानि यः
सर्वज्ञः सर्ववित् विज्ञानमानंदमित्यादीनि संतीति॥ तान्यपीहोदाहरणत्वेन द्रष्टव्यानीत्याहान्यान्यपीति॥ एवं जातीयकत्वमेवा
हनित्येति॥ तद्देवं सर्वासु शाखासु लक्षणद्वयवादिवेदान्तवाक्यानि जिज्ञास्ये ब्रह्मणि समन्वितानीति तद्धियामुक्तिरयत्वम
न्येत्यर्थः॥ सूत्रान्तरमवतारयन्पूर्वसूत्रसंगतिमाह जगदिति॥ सर्वकारणं ब्रह्मलक्षणं सूत्रयता प्रधानादावतिव्याप्ति
निरासाय तत्त्वलक्षं सर्वज्ञत्वमर्थादुक्तं तदेवात्र साध्यते तथा चार्थिकप्रतिज्ञयास्य संगतिरित्यर्थः॥ वेदान्तानां नित्यत्वा
त्तत्कर्तृत्वे विश्वयोकर्तृत्वानित्यायोगान्न तेनास्य सर्वज्ञत्वेत्याशंक्य श्रौतप्रतिज्ञयैव संगतिमाह॥ तद्देवेति॥ वेदानां नित्यत्वे
पि ब्रह्मणस्तत्कर्तृत्वं संभवोत्तस्मात्तदेव जगद्धेतुत्वं तस्या वृत्तिमत्र दृढी क्रियते॥ ते न हेतुसाधनदारात दीयसाध्यसाधना
द्युक्तास्य श्रौतप्रतिज्ञया संगतिरिति भावोऽस्य महत इति॥ दिवाकं ब्रह्मणो वेदकर्तृत्वेन सार्वज्ञ्यं न साधयत्युत साधयती
ति॥ वेदस्य सापेक्षत्वप्रसंगाप्रसंगाभ्यां सदेवेत्याशिन्यादि दिवदर्थदृष्टा कर्तृत्वे वेदस्यापौरुषेयत्वेन सापेक्षत्वापातान्न सा
धयतीति प्राप्ते सिद्धान्तमाह शास्त्रेति॥ न केवलं जगद्योनित्वादस्य सार्वज्ञ्यं किंतु शास्त्रयोनित्वादपीति योजना॥ अत्र च वेदकर्तृ
त्वोक्तेरेतदुक्तं मानमेयांगीकारेण॥ शास्त्रप्रवर्तकस्यत्वादिस्पष्टब्रह्मलिंगवाक्यस्य सर्वज्ञे ब्रह्मणि समन्वयोक्तेश्च श्रु
त्यादिसंगतयः॥ फलं तु पूर्वपक्षे ब्रह्मणः सर्वज्ञत्वासिद्धिः॥ उत्तरत्र तन्निर्धारणमिति द्रष्टव्यं॥ शास्त्रयोनित्वस्य स
र्वज्ञताहेतुत्वं वक्तुं शास्त्रं विशिनष्टि महत इत्यादिना॥ चातुर्वर्ण्यचातुराश्रम्यादिमर्यादाविषयत्वान्महत्त्वादि शास्त्र

नकेवलं महाविषयत्वेनास्य महत्त्वं किं त्वनेकांगोपांगोपकरणत्वयापीत्याह अनेकेति। पुराणन्यायमीमांसा धर्मशास्त्रा
आनं० णिशिक्षाकरणानिषडंगानि चतुर्दश विद्यास्थानानि तैरुपकृतस्येति यावत् तेन शिष्टसंग्रहात् प्रामाण्यमाशंका
पि शास्त्रस्यार्थोदयास्तापुराणादिप्रणेतारो महर्षयस्तथा तथावेदान्व्याचक्षाणास्तदर्थं चाद्रेरितानुतिष्ठन्तो वेदानादृत
१८ वंतस्तत्कथं तदप्रामाण्यमिति भावः बोधितत्वस्य बोधितयोरभावादपि वेदानां प्रामाण्यमित्याह। प्रदीपवदिति। उक्तमु
पजीव्य सर्वज्ञत्वोपयुक्तं विशेषणान्तरमाह सर्वज्ञेति। तस्य दृश्यशास्त्रस्येति यावत् सादृश्यं च सर्वज्ञज्ञानस्य स विषयो
त्ववद्गुणेरपि शास्त्रीयायास्तथात्वं कल्पयत्यो चेतनत्वादुक्तविशेषणस्य वेदस्य नि अन्वसितमत्वाविनष्टत्व
हेतुपकृतया ब्रह्मकार्यत्वेत्याहयोनिरिति। व्यतिरेकमुखेनोक्तव्याप्तीकुर्वाणः सर्वज्ञत्वं प्रतिजानीते नहीति। महत्वा
दिविशेषणवत्त्वं ईदृशत्वं तस्य सर्वज्ञादन्यतोसंभवे हेतुं सूचयतीति सर्वज्ञेति। तस्य गुणः सर्वार्थज्ञानवत्वं तेनान्वित
मिदं शास्त्रं सर्वार्थत्वात्तत्त्वस्योत्पत्तिः सर्वज्ञाद्वेत्यर्थः। उक्तमनुमानीकर्तुं व्याप्तिमाहयदिति। महाविषयत्वादेर
स्य ब्रह्मज्ञानेनतुल्यार्थत्वभ्रांतिनिवृत्त्यर्थं विस्तरार्थमित्युक्तं यद्यद्यस्य पसतत्तोपीत्युत्तरेण संबंधः। शास्त्रप्र
णेतुराप्तत्वात्पुरुषविशेषपदेयोग्यवाक्यप्रमाणप्रणेतासतद्विषयादधिकार्थज्ञानवानिति व्याप्तिभूमिमाह
यथेति। ब्रह्मणः शास्त्रकर्तृत्वेपि पाणिन्यादिवत्सर्वज्ञत्वं शंकित्वोक्तं ज्ञेयेति। तस्यज्ञेयैकदेशविषयत्वं तत्के
तुरसार्वज्ञहेतुरित्यर्थः। अपिस्तस्तथात्वसंभावनार्थः। नयस्मात्पाणिन्यादेः संभवतिसतस्मादधिकार्थज्ञानवानि
त्रः शब्दस्यतानाम्नार्थत्वाद्यथेरंतथान्यद्व्याहिन्यादेः संभवतिसतस्मादभियुक्तादुत्पद्यते सतस्मादधिकज्ञान
वानित्यर्थः। उक्तेर्ज्ञानात्म्नार्थत्वमित्युक्तीरादिमाधुर्यस्यावांतरविषमपि तद्दरम्यातुसुशिक्षितोपि नशास्त्रतीति
न्यायसिद्धमित्याहेति प्रसिद्धमिति। व्याप्तिमुक्त्वा विवक्षितमनुमानमाह किंन्विति। शास्त्रस्यो क्तविशेषणाव १८
तोयस्मान्महतो भूताद्योनेः संभवः तस्य सर्वज्ञत्वाधनतिशय्यमिति किमु वक्तव्यमिति संबंधः। ब्रह्मवेदार्थादधि
कार्यज्ञानवत्तत्कर्तृत्वात्। योयद्वाक्यप्रमाणकर्तासतदर्थादधिकार्थज्ञानवान्। यथा पाणिनिः यद्वावेदः स्वा

र्थादधिकार्थज्ञानवत्कर्तृकोवाक्यप्रमाणत्वात् पाणिन्यादिवाक्यवदित्यर्थः। शास्त्रहेतोर्ब्रह्मणः सर्वज्ञतापक्षधर्मता
बलादिति वक्तुं शास्त्रस्य ग्रंथतो महत्वमाह अनेकेति महाविषयत्वेनोक्तं महत्वं व्यनक्ति देवेति। आदिशब्देन वर्णाश्रमधर्मा
गृह्यन्ते। प्रदीपवत्सर्वार्थद्योतिनः इत्युक्तं प्रकृतोपयोगित्वेनार्थतोनुवदति सर्वेति। यथोक्तं शास्त्रं ब्रह्मणो जायतेञ्चे
त्। तस्यापौरुषेयत्वेनानपेक्षत्वप्रामाण्यहानिरित्याशंकाह पयत्नेनेति पौरुषेयत्वं पुरुषनिर्वर्त्यमात्रवान्तरं ना।
नुपूर्वीरचनं वामानांतरदृष्टयर्थोक्ति। रचनंवानाधस्त–वापियद्वावादिषुतुल्यत्वात्। द्वितीये न्कतनत्वक्रमान्यत्वमा
त्रं वाविसदृशक्रमत्वं वानाद्यः त्वयापि प्रतिपुरुषमुपाधिभेदाद्युपहितक्रमान्यत्वमात्रस्येष्टत्वात्। न द्वितीयः मया
पिक्रमवैसादृश्यास्यानिष्टत्वात्। न तृतीयः। अनंगीकारात्। अतोनपौरुषेयतयासापेक्षतेतिभावः। अयत्ने
न ब्रह्मणो वेदोत्पत्तौ मानमाहस्येति। ब्रह्मणो नतिशयं महत्वं तात्विकं च सर्वज्ञतासाधकं तन्न हिरंतेतदनुपजंभा
दितिमत्वा महतो भूतस्येति पुनरुक्तं। यथादीपादिर्भासनशक्तेः स्वहेतुवन्हि शक्त्यनुमापकत्वं तथावेदगतं सर्वा
र्थभासनशक्तेरपि स्वाश्रयोपादानस्य सर्वार्थभासनशक्त्यनुमापकत्वेतिसमुदायार्थः। शास्त्रं शास्त्रकर्तृत्वेसं
सत्यसर्वज्ञत्वानधिकरणकर्तृकं कार्यत्वात्। घटवदित्यनुमानाद्वेदस्य सर्वज्ञकर्तृकत्वे त्युक्तं। इदानीं जगद्धेतुत्वे
न लक्षितेब्रह्मणिमानविशेषचिंतायैवर्णकान्तरमवतारयत्यथवेति। तत्वोपनिषद्भ्यामित्यादिब्रह्मणः शास्त्रे
कगम्यत्वमर्थ्यपेत्वेवेति। कार्यलिंगस्य हेतुर्वि। शेषावसानानवसानाभ्यां संशये। विमतं सकर्तृकं कार्यत्वात् घट
वदिति। सिद्धे कर्तरितदेकत्वनानात्वसंदेहेलाघवात्तदेकस्य च स्त्वैव सर्वं करोतीति सर्वज्ञः सर्वशक्तिश्चे
त्यनुमानमेव विचार्यमिति प्राप्ते ब्रूयात् यथोक्तमिति। नित्यसिद्धस्य ब्रह्मणः शास्त्रंकारणमित्युक्तमि
त्याशंक्याह प्रमाणमिति। अनुमानादपि लाघवानुगृहीता ब्रह्मस्वरूपधीसंभवान्न तत्र शास्त्रमेव मानमित्या
शंक्याह शास्त्रादिति। न तावदब्रह्म दृष्टं ब्रह्मवन्हिवद्विशेषतोनुमेयं कार्यमात्रस्य कर्तृमात्रगमकत्वान्न च

लाघवात्तदेकधीर्विचित्रप्रासादे नेककर्तृकत्वस्यापि दृष्टत्वेन निर्णयात्। तथाच कर्तुर्नसर्वज्ञत्वाद्यनुमानलभ्यं
आनंद० शास्त्रं तु यतः इत्येकवचनात्कर्त्रैकसिद्धौ सर्वज्ञत्वादिसिद्धेः॥ शास्त्रैकगम्यत्वं सूत्रे लक्षितं जायः। किं तद्ब्रह्मणि प्रमाणं शा
१९ स्त्रं तदाह शास्त्रेति॥ पूर्वसूत्रेत्र शास्त्रस्योक्तत्वात् शास्त्रयोनित्वं पृथङ्न वाच्यमिति शंकते किमर्थमिति॥ एतत्सू
त्रार्थवत्त्वं प्रतिज्ञानीते उच्यत इति॥ तत्र शास्त्रस्योक्तत्वे पि सूत्रे तद्वाचकाभावाज्जन्मादिलिंगकं स्वतंत्रमनुमानमु
क्तमिति शंकां निरसितुमिदं सूत्रमिति॥ तदर्थवत्तां समर्थयते तत्रेति। न च तर्हिदं पूर्वशेषत्वपातः दंतर्गभान्न पृथक्कर्
णीयं। तच्छेषत्वेपि स्वतंत्रत्वे शास्त्रैककर्तृहेतुसमर्थनन्यायभेदादधिकरणांतरत्वसिद्धेरिति॥ वेदान्ता यथोक्ते ब्रह्म
णि प्रमाणं नवेति सिद्धार्थज्ञानात्फलाभावाभावाभ्यां सिद्धमर्थरूपादिहीनं बोधयतो वाक्यस्य सापेक्षत्वान्नपेक्षत्वाभ्यां
वा संशये पूर्वाधिकरणाद्वितीयवर्णकेनाक्षेपलक्षणां संगतिं विवक्षन्नुत्तरसूत्रमावर्त्य पक्षमाह कथमिति॥ संदेवेत्या
दितत्तदाम्नायाधीतसर्वोपनिषत्स्फुटब्रह्मलिंगानां ब्रह्मणि समन्वयसाधनात्तच्छ्रुत्यादिसंगतत्वं। फलं तु पूर्वपक्षे
षपरिशुद्धब्रह्मबुद्ध्यभावात्तदर्थिनामुपनिषत्स्वप्रवृत्तिः सिद्धांते शुद्धब्रह्मबुद्धिरुदेशो मुमुक्षूणामुपनिषत्सुप्र
त्वाधिक्यमिति विवेक्तव्यं॥ कथमित्याक्षेपहेतुर्यावत इति॥ वायुर्वैक्षेपिष्ठा देवतेत्यादेर्यार्थवादस्य विधुद्देशेनार्थवादत्वो
र्पिणात् विधिरुद्देशेनैकवाक्यतया धर्मे प्रमाणं नवेति संशये पूर्वपक्षयत्याम्नायस्येति॥ सर्वस्यैवेदस्य विधिनि
षेधार्थवादमंत्रनामधेयात्मकस्य कार्यतच्छेषार्थताधीर्वा यानि वाक्यानि कार्यं तावच्छेषं वानाच क्षीरन्॥ किं तु शु
द्धसिद्धमर्थमभिदधीरन् अतदर्थानां तेषामानर्थक्यं फलवद्भिन्नैः ध्येयैव धुर्यं अतो नित्यमनियतं सापेक्षमेवोच्यते
वेदस्य प्रामाण्यमित्युक्तत्वाद्यथाश्रुतगृहीतानामर्थवादानां सतमसतं वाद्भुतमर्थवदतां तदुक्तेवनेरक्षकां स्यात्का १९
र्यध्याहाराद्यसिद्धेः। सएवैनं भूतिं गमयतीति विशिष्टार्थवेदनेनैवावसानात्प्रयमनाश्रितमालभेतेत्युत्पन्नेनैकवा
क्यत्वाभावान्मुख्यार्थसंभवे प्राशस्त्यलक्षणयोगादाख्यायिकादीनामपि लोकेशब्दानां दर्शनात्तेषां फलवदर्थवा

द्यनियमादध्ययनविधेरक्षरावाप्त्यर्थत्वाद्धि विधुद्देशस्यापि विशिष्टार्थविधिनाचरितार्थत्वात्॥ निषेधोपेक्षाभावादर्थ
वादानर्थक्यात्तत्तुल्यमंत्रादेरपि तथात्वाद्वेदानां धर्मप्रमापकत्वादि ॰ तदुक्तं त्वौ चोदनानामधप्रमाण्यादप्रमाणं सर्वे वेद
इति दृष्टान्ते। विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति सूत्रेण सिद्धांतमाह क्रियेति॥ वायव्यं श्वेतमालभेत
भूतिकाम इत्येवमंते। न विधुद्देशेन स्तुत्वा वायुर्वैक्षेपिष्ठेत्याद्यर्थवादानां क्षिप्रदेवतासाध्यं कर्मक्षिप्रमेव फलं दास्यती
ति प्राशस्त्यार्थेनैकवाक्यत्वात्॥ तत्रप्रकृतविध्यपेक्षितमर्थवदंतोर्थवादयोर्थवत्तः स्युरितु केरध्ययनविधेरर्थवत्वा
दक्षरावाप्तेरफलत्वात्फलवदर्थावसायितया वेदमात्रस्य वाच्यत्वादर्थवादानां च भूतार्थावेदनेफलानवसायाद्रख्या
यिकात्मकलौकिकशब्दानामफलत्वस्यानिष्टत्वाद्विध्याकांक्षितप्राशस्त्यलक्षणयात्तदेकवाक्यत्वाद्विधेरेवप्रवृत्तौ प्राध
न्यापितदनुग्राहकतया स्तुत्यपेक्षणात्तदेकवाक्यानामर्थवादानां तथैव प्रामाण्यम्। मंत्रादेरपि स्वाध्यायविधिनाफ
लवत्वसिद्धेर्विशिष्टार्थबोधिप्रधानवाक्यार्थे प्रामाण्यात् द्युक्तचोदनानामपि तद्वाद्युक्ते सर्वस्यैवाम्नायस्य क्रियातद्धे
षविषयत्वेन प्रामाण्यं तदेवं पूर्वोत्तरपक्षप्रापंशास्त्रमारभ्य कार्यपरत्वं प्रमाणलक्षणोक्तमित्यर्थः॥ तथापि वेदा
न्तेषु किं जातमित्याशंक्य यावतेत्स्यापेक्षितमाहात इति॥ अर्थमात्रदृष्टेरानर्थक्यं फलवद्विधेयराहित्यं॥ अक्रि
यार्थत्वात्कार्यतच्छेषवाचित्वाभावादित्यर्थः॥ अध्ययनविधेरानर्थक्यमयुक्तमित्याशंक्याह। कर्त्रेति॥ फलसंग्रह
र्थमादिपदं उक्तं हि॥ कर्त्रर्थ कर्तृप्रतिपादनेनोपनिषदां नैकांत्यमिति॥ कर्म्मप्रकरणात्तीर्णोपनिषदां कुतस्तद्वि
धिशेषतेत्याशंक्याहोपासनादीति॥ आदिशब्देन श्रवणस्योग्रहस्ते॥ ननु वेदान्तानां न क्रियाविधिविधिशेषत्वं उप
क्रमोपसंहारैकरूप्यादिलिंगैर्ब्रह्मणि तात्पर्यसिद्धेस्तत्राह नहीति॥ मानान्तरयोग्ये ब्रह्मणि वेदांतानां तात्प
र्ये तत्त्वं वादेनुवादितया तद्विसंवादेच स्यात् न धीविरोधिशेषत्वं उपक्रमोपसंहारैकरूप्यादिलिंगैर्ब्रह्म
णि तात्पर्यसिद्धेस्तत्राह चित्रनिम्नोन्नतत्वाद्युपधीयतविरोधित्वादेवतेषां मतबोधीत्वादित्यर्थः॥ यदि निषि
द्धेर्थे वेदान्ता प्रामाण्या हे लंतरमाह तदिति॥ न हि भूतार्थप्रतिपादने कश्चिद्यानमनुपादानं वातयोः प्रवृत्ति नि

।छ।स्याप्यत्तत्वात् तयोश्च विधिनिषेधा।धीनत्वात्तयोरपि कार्यविषययोः सिद्धेऽर्थेऽसंभवाद्तस्तद्वादस्या फलत्वात् फल
आनं० लाधीनतात्पर्याभावान्न वेदान्तानां तेमानं न चक्रियानपेक्षं भूतवस्तुफलं तद्धेतुर्वा सुखदुःखाप्तिहानिःतद्धेतुत्वाद्दृष्टेरि
त्यर्थः। यानोतरसिद्धासिद्धार्थबोधित्वायोगमत्त्वेनाधस्य चाफलत्वान्न चेदान्तानां तत्र प्रामाण्यं कथं तर्हि तेषामर्थवत्त्वमित्याशं
२० क्यार्थवादाधिकरणसिद्धान्तं स्मारयति अत एवेति। वेदान्तानां मंत्रवदर्थवत्त्वसंभवात् किं सिसर्थवादवद्विधिवै
नापदेकवाक्यतेत्याशंक्य मंत्रवदेव तर्हि विधिभिर्वाक्यैकवाक्यता तेषामित्याह मंत्राणां चेति। अर्थवादाधिकारं समाप्य
मंत्रेषु चिंता व्यवहारिता प्रमाणलक्षणे इषे त्वा ऊर्जे त्वेत्यत्र छिनद्मीत्यध्याहारेण शाखाच्छेदप्रतीतेरग्निर्मूर्धेत्यादौ च तद्धेतुरे
वलादिदृष्टे दृष्टे चैवमादयो मंत्राः श्रुत्यादिना क्रतौ विनियुक्ता विषयः। ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतोरुपकु
र्वन्ति आहो दृष्टेनैवार्थप्रकाशनेनेति संशये मंत्राणां दृष्टार्थत्वे स्वाध्यायकाल सिद्धे तदर्थस्य चिंतादिना स्मृतिसंभ
वात्तावन्मात्रार्थवत्त्वे तेषां नित्यवदाम्नानानर्थक्यं मंत्रैरेवार्थप्रत्यायननियमाद्दृष्टकल्पने तदुच्चारणादेव पुरुष
व्यापारगोचरात्तन्नियोगविषयात् तत्कल्पनस्य युक्तत्वादुच्चारणमात्रेणादृष्टं कुर्वन्तो मीरक्रतावुपकुर्वन्तीति पूर्वप
क्ष माहत दर्शशास्त्र्यादिति इषे त्वेति छिनत्तीत्यध्याहारात्किंयोक्तिसमर्थो मंत्रस्तत्रैव तं मंत्रं विनियुंक्ते इति शाखामाच्छिनत्ती
ति शास्त्रविनियोगस्तु क्रतुप्रकारे तदर्थशास्त्रानर्थक्यात्तस्मादुच्चारणमात्रेणैव क्रतावुपकारिता स्येत्यर्थः। मंत्रैरेव
देवतादिस्मर्तव्यमिति नियमस्य दृष्टार्थाभावाददृष्टार्थकल्पनेऽपि मंत्रोच्चारणस्य तदर्थस्मारकत्वेन दृष्टार्थत्वाद्दृ
ष्टार्थस्मृतेश्च प्रयोगार्थत्वात् प्रयोगाच्च फलोदयात् दृष्टेसत्यदृष्टकल्पनायोगात् तदर्थशास्त्रस्य च परिसंख्यार्थत्वा
त् दृष्टेनैवार्थप्रकाशनेन मंत्राणां क्रतूपकारितेति सिद्धान्तमाह अविशिष्टस्तु वाक्यार्थ इति लोकवेदयोः शब्दानाम
र्थाविशेषाल्लोके फलवदुच्चारणदृष्टेर्वेदेऽपि मंत्रोच्चारणस्य तथात्वादप्रकाशितस्य तैरत्नरङ्गे यागासिद्धेस्तदर्थप २०
त्रादिप्रकाशनेन कर्म्मण्युपकारो मंत्राणामित्यर्थः। तद्वदेव वेदान्तानामपि मंत्रवत्कर्म्मतद्धेतुवादित्वेन विधिभि
र्वाक्यैकवाक्यतया कर्म्मसमवायित्वं सिद्धवस्तुसमन्वयाधिकरणं प्रवृत्तमिति भाष्यार्थः। कर्म्माङ्गादिमंत्राणां वि

धिभिर्वाक्यैकवाक्यत्वे विप्रकरणान्तरस्थवेदान्तानां स्यार्थनिष्ठत्वेनैव प्रामाण्यमित्याशंक्याह नेति। विधिनिषेधार्थवादमंत्र
नामधेयाधिकारान् संग्रहीतुं क्वचित् पित्यक्तं। अदृष्टाद्युक्तिवशात् दृष्टं शक्येत्याशंक्य नहि परिनिष्ठितेत्यादिनोक्तमित्याह
उपपन्नावेति। एषा प्रपिष्टभागाइत्यत्र यागं विना भूतद्रव्यदेवताकृत्यायागविधिकल्पनावद्वेदान्तानामपि स्वार्थे विधि
परिकल्प्यार्थवत्त्वसंभवे किं कर्मविधिशेषत्वेनेत्याशंक्याह नचेति। गर्दभ्या जुहोतीत्यादावेव सिद्धेऽप्यर्थे विधिः। स्वा
दित्याशंक्याह क्रियेति। तत्र भावार्थस्याप्यतोऽलब्धत्वात्तदनुवादेन विधेः संक्रान्तत्वादिना भावार्थे शुद्धस्य सिद्धस्य वि
ध्यविषयतेति भावः। वार्तिककारमतमुपसंहरति तस्मादिति। तत्रारुचिं सूचयित्वा मतान्तरं निगमयति सर्वे त्यादिना। मतद्व
येऽपि संमतमर्थमुपसंहरति तस्मान्नेति। पूर्वपक्षमनूद्य सिद्धान्तसूत्रमवतारयति इति चा सरति। तत्र पूर्वपक्षप्रति
ज्ञेयं प्रतिज्ञां व्याचष्टे तु शब्द इति। तस्य लोपात्तां सिद्धान्तप्रतिज्ञां विभजते तद्ब्रह्मेति। पूर्वसूत्रयोरुक्तमेव भूतं ब्रह्म
स्मारयितुं विशेषणानि। ननु वेदान्तवाक्यानां लौकिकवाक्यवत्सास्त्यादेव संसृष्टार्थत्वादखण्डैकरसे ब्रह्मणि क
र्थं पर्यवसानमित्यत आह कथमिति। अपर्यायानेकशब्दानामखण्डार्थत्वस्य प्रकृष्टप्रकाशादिवाक्ये दृष्टत्वादस्यापि
ब्रह्मस्वरूपमात्राबोधनप्रवृत्तस्य तद्धेतुता युक्तेति हेतुमाद्दतेः समन्वयादिति। हेतुं विवृणोति सर्वेष्विति। वेदा
न्तानामैकार्थ्ये किं ब्रह्मपरत्वावकुं वकुनिवाकाशमुपाहरति सदेवेत्यादिना। सदित्यस्तितामात्रमेवेत्यवधारणे किं
तदवधियतेत्याह एकमेवेति। यदिदं व्याकृतं जगत्तदग्रे प्रागुत्पत्तेरव्याकृतरूपत्यागेन सदेवासीदिति सोम्य
इयदर्शनेतिपितापुत्रसंबोधनं तेस्फूलं दृष्टिव्यादिदं बुद्धिधोधं प्रागुत्पत्तेर्मा भूदन्यत्तु महदादि सत्त्वमासीदेवे
तिनेत्याह एकमिति। कार्यसतोऽन्यन्नासदिवेत्यर्थः। तथा मृदो घटाकारपरिणामयितृकुलालवज्जगन्निमित्तं सतोऽन्य
दासीदित्याशंक्याह द्वितीयमिति। सतोऽपि चिन्त्यं विनाशप्रधानवत्त्वं हेतुत्वेत्याशंक्यमुपसंहरत्याहात्मेति। आत्मेत्या
त्मामूलकारणत्वेश्वभेन प्रागवस्थास्मर्यते ऐदमित्याद्युक्तार्थस्य निर्विशेषत्वार्थं श्रुत्यन्तरपततीति। तथ्छ

द्वैतेनं रोमाया जिरि तिप्रस्तुतात्मोक्ति विधिं यंब्रह्मापेक्ष्यानर्पुंसकं ॥ तदेतदेव यद्ब्रह्म किं जन्तु पान्त त्याहादवमिति नास्य पूर्वं कारणा मित्यपूर्वं अकार्यमित्यर्थः ॥ नास्यापरं कार्यं वास्तवमस्ती त्यनपरं अकारणमित्यर्थः ॥ नास्यांतरं जात्यंतरमंतरालेस्ती नंतरमेकरसमित्यर्थः ॥ तथाधिधबन्यदपि तदरूपमस्तीति नेत्याह बाह्यमिति वाह्यमनात्मभूतं नास्तीत्य द्वितीय मित्यर्थः ॥ तस्यापरोक्षत्वमाह। अयमिति। तत्रिधार्थं चित्स्वभावत्वमाह सर्वेति। ब्रह्मात्मा सर्वमनुभवतीचेदनुभाव्य स्यपत्यक्षा चाद्वैत मित्याशंक्याह ब्रह्मेति ॥ यत्तु रस्यास्पर्वस्यादिशिअब्रह्मेवा विदुषां जावित सर्वमिदममृतं ब्रह्मेवबस्तु तदस्त्यर्थः ॥ आदिपदेनस्व सत्ता नादिचाथा निगृह्य न्ते ॥ न न्वेषांवा क्यानामर्थ वादाधिकरण न्याये नकर्मपि द्वितकर्त्रादि प्रकाशने न क्रिया विधिशेषत्वेत्र कं तत्राह। नचेति ॥ वायुर्वेक्षेपिष्टेत्यादिना मिव क्रिया विधिशेषत्वेपि। तेषां नश्रुतहा निरश्रुत कल्पनावेत्याशंक्याह। नचेति ॥ युक्तमर्थवादानां स्वार्थेपुमर्थहीनानामध्ययन विधेर्विध्यपेक्षितत्राशस्त्यद्वारातच्छेषत्वं। यथाहुः ॥ स्वाध्याय विधिनावेदः पुरुषार्थाय नीयते। तद्वशेनार्थवादानां प्राशस्त्येन प्रमाणता तेति॥ वेदान्तानां तत्कर्मापेक्षितकर्त्रादि बोधित्वा तत्तद्विधिशेषत्वेत्यर्थः ॥ ननुपर्णतायानु हद्वाराक्रतुशेषतावद्यात्मनो पिज्ञान द्वारा कर्म्मशेषत्वात्तदर्थावेदान्तास्तद्विधिशेषा भविष्यंतिनेत्याहतदिति॥ तत्तत्रविशादृष्टायांकेनकरणेन कं विषयं कोवा कर्तापश्येदित्यादिवाक्येनात्मविधयाक्रियादिनिरासश्रूतेर्नासौ कर्मांगं तत्तो धीद्वारा आत्मन स्तद्विध्यशेषत्वात्तदर्थवेदांता नानतच्छेषत्वेत्यर्थः ॥ यत्तुनपरिनिष्ठितवस्तुप्रतिपादनं तस्याध्यक्षादियोग्यत्वादिति तत्राह नचेतितत्वमसीति शास्त्रमंतरेणो निसंबंधः ॥ वेदांतवेद्यस्य सिद्धत्वेपि मानान्तरायोग्यत्वात्तत्संवाद विसंवादाभावाद्युक्तं तत्रानपेक्षतत्प्रामाण्यमित्यर्थः ॥ तत्प्रतिपादनेचहेयोपादेयरहिते पुरुषार्थाभावादित्युक्तं मनुवदतिपत्विति ॥ पुरस्तात्संचम्यावस्तुतरस ध्याहार्यं आनर्थक्यं हेयादिहीनार्थत्वं वा विफलत्वं वा तत्रा धमुपेत्य द्वितीयं दूषयतिनेति ॥ यत्तुस्ववाक्यगतो पासनादिपरत्वं वेदांतानांतत् किंकृति 21

पयानामुत्तसर्वेषां मा धर्मंगीकरोतिदेवतादीति। आदिशब्देन देवासुरसंग्रामो गुणजात फल विशेषश्चोच्यते। तस्य
स्ति तत्प्रकरणस्योपास्तिशेषत्वं प्रकरणादिष्टमेवेत्यर्थः ॥ नेतरः ॥ सर्वेषां वेदांतानां तच्छेषत्वेपि मानाभावात् ॥ तदर्थस्य च ब्रह्मणस्तच्छेषत्वं ज्ञानात्प्रागूर्ध्वं वा आधेयस्तगुणवत स्तस्य तच्छेषत्वे विनद्वितीयइत्याह नत्विति। देवतादिप्रतिपादनं दृष्टान्तयितुं तथेत्युक्तं। तत्रहेतुः एकत्वमितिज्ञातेसतीतिशेषः। हेयोपादेयशून्यतयेत्यत्र ब्रह्मणो ज्ञातस्याद्वितीयस्येत्यध्याहार्यं उपास्योपासकादिनैदबुध्यभावाद्युपास्तिविध्ययोगान्न ब्रह्मणो ज्ञातस्य तच्छेषत्वेत्यर्थः ॥ संस्कारस्तुनाद्वैतज्ञानोदयेविद्यादिसर्वमविरुद्धमित्याशंक्याहनहीति। संस्कारोत्थस्याभासत्वाद्विध्यनिमित्तत्वान्न ब्रह्मणस्तच्छेषत्वेत्यर्थः ॥ वेदान्तानां स्वार्थेनमानं विधिशून्यवाक्यत्वात्संमतवदित्यनुमानात्तेषां विधिशेषत्वेत्याशंक्य स्वार्थेफलराहित्यमुपाधिरित्याहयद्यपीति ॥ अन्यत्रेतिकर्मकाण्डेत्युक्तिः वेदवाक्यानां सोमादीदित्यादीनामिति यावत् ॥ तथापिस्वार्थेवैफल्यं तेषां विधिस्पर्शमन्तरेण प्रामाण्येहेतुरितिशेषः ॥ साधनव्याप्तिं प्रत्याहत्वेति। तद्विषयस्येति आत्मज्ञान तच्छब्दार्थः ॥ शास्त्रस्य स्वार्थेफलवत्त्वात्तत्रैव तिशेषः ॥ एतेन कश्चिदपि त्यादिव्याख्यातं। अर्थवादाधिकरणस्य विषयभेदं वदति। नचमंत्रवदेदान्तानां विधिनिर्वाक्येकवाक्यत्वं तेषां दृष्टद्वाराक्रतूपकारित्ववदेषां तद्योगादेतदुक्तात्मज्ञानस्य कर्माधिकारविरोधित्वादिति द्रष्टव्यं। ननुवेदान्ताविधिबोधिनो मानत्वेसति वेदवाक्यत्वात्संमतवत्तन्नेत्याहनेचेति ॥ वक्ष्यमाणन्यायेन निषेधवाक्ये व्यभिचाराद्बाधितानधिगतासंदिग्धबोधित्वाद्युक्तं विधिस्पर्शं विनास्वार्थेवेदान्तप्रामाण्यमित्यर्थः ॥ विधिस्पर्शिनोवेदवाक्यस्य स्वार्थे प्रामाण्यमत्यत्र दृष्टं निषेधवाक्येपि विप्रतिपत्तेरित्याशंक्याहयेनेति। शास्त्रप्रामाण्यस्यानुमानगम्यत्वेनेति यावत् ॥ अपेक्षितशास्त्रप्रामाण्यमितिशेषः ॥ नतथातदनुमानगम्यं स्वारसिकत्वात् ॥ उत्पन्नायांहि प्रमायां शास्त्रस्यतल्लिंगेन तज्जनकत्वमनुमेयं ॥ ततस्तदुत्पत्तिदिशिरवीकारेपरस्पराश्रयत्वं तस्मादनुमानेनत्रयमपि शास्त्रप्रामाण्यं नतद्गम्यत्वे नजवतीतिनास्तिदृष्टान्तापेक्षेत्यर्थः ॥ वर्णकार्थमुपसंहरतितस्मादिति वेदान्तानांप्रामाण्ये विधिर्वृतुत्वत्वं तच्छब्दार्थः ॥ लौकिकोक्तीनां मानान्तरायत्तानां सिद्धेर्थेप्रामाण्यमुपेत्यवेदान्तेषु विनापिकार्यार्थतामनपेक्षत्वं फलवत्त्वं वानत्वस्य मितिमतं ब्रह्मात्मनोमानान्तरायोग्यत्वेनतद्धीमात्रात्फललाभे चपरास्तं ॥ संप्रतिकार्यान्वितेशक्तिनियमान्नसिद्धं वस्तु स्तुशास्त्रमितिचदतामुपास्तिविधिनिष्ठान्वेदान्तानि च्छतां मतं निरसितुं वर्णकांतर

मारभ्यते॥ यद्वा अमोघितब्रह्म तस्य जीवस्योपास्तिपरा वेदान्ताः न ब्रह्मात्मत्वेमानत्वमिति पक्षं प्रतिक्षिप्य तेषां वस्तुनि मानत्व
आनंद० न्वेपिधीविधिपरत्वेति विशेषमाशंक्यवर्णकान्तरं॥ तत्रसत्येवस्यादेवं यदीत्तावाक्यस्य धीविषयत्वेन न ब्रह्मार्थत्वं तु तस्मादिदमा
त्तिसिद्धेवस्तुनस्तज्ञापकत्वासंभवेति पूर्वपक्षयन्नत्रेति॥ ब्रह्मकार्यस्य हमेव शास्त्रगम्यं केवलमपीत्युभयत्र फलभेदः॥ सत्तस्या
२२ ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तं तदेव वदन्नुक्तमंगीकृत्यानिरूप्य प्रसंजयति यद्यपीति॥ प्रतिपत्तिविधिविषयतया तद्विष
यप्रतिपत्तिविषयतयेतियावत्॥ वस्तुमात्रनिष्ठत्वेब्रह्मधियो हानाद्यर्थत्वाभावादानर्थक्यमेवेत्यर्थः॥ कथंकार्यपरत्वेपि न
स्योवस्तुधीर्वाक्यजन्यादृष्टिस्यार्थवत्त्वयेति॥ यूपे पशुं बध्नातीति पशुबंधनाय विनियुक्ते रूपे तस्यालौकिकत्वात्को साविः
त्याकांक्षिते खादिरादिपोयूपं तक्षतीत्यष्टास्त्रीकरोतीत्यादि भिस्तत्क्षण दिविधिपरैरपि वाक्यैर्विशिष्टसंस्का
रसंस्कृतं दारुरूपमित्यतिगम्यते॥ यदाहवनीये जुहोतीति होमाधारत्वेनोक्ताहवनीयस्यालौकिकत्वात्कोसावितिवी
क्षायां वसंते ब्राह्मणोग्नीनादधीतेत्यादिविधिपरैरेव वाक्यैः संस्कृतोग्निरस्मादिति भातीत्याह यतिस्वर्गादिपि विधिपरे
णैव प्रमाणेनोक्तमेते॥ तथान्यपरेणापितेन विधिनोपादानादित्रिरूपं ब्रह्म सुबोधमित्यर्थः॥ ननु फलिनोपुंसः तथागोनि
धिमानित्यादिषु विनापि विधिं प्रयोगधीदृष्टेः शास्त्रेणापि विध्यनपेक्षेण ब्रह्मणो ध्वीयामितिर्शंकते कुत इति॥ दृष्टां
न्तेपि कार्याध्याहारं विना निष्ठेत्याह प्रवृत्तीति॥ प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा॥ पुंसां येनोपदिश्येत तच्छास्त्रमभि
धीयत इति न्यायादेवान्ता नामपि शास्त्रत्वादन्यतरनियमाद्विधिनिष्ठता ध्येयमित्यर्थः॥ प्रवृत्त्यादिपरस्यैव शास्त्र
त्वं शब्दशक्तिश्च कार्यान्वितेत्येवेत्यत्र वृद्धसंमतिमाह तथाहीति वेदस्य धीत्यस्यायादित्यं भाष्यमस्नान चोरव्यवधाना
धिगमाद्धीत्यस्नानमकृत्वा धर्मजिज्ञासमानो वेदमिममतिक्रामेदेन तिक्रमितव्य स्यास्यावित्ति चोदिते भाष्यकृतोक्त
मतिक्रमिष्यामः इममाम्नायमनतिक्रामन्तो वेदमर्थवन्तं संतमनर्थकं मवकल्पयेमेति॥ कस्तर्हि वेदस्यार्थस्तत्राह २२
दृष्टो हीति॥ तस्य वेदस्य कर्मावबोधनं नियोगज्ञानं दृष्टो र्थो दृष्टं फलं नियोगश्च साध्यत्वात्कर्तव्यापेक्षस्तस्मात्प्रवृत्त्यादिपि
रंशास्त्रमित्यर्थः॥ धर्मजिज्ञासासूत्रस्थं भाष्यमुक्त्वा तत्रैव चोदनासूत्रस्थं भाष्यमाह चोदनेतीति॥ चोदनेत्यत्र हि चोद्य
त्यनेन शब्देन क्रिया यानियोगस्य प्रवर्तकमनुष्ठापकं वचनमाहुर्वैदविदस्तेन शास्त्रं प्रवर्तकमित्यर्थः॥ प्रवृत्त्यादिपरत्व

स्य स्वमित्यत्रैव सूत्रकारसंवादयन्नौत्पत्तिकसूत्रावयवमादत्ते तस्येति अध्यत्वादभावात्मानागम्यस्य धर्मस्य कथं धीरिति
वीक्षायामुक्तमौत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशोव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्ष
त्वादिति॥ उत्पत्तिर्नादिः शब्दस्य वाचकस्यार्थे न वाच्येन शक्तिसंबंधस्तयोर्भविनाविमुक्तो नित्यो न तत्त्यन्ययोरुत्तरभावीतथा
विधर्मे किंमानं चोदनैवेत्याह तस्येति अग्निहोत्रादिधर्मस्याध्यक्षाद्यसिद्धस्य ज्ञायतेनेनेति ज्ञानं तन्निमित्तं ज्ञानमुपदेश उप
दिश्यते॥ नेनेति विधिवाक्यमव्यतिरेकश्चाशब्दोज्ज्ञानस्यार्थे व्यभिचाराभावो न ह्यपौरुषेयोक्तिजन्यं ज्ञानं जातु विपर्येति
तस्मादन्यतोनुपलब्धेऽर्थे धर्माख्ये तदेवोपदेशशब्दितं विधिवाक्यं मानं ज्ञानान्तरेपुरुषान्तरे वा तस्यानपेक्षत्वात् बादरा
यणस्यापिन्नगवतस्संमतमेतदित्याचार्यदृष्ट्यैतुं बादरायणोक्तिरित्यत्रार्थः॥ तत्र लोके शब्दस्य मानान्तरवेद्यलोप
हितस्यार्थशक्तिनियमान्तमदेवदत्तादिपदेष्वसंकेतादर्थधीदृष्टेः सर्वशब्दानां तथैवार्थबोधित्वादवेद्येसंकेतायोगान्नास्य
वेदार्थधीरिति तत्पनावो वेदार्थस्येत्याशंक्य कार्यबोधाधीनव्यवहारकृतशक्तोमानान्तरानिवेश्यत्कार्यान्वितस्वार्थमात्रेशे
शक्तेरवधृतत्वाद्वृद्धव्यवहारात्सन्निश्चितशक्तेर्गवादिशब्दार्थधीदृष्टेर्देवदत्तादिपदेष्वसंकेतानुमानायोगात्प्रसिद्धा
र्थपदसमभिव्याहारात्प्रवृत्त्युपायादपूर्वकार्यार्थता लिङादेः शब्दान्तराणां तदन्वितस्वार्थव्युत्पत्तेर्मानान्तरानपेक्षार्थ
स्यानादिकसंबंधादपौरुषेयवचसामिति चिंतितं तथाचौत्पत्तिकसूत्रादपि शास्त्रं प्रवृत्त्यादिपरमेवेत्यर्थः॥ कार्यान्वितेप
दशक्तिरित्यत्रैव सूत्रं प्रवृत्तितद्भूतानामिति॥ समाम्नायोर्थस्यतन्निमित्तत्वादिति सूत्रशेषः॥ वेदवाक्यानि मानान्तरसापेक्षा
णि तन्निरपेक्षाणि वेति संशये वृद्धव्यवहारेवाक्यात्तदर्थज्ञाने पि वेदवाक्यस्य समुदायान्तरात्वादर्थेनाज्ञातसंबंधत्वात्तत्क
ल्पनेसंकेतापातादेववाक्यानां सापेक्षत्वाद्यामाण्यमिति प्राप्ते लोकवैदिकयोः शब्दार्थभेदाद्वैदिकवाक्यार्थधियो लोक
व्युत्पत्तिमूलत्वात्कार्यान्वितेज्ञातशक्तीनामेव शब्दानां विशिष्टार्थेनिवेशकानां वाक्यत्वाद्वैदिकवाक्यानां संकेतानपेक्षाणां
स्वार्थधीहेतुत्वादपौरुषेयाणां तेषामनपेक्षं प्रामाण्यमिति राद्धान्तितं॥ तेषु पदार्थेषु भूतानां वर्तमानानां पदानां कार्येण
वाकार्थेन तत्प्रतिपत्त्यर्थत्वेन समाम्नायः संभूय वाक्यत्वेनोच्चारणमेकैकपदस्मृतार्थस्य मिलितस्य वा कार्यधीनिमि

आनंद० त्तता तत्परार्थप्रतिपत्त्यंतरजापाराणि हि पदानि वाक्यार्थं बोधयन्तीति सूत्रार्थः॥ भूतार्थपरस्य न शास्त्रत्वेत्यत्रापि
सूत्रकारानुमतिमाह॥ आम्नायस्येति॥ अभियुक्तोक्त्याफलितमाह तदिति॥ इष्टोपायो यागादिर्विषयविशेषो निषेधविषयो
२३ हननादिर्द्वितीयो विषयविशेषः॥ विधिनिषेधयोः कार्यस्यैवमर्थवत्त्वेऽपि कुतमर्थवादादिषु तथात्वमाशंक्याह तच्छेषतयेति॥ तथा
पि वेदांतानां क्रियापरत्वदार्ढ्यहलसामान्यादिति॥ कर्मशेषत्वेनसामान्य॥ शास्त्रत्वं तथैव प्रवर्त्तकत्वेन निवर्त्तकत्वेनर्त्तकत्वेन त
तच्छेषत्वेन वेत्यर्थः॥ ननु वेदांतेषु विधेयाभावान्नियोज्याभावाच्च विध्ययोगान्न प्रवृत्त्यादिपरत्वमत आह सतीति॥ शास्त्रत्वा
न्नेषामपि विधिपरत्वधीर्ध्येयात्र सत्त्वापेक्षया नियोज्यविशेषलाभात् धियश्चाग्निहोत्रादिवद्विधेयत्वाद्विधिद्वारा वे
दांतानां प्रवृत्त्यादिपरत्वमित्यर्थः॥ प्रकृतमारचयन् ब्रह्मधियो विधेयत्वमाक्षिपति॥ नचेति॥ इहेति कार्यकृदयस्याधस्तत्रस्थवो
क्तिः॥ भूतशब्दस्यार्थांतरं निरसितुं विशिनष्टि नित्येति॥ धीकर्मणो विषयत्वेनापि विधेयत्वे किं जातं तत्राह तत्रेति॥
ब्रह्मधियोऽसाध्यफलत्वाच्च कर्म्मबद्विधेयतेत्येतद्रूपयति नेति॥ तत्र नियोगस्य नावाद्यविषयो नियोगेन कार्यं विधिस्तद्रूपे त्ति
तस्यैव ब्रह्मणो वेदांतेषु प्रतिपादनात् तस्य स्वतोऽसाध्यत्वेऽपि विधेयक्रियाद्वारा साध्यत्वात् कर्म्मफलवदीफलस्यापि ने
योगिकत्वात्तत्फलावेजद्व्यावृत्तयोर्विधेयतातुल्येत्यर्थः॥ वेदांतेषु विध्यश्रवणाच्च तच्छेषब्रह्मोक्तिरित्याशंक्याह ब्रह्मेति॥
ब्रह्मवेदेत्यत्र ब्रह्मविद्भिर्वदिधि॥ रादिप ध्रुवं ब्रह्मविदाप्नोतीत्यादिश्रुतिः॥ तथापि सत्यादिवाक्यानि नावगतेरन्विधस्य
तं ब्रह्मणि चधीरन्नित्याशंक्य वाक्येषु योगेन तद्दृष्टफलत्वं नेत्याह॥ कोसावितिः॥ तानेव वेदांतानाह निरस्यत्यादिना॥ द्रा
जिकबुद्धेर्हाद्वानां व्यावर्त्तयितुं नित्यपदं पदशब्दपश्चन्तुरित्यादिश्रुते श्चक्षुरादिमात्रावच्छिन्नरूपादिज्ञानवत्त्वं व्याव
र्त्त्यं सर्वत्राप्रतिबद्धज्ञानवत्त्वमाह॥ सर्वज्ञ इति॥ दिगंबरेष्टं सर्वज्ञपराच्छेदे सर्वेति॥ सांख्यमतमाह नित्येति॥ जडविरो
धीकतां तस्येव्यासेद्धुं नित्यशुद्धेति॥ अखण्डजाड्यबादत्पर्यर्थबुद्धेति॥ विवर्त्तहीनार्व उपशक्तेत्यद्यास्त शबला २३
चैतन्यं निषेद्धुं मुक्तेत्यादि॥ एतानि विशेषणानि तेत्तदात्मस्थान्यत्वलक्षणरोपजलक्षणत्वेनोक्तानि श्रेयरोचात्वमाह
विज्ञानमिति॥ परमपुरुषार्थत्वमाहानंदमिति॥ आदिशब्दः सत्यज्ञानमित्यादिसंग्रहार्थः॥ ननु कर्मविधिफलवदृष्टमेद
एवाभावानि ध्येयनिषिद्धानर्थकत्वात्॥ नच व्याख्यानादिवर्त्तदर्थवत्त्वं दृष्टमात्रफलत्वविरोधात्तेषु नियमादृष्टस्येष्टत्वात्

न द्वितीयो मानाभावात्तत्राह तदुपासनान्नेति॥ प्रत्यग्ब्रह्मतत्त्वार्थः॥ शास्त्रं ब्रह्मवेदेत्यादि॥ अन्वयव्यतिरेकासिद्धत्व
मदृष्टत्वं॥ ब्रह्मणोविध्यनुमाजं वेशमुक्तो विपक्षपात्याह कर्त्तव्येति॥ ब्रह्मणे विधेयधीविषयत्वाभावे विध्यसंपृक्तस्यैवो
क्तौ तत्र हानोपयोगः को वेति॥ वर्द्धमानकर्मैव वेदांतानामित्यर्थः॥ वस्तुमात्रोक्तावपि नानर्थक्यमिति दृष्टांते न शं
कते॥ नन्विति॥ वेद्यमोक्षाक्षयत्वात्स्यादिति॥ वाक्योक्ताज्ञानादेवासक्तत्वलेह त्वन्तरमाह श्रोतव्य इति॥ पूर्वपक्ष
मुपसंहरति तस्मादिति॥ सिद्धे वेदशब्दानामज्ञातशक्तित्वं वेदांतानां शास्त्रत्वमर्थवत्त्वं श्रवणादिर्धर्ममननादिविधि
श्व तच्छेषत्वार्थं॥ प्रतिपत्त्यादिप्रतिपन्ने विधिर्नियोगः॥ तस्य विषयत्वं तां प्रति प्रतिपत्तव्यच्छेदकत्वेन विषयतयेत्य
र्थः॥ पासंपक्षमनुवसिद्धांतयत्यत्रेति॥ परमत निरासे प्रतिजानीते नेति॥ कर्म्मवद्विधेया धीरित्युक्तं निषेधति तु॥
माह कर्म्मेति॥ तदेव वक्तुं कर्म्म भिनत्ति शारीरमिति॥ तत्तत्कर्मचोदे देहादिः सर्वस्योपयोगेपि कचित्कस्यचित्प्रा
धान्यात्रे विधर्मं धर्मं तत्र प्रमाणमाह श्रुतीति॥ अग्निहोत्रं जुहुयात् ब्रह्मलयज्ञेनवह्नुमायाः स ध्यायेन मनसा ध्यायेदि
त्याद्याश्रुतिः॥ शारीरवाङ्मनोनिर्वर्त्यकर्म्मास्ततेन रहस्याद्यास्मृतिः॥ लोकेपि तत्प्रसिद्धं मंत्रोक्तं धर्माख्यमिति न्यायसिद्धे
चेतद्दिस्याह यदिवयेति॥ स्वाध्यायाध्ययनानंतरं तस्य धर्मजिज्ञासा पुष्कलहेतुत्वात्तन्निर्णयार्थं वेदवाक्यानि विचा
रयितव्यानीति वदता धर्मस्यैव विचारितत्वात्तत्रास्य न्यायसिद्धत्वेऽपि कथमधर्मस्य तद्विषयतेत्याशंक्य धर्मशब्द
स्योपलक्षणत्वमाह॥ धर्मोपीति हिंसादावादिपदमनर्थहेतुदिसंग्रहार्थं चोदनालक्षणत्वानुलोकस्येज्ञि
त्तत्त्वस्य लेपि कुतो धर्मस्य तथेत्याशंक्याह प्रसिद्धेति॥ धर्मोहि पुरुषार्थः श्रेयस्करेनुतीति तज्जिज्ञासास्याद्ध
र्मजिज्ञासानु विफलेत्याशंक्याह परिहारायेति॥ उक्तं कर्मरूपमनूद्य तत्फलमाह तयोरिति॥ सर्वलोकप्रसिद्धत्वेन
विद्वत्वाचसिद्धविधाकलादृद्देसारव्यतिप्रसक्तेरिति॥ सुखमात्रं विधाफलं इदं दुःखमपीतिजे तान्तरमाह
सुखेत्यादिना॥ अकार्यकरणस्य विद्याफलं जरूं कर्मफलं तन्मध्येति विशेषान्तरमाह शरीरेति॥ नित्यसिद्धे
विद्याफलमविद्यापिधानमात्रापेक्षं कर्मफलमस्य येत्यपरं विशेषमाह निवयेति॥ अनेनापि सत्वा
च्च कर्म्मफलं विद्याफलविलक्षणमित्याह॥ ब्रह्मादिष्विति॥ तारतम्यभाक्त्वादपि कर्मफलस्य विद्याफला द

नतिशयाच्छिन्नत्वात् मनुष्यत्वादिति श्रुतेरुक्तार्थानुसारित्वमनुशब्दार्थः स एको मानुष आनन्द इत्येशतं मानुषा
आनं० आनन्दा इत्याद्या श्रुतिः फलवैलक्षण्यमुपलक्षयति तथाच्युत्वा सा धनवैलक्षण्यमाहेत्युक्तमन्वेति फले तारतम्यस्य श्रुतत्वा
दित्याशयवत्। हेतुवैचित्र्यं विना कार्यवैचित्र्यस्याकस्मिकत्वापत्तेर्मोक्षोऽधिकारूपसाधनमेकरूपमिति व्यक्तं विधाक
२५ र्मणोः स्वरूपवैचित्र्यं किं च विद्यायामेकरूपसाधनचतुष्टयविशिष्टोऽधिकारी नानारूपस्तु कर्मण्यधिकारि
त्वमाह धर्मेति॥ धर्माधिकारितारतम्ये हेत्वन्तरमाह प्रसिद्धं चेति। आदिपदं प्रयुक्तसंग्रहार्थं न केवलमसि
द्धत्वादधिकारितारतम्यं किंतु दक्षिणोत्तरगतिश्रुतेरप्यधिकारितारतम्यं श्रुतमित्याह तथाचेति। विध
त्युपासनोक्तसमाधिरूपाद्धर्मन्यस्मात् क्रियात्ववतयोर्विशेषो नामप्रकर्षः समुच्चयानुष्ठायिनामर्चिरादिमुपलब्धि
तेर्देवयानं पन्थानमुक्त्वा कर्ममात्रनिष्ठानां पन्थान्तरमाह केवलेरिति। इष्टमग्निहोत्रं तपः सत्यात्मदानाद्यानुपाल
नमातिथ्यं वैश्वदेवमित्येवं विधं कर्म पूर्तं वापीकूपतडाकदेवतायतनान्नप्रदानारामादिरूपं स्मार्तं कर्म दत्तं श
रणागतत्राणमहिंसा च बहिर्वेदि दानं च धूमादिपलक्षितेन दक्षिणेन पथा चन्द्रलोकं गते सुखवैरूप्यात्तद्धेतो
रपि तथात्वादन्यत्रापि तत्तारतम्यासिद्धिरित्याशयेनाह तत्रापीति॥ संपातस्येनेतादृशस्वार्जितलोकमिति कर्मा
शयः संपातस्तमथावरोहकं स्थित्वा यथेतमेवाध्वानं पुनर्निवर्तन्त इति यत्ताकरुणातिशयत्वसुखवत्त्वेलोर्ध्व
तील्पर्थः॥ मनुष्यत्वादारभ्योर्ध्वगतेषु सुखवत्त्वे तारतम्योत्कर्षमुक्त्वा तदृष्टान्तेन तस्मादारभ्याधोगतेषु तयोरपक
र्षतारतम्यमाह तथेति॥ सुखवत्त्वहेतु तदनुशयिनामुत्कर्षापकर्षतारतम्यमाह तथेति॥ सुखवत्त्वहेतुतदनुष्ठा
यिनामपि तद्दुःखत्वमस्तीत्याह तयोरिति॥ मनुष्यत्वादधोगतेषु दुःखापकर्षतारतम्यं तस्मादधोगतेषु च तदुत्कर्ष
तारतम्यमिति शेषः॥ कर्मफलविपाकजातेस्तु प्रपंचितमुपसंहरत्येवमिति। अविद्यादीत्यादिपदेनास्मिता रागद्वेषा २५
भिनिवेशा गृह्यन्ते। सुखदुःखपरिणाममदर्शयितृ शरीरेति। तस्योपादानं तस्मिन्निधिविधेः भिमानः तस्यानर्थतया
हेयत्वमाह संसारेति। अनित्यमित्यपि तदर्थमेव। भयमुपसंहरन्मानमुपसंहरतीति श्रुतीति। शरीरजैः कर्मदोषैर्या
ति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितामित्याद्यास्मृतिः दर्शने हेतुसाम्येपि द्वन्द्वसुखादि वैचित्र्यं।

तथाभूतमर्थौ जो कि किंहेतुकं स्यादित्याशंक्याह तथा चेति। निपातावधारणे॥ श्रुतेस्तात्पर्यमाह॥ यथेति
नास्याः संसाररूपवेदने तात्पर्यं तदनुवादेन मुक्तिपरत्वादित्याह तदनुवदतीति। विद्याफलमाहाशरीरमिति। तत्त्व
तो विदेहं सन्तमात्मानं वेदयितुं के सुखदुःखे न स्पृशतो वा वर्तत इत्यधारणादित्यर्थः॥ श्रुतितात्पर्यमाह चोदनेति॥
तदागमकमाह रूपिचेति॥ गमकत्वमस्यप्रतिरूपकेणा स्फोरयति धर्मेति। तत्कार्यं तद्दृष्टेरित्यर्थः॥ धर्मस्य विचित्रफलत्वा
द्देहत्वमपि तत्कार्यत्वमेवेति शंकते॥ शरीरत्वमिति। वस्तुतो देहादिसंबन्धोऽशरीरत्वं तस्य नित्यत्वात्तत्तिरोधायकाज्ञानस्य
ज्ञानमात्रापोह्यत्वान्न धर्मकार्यतेत्याह नेति तत्र मानमाह। अशरीरमिति॥ अशरीरं रूपतो वस्तुतो नास्य स्तीति यावत्॥ तत्र हेतुः
शरीरेष्विति। अनवस्थेष्वनित्येष्ववस्थितं नित्यमित्यर्थः॥ तत्रैवहेत्वन्तरमाह महान्तमिति। सापेक्षिकत्वं वारयति॥
विभुमिति॥ मत्वमंतव्यं तत्प्रत्याहात्मानमिति॥ ईदृशमात्मानं मत्वा धीरो न शोचति। नहि तन्मतिं विना धीरत्वं स च धीरः
शोकोपलक्षितं संसारं नानुभवतीत्यर्थः॥ सत्त्वदेहादावेव मानान्तरमाह प्राणाद् इति। क्रियाशक्तिमान् प्राणोऽस्य व
स्तुतो नास्तीति तन्निषेधात् तत्प्रधानानि सार्थानि कर्मेन्द्रियाणि निषिद्धानि तदभिप्रायेण हि शब्दः॥ ज्ञानशक्तिमदमि
नोऽस्य वस्तुतो नेति तन्निषेधात् तत्प्रधानज्ञानेन्द्रियाणि सार्थानि निषिद्धानि अतएव शुद्ध इत्यर्थः॥ देहद्वयाभावे फलं
रमाह। असंगो हीति॥ स यत्तत्र त्वाद्धि स्वप्नादिलक्षकर्म स्वकर्तृत्वेत्युक्तेऽर्थे हेतुरनेनोच्यते मूर्तेर्मूर्तान्तरेण युज्यमानत्वाद
ते। आत्मा तु पूर्णत्वादमूर्तो न केन विद्युज्यते नेनाकर्तेत्यर्थः॥ अकार्यमव्रणमित्यादिसंग्रहार्थमादिपदं॥ अशरीरत्व
स्य स्वाभाविकत्वे फलितमाहातइति। तद्वैलक्षण्ये किं स्यात्तदाह नित्यमिति॥ तथापि परिणामित्वाद्विधेयक्रियानुप्र
वेशमाशंक्याह परिणामिनित्यं पृथक्करोति तत्रेति। प्रकृतेर्नित्यत्वे संमत्यर्थः॥ परिणामित्वनित्यत्वयोर्विरोधमसत्यभि
ज्ञयाशंक्याह यस्मिन्निति। तत्र मीमांसकादिसंमतं दृष्टान्तमाह यथेति॥ तथाप्यद्यपि विक्रियमाणं प्रत्यभिज्ञातो
नित्यं स्यादिति शेषः॥ सांख्यस्वीय दृष्टान्तमाह यथा चेति। सत्त्वरजस्तमांसि गुणा विक्रियमाणा एव प्रत्यभिज्ञया
नित्यास्तथान्यदपि परिणामि नित्यमित्यर्थः॥ नात्र कूटस्थात् देहत्वे मोक्षे विशेषमाह इदं त्विति तत्त्वत्वादिकंप

रिणामस्य कार्त्स्न्यैकदेशाभ्यां प्रसंगे प्राप्ते चतुर्थ्यां चत्वारो द्वारश्रमदेहत्वं स्यादविकमकल्पितमिति विशेषमेवाहपार
आनं द० मार्थिकमिति ॥ तत्र हेतुमाह कूटस्थेति ॥ तदर्थं सर्वगतत्वेन परिशिष्यं द्रष्टव्यं परिणामशक्तिमाह व्योमवदिति ॥ फलार्थाभिक्रि
२५ यातत्र न कल्प्यात इति सप्रातेनत्वादित्याह निरंशेति ॥ परिणामाभावे हेत्वन्तरं निरवयवत्वमिति प्रकाशार्थाभिक्रियानत
त्रेत्याह प्रत्ययमिति ॥ कूटस्थविशेषणभावकृत्यमुक्तौ क्रिया न तु प्रवेशात्तनस्या कर्मकार्येत्युक्तं ॥ इदानीं धर्माधर्मयोस्स
कार्ययोर्ब्रह्मसंबंधनिषेधादपि तत्प्राप्तिर्मुक्तिर्न कर्मकार्येत्याह यत्रेति ॥ कालानवच्छिन्नत्वाद्वा मुक्तिरकर्मसाध्येत्या
ह कालेति ॥ ब्रह्मणो धर्माधर्मवत्त्वं प्रत्येमानमाह अन्यत्रेति ॥ धर्मात्तत्फलात्सुखादधर्मात्तत्फलाच्च दुःखात्कृतात्का
र्यादकृताच्च कारणाद्भूतादिकालत्रयाच्च यदन्यत्तेनानवच्छेद्यं यत्स्वरूपमस्ति तद्वदेति मन्यस्वेति नचिकेतसो वचनं आ
दिशब्देनानेनं सेतुमित्याद्याः श्रुतिर्गृह्यते ॥ ब्रह्मजिज्ञासाविषयत्वाद्धर्माधर्मस्पृष्टं ब्रह्मणो मुक्तेरित्याह तदिति ॥ अतः
शब्दोपात्ते धर्माधर्मस्पर्शे कर्मफलत्वे लक्षणं हेतूकृतं ॥ कर्तव्यधीशेषत्वेन ब्रह्मोपदेशगतत्वात्तस्य मुक्तेर्वैधधीफ
लत्वमित्याशंक्याह तद्यदीति ॥ अनित्यत्वे स्वर्गादिवत्पुमर्थत्वाशंकाह तत्रेति ॥ तस्मिन्नो ह्येवि धेयं किं यासा
ध्यत्वे नानित्यत्वे सति स्वर्गः ॥ यथोक्तेति ॥ तयोश्च्योर्दृष्टान्तलक्षणयोरित्याह विविनिक्ष ॥ स्वर्गादि दृष्टान्तादित्यर्थः ॥
इत्यक्षापत्तिप्रस्तावे नित्यश्रुतेति ॥ ब्रह्मात्मैव मुक्तेरवैधफलत्वे फलितमाह अतइति ॥ मुक्तेरवैधफलत्वे हेत्वंतर
माहापिचेति ॥ यो ब्रह्म ब्रह्मत्वेन साक्षात्करोति स तदेव वेदं ब्रह्म भवति तत्फलमुक्त्या तस्मिन् परमात्मनि परं
कारणमापरं कार्यरूपे तद्दृष्टे ॥ घटत्वेन साक्षात्कृते सत्यस्य चिच्छेदाना स्वकर्माणि कर्माकिंचिज्ज्ञा
निजवंति ॥ ब्रह्मणो रूपमानंदं विद्वान् हेत्वाभावान्न बि... चो भवति श्रुता विलिशोक अशोकसमास्त्वर्थः ॥ हे
जनकत्वमभयं ब्रह्मप्राप्तोऽसि तत्साक्षात्कारवत्त्वात्त्वं यदस्मिन्देहे जनकस्य सर्वं विदितं ब्रह्म निजात्वं तदाचार्येण । २५
बोधितमात्मानमेव सर्वकल्पनातीतं विदितवत्त्वं कथमहं ब्रह्माद्वितीयमस्मीति तस्मादेवज्ञानादज्ञानहानात्सर्वत्वं नि
वत्सात ब्रह्मपूर्णात्मना स्थितमासीत्तस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत इति श्रुतेः सर्वात्मभावो विधात्वं

ग्यत्वेनोक्तस्तत्रात्मनित्यत्वीकालेनात्र्यत्मेकत्वमनुपदेशेन पश्यतः शोकाद्युपलक्षितः संसारो नेतीति श्रुतीनामर्थः ॥ आ
दिशब्देन ब्रह्मविदाप्नोतीत्याद्या गृह्यंते ॥ तासां तात्पर्यमाह ब्रह्मेति ॥ विद्यातत्फलयोरेककालत्वश्रुतेर्वैधज्ञानादन्यस्य
त्वमुक्तेस्तद्योगाद्वैधफलस्य कालांतरभावित्वाद्ब्रह्मध्याने विधेयात्फलं च दृष्टमेवेति भावः ॥ इतश्च मोक्षो वैधो नेत्
याह तथेति ॥ तत्त्वदर्शनं ब्रह्मैतदात्मत्वेनाच्छितरमस्मीति पश्यन्नस्माद्देवदर्शनादृष्टिवर्गमिदं वनामापरं ब्रह्मविधा
ध्वस्त्याद्यलिपनवान्क्रियेति ॥ दृशकोऽप्यवधाने न संबध्यते ॥ सचास्मिन् दर्शने स्थितः सर्वात्मत्वप्रकाशकान्मंत्रान्
दृष्टमित्याद्यनुदृष्टवानिति श्रुत्यर्थः ॥ वैदिकत्वात्तात्पर्यमाह ब्रह्मेति ॥ लक्षणहेत्वोः क्रियायाः शतृप्रत्ययेन लक्ष्यते लक्षणं
जनको हेतुरेतौ लक्षणहेतू क्रियाविषयौ चेद्भवतस्तदा क्रियात्मके तस्या लक्षणे तस्याहितौ तौ चार्थात्तेर्वर्तमानाच्छातोः
परस्य लटः सतृशानचावादेशौ भवतः ॥ दृष्टमुक्तं यथा लिखन्मूत्रयतिशयानो भुंक्ते अधीयानो वसतीति तथात्रापि
धातिपत्तिक्रियाहेतौ क्रियायां दर्शने पश्यन्निति शतृ दर्शनादेव हितेच हेतुमतिक्रियायाहेतुत्वादेशषत्तप्रत्ययः स
र्वात्मत्वस्य कालांतरत्वं वारयति ॥ अतोऽस्यनैवैधत्वं सिद्धं ॥ यद्यपि न स्थितिक्रिया सामर्थ्यात्तु गौतिक्रिया किंतु यत्वा
त्तरात्तथापि नियोर्मध्ये क्रियान्तरं शब्दतो न भवतीसेवलावतोदाहरतीति यथेति ॥ इतश्च ब्रह्मध्याने विधेयात्फलं
च न वैधमित्याह तंहीति ॥ भरद्वाजादयः षड्ऋषयः परविद्याप्रदं पिप्पलादं गुरुं विद्यानिष्क्रयार्थमस्य तदनुरूपमपश्यन्तः
पादयोः प्रणम्योचिरे ॥ त्वं खल्वस्माकं पिता ब्रह्मदेहस्याजरामरस्य विद्यया जनयितृत्वात् इतरे पितरो देहमेव जन
यतो जनयितृत्वमपि सिद्धस्येवाविद्याया निरासादित्याह ॥ यस्त्वमस्मानविद्यामहोदधेः परमपुनरावृत्तिरूपं पार
तारयसि प्रापयसि विद्याप्लवेनेति प्रश्नोपनिषदुक्ता ॥ सनत्कुमारनारदसंवादात्मिकां छांदोग्योपनिषदं पठति श्रुतं
ह्येति ॥ तत्र तारयति त्वं तमुपक्रमस्थं शेषमुपसंहारस्थं मिति विवेदः ॥ भगवद्भ्यस्त्वादृशेभ्यः श्रुतमेवेदं यत्तरति शो
कं मनस्तापमकृतार्थबुद्धिमात्मविदिति सोहमनात्मवित्त्वात् ॥ शोचामि तस्मात्तं मां शोचन्तं शोकसागरस्य पारमंतता

आ॰बो॰ ८० रयनुक्तावानात्मज्ञानोऽनुपपन्नेति नारदेन प्रेरितः सनत्कुमारस्तस्मै वैराग्यादिना निरस्तसमस्तदोषाय योग्याय तम
सोविद्यास्परस्य स्य पारं परमार्थतत्त्वं दर्शितवानित्यर्थः ॥ आदिशब्देन एतद्योवेद निहितं गुहायामित्यादिः श्रुतयो गृह्य
२६ न्ते तास्वासां तात्पर्यमाह मोक्षेति विद्याफलं अविद्याध्वस्तिः श्रुतानुवादमानानास्तदुक्तिस्तथा चोपास्तेरन्यामानमेव ब्रह्म
धीर्न विधेयात स्फलं मुक्तिर्नवै धत्त्वर्थः ॥ श्रुत्यनुसारेणाऽविद्याध्वस्तिफलत्वाद् ब्रह्मधीस्तत्त्वधीरित्युक्तमिदानीं
तत्त्वं शास्त्रानुसारेणापि निर्दिशेत्याह तथा चेति ॥ दुःखं प्रतिकूलवेदनीयं बाधपीडातापः इत्यनेकविधं जन्म
देहेन्द्रियबुद्धीनां निकायविशिष्टप्रादुर्भावो हिंसास्तेयादिरूपा विकाप्रवृत्तिरधर्मप्रवृत्तिः ॥ दानत्राणादिरूपाप्र
वृत्तिर्धर्मं जनयति ॥ तावेतौ धर्माधर्मौ प्रवृत्तिसाध्यौ तत्र हेतोः रागद्वेषेर्ष्यास्तथा मानलोभास्योतेषां मिथ्याज्ञान
मतस्मिंस्तज्ञानमनात्मन्यात्मस्त्रीपुत्रादिते र्थाथा तक्रमात् दुःखान्तरोत्तरस्यापायोनन्तरेतस्य पर्यदर्वस्यापायादपवर्गो
निःश्रेयसं मिथ्याज्ञानादयो दुःखान्ता धर्माविच्छेदेनैव वर्तमानाः संसारस्तथा च यदा तत्त्वज्ञानान्मिथ्याज्ञानम
पैति तदा हेत्वभावे फलाभावाद्दोषापायः स्तादपाये च प्रवृत्तिसाध्यधर्माधर्मापायाज्जन्मापायात् दुःखमप
गच्छतीति तदत्यन्ताभावे तत्रैव निःश्रेयसं सिद्धमिति तदेवं तत्त्वज्ञानान्मिथ्याज्ञानध्वस्त्या मोक्ष इत्यत्र यादस्यापि विव
क्षितमित्यर्थः ॥ ननु भेदधीरेव मिथ्याधीविरुद्धा तत्त्वधीस्तर्कशास्त्रे नीलात्तत्त्वज्ञानं तु मिथ्याज्ञानविपर्ययेणा
ख्यातमित्युपक्रम्यात्मविना वदस्तीत्यनात्मन्यात्मेति दुःखे निःखे त्राणे सत्रयेऽनु गुप्तिते तत्त्वे यथा विषयं वेदि
तव्यमित्यादि न्यायभाष्यदर्शनात् कार्यं ब्रह्मात्मैकज्ञानान्मिथ्याधीध्वस्तिरित्यत्र न्यायशास्त्रानुगुण्यं तत्राह मिथ्ये
ति ॥ भेदद्रष्टे रज्ञानविजातत्वान्मिथ्याज्ञानाप्रतिपत्तत्वाद् दृढत्वाच्च ब्रह्मात्मधीरेव तन्निवर्तिकैकेत्यावश्यकमित्य २६
र्थः ॥ अर्थेप्यमे पि ज्ञानमपि संपदादिरूपत्वाद्धेददधीतुल्यं न मिथ्याधीविरुद्धमित्याह नचेति ॥ संपन्नाम ल्पेवस्तु
न्यालंबने सामान्येन केन चिन्महतो वस्तुनः संपादनं ॥ तत्रोदाहरणं ॥ यद्येति ॥ मनस्यनंतवृत्तिमत्वालंबनेऽल्प

परिमाणे विश्वे देवानामनंतानांमहत्तामनेनत्वसाम्येन संपादनं तेनानन्तफलप्राप्तिर्यथा अनन्तता तथा ज्ञीक्ष्यापि चेतन्य
सामान्यात् ब्रह्मतासंपादनमप्यतत्त्वफलं विधेयमित्युक्तमित्यर्थः ॥ अध्याससंपत्तिं निषेधति नचेति ॥ अध्यासः शास्त्रतोऽतस्मिं
स्तद्धिः संपदि संपाद्यप्रधयमानस्यप्राधान्येनानुध्यानमध्यासे त्वालंबनस्येति विशेषं मत्वा दृष्टान्तमाह यथेति ॥ आदिशब्दाद्ब्राह्मणा
शादुक्तः ॥ अनादित्यादेरेवथा ब्रह्मधीरारोप्यते तथा जीवे तद्धीरारोप्येत्यध्यासरूपमिदमैकात्म्यज्ञानमित्यपि नेत्यर्थः ॥ प्रयुक्तां तूदू
षयति नापीति ॥ संवर्गविद्यायां श्रुतं वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येतीति जीयते ॥ यदा सूर्योऽस्त
मेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ॥ यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इ
त्यधिदैवतं ॥ अथाध्यात्मं प्राणो वाव संवर्गो यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मन
इति तत्र यथा संहरणक्रियायोग्यत्वात् प्राणस्य च संवर्गत्वं तथा जीवब्रह्मणो बृंहणक्रियायोग्यत्वादेकत्वज्ञानमपि नेत्यर्थः ॥ आ
दिशब्देन प्राणो वाव चक्षुरित्यादि गृहीतं ॥ मतान्तरमप्याह नापीति ॥ यथा दर्शपूर्णमासाधिकारे पत्न्यवेक्षितमाज्यं भवतीत्या
ज्यावेक्षणमुपांशुयाजांगभूताज्यसंस्कारो गुणकर्म विधीयते तथा कर्तृत्वेनांगे कृतात्मनि द्रष्टव्यादिवाक्येन द्रष्टे गुणकर्म
णो विधानात् कर्मांगात्मसंस्काररूपमैक्यज्ञानमित्यपि नेत्यर्थः ॥ आदिशब्देन प्रोक्षणादि गृह्यते ॥ संपदध्यासक्रियायोगसंस्का
राणां न घटितत्वमात्रादयोगे तिप्रसंगादित्याशंक्य वेदान्तानां स्वार्थमानान्तरविरोधाभावात्तात्पर्यलिंगाद्वा न संपदादिपरत्वेति वि
कल्प्याद्ये जीवब्रह्मणोर्मानान्तराप्रमेगोचरत्वात्तद्भेदस्यापि तथात्वाद्भेदद्रष्टेश्च बिंबप्रतिबिंबवद्विरोधादसिद्ध इति मत्वा द्वि
तीयं प्रत्याह संपदादीति ॥ सदेव सोम्येदमग्र आसीदेकमेवेत्युपक्रमादेतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्युपसंहारात्तत्त्वमसीत्यभ्या
साद् ब्रह्मात्मनोऽमानान्तरावेद्यत्वेनापूर्वत्वात्तद्धीज्ञानस्याचार्यवान्नित्यादिना फलश्रुतेरनेन जीवेनेत्यर्थवादादथ येऽन्यथेत्या
दिना भेददर्शननिंदनादुपपत्तेश्च मृदादिदृष्टान्तस्य दृष्टत्वात् ॥ बृहदारण्यकेऽपि ब्रह्म वा इदमित्यादावुपक्रमादयमात्मा ब्रह्मेति प
रामर्शात्पूर्णमदः पूर्णमिदमित्युपसंहारात् स एष नेति नेत्यात्मेत्यभ्यासात् सदसंपञ्च ब्रह्मात्मनोऽपूर्वत्वात्तस्मात्तत्सर्वमभ
वदित्यादिफलश्रुतेः स एष इह प्रविष्ट इत्यथ योऽन्यां देवतामित्यादिअर्थवादात् दुन्दुभ्यादिदृष्टान्तोपपत्तेः ऐतरीयके चात्मा वा इदमे

आनंद०

२९

क एवेत्युपक्रम्य स एतमेव पुरुषं ब्रह्म ततममपश्यदिति परामर्शप्रज्ञानं ब्रह्मेत्युपसंहाराद्धार्थयोश्चकस्मिन्नुभयवोश्चि ज्ञातेस
र्वमिदं विज्ञातमित्युपक्रम्य ब्रह्मवेदमिति निगमनात्सैत्तिरीये च ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहा
यामित्युपक्रम्य स यश्चायं पुरुषे यश्चासावादित्ये स एक इति परामर्शादानंदो ब्रह्मेति व्यजानादित्युपसंहारात्स्वे व ब्रह्मात्मनो
व्यासात्सदर्वतास्यास्या त् सोश्नुते सर्वान्कामानानंदं ब्रह्मणो विद्वान्न बिभेतीत्यादिना फलाभिलापाच्च दात्मानं स्वयमकुरुते
त्यर्थवादात् कोह्येवान्यादित्याद्युपपत्तेरेकत्वे वेदान्तानामेकान्तेन तात्पर्यमवधार्यते तथा चासुक्ता तेषां स्वार्थे तात्पर्यं न्यावक
तासंपदादिपरत्वे तिन्यावः॥ किंच ज्ञानस्य ज्ञानध्वस्तिफलत्वश्रुतेर्न संपदादिरूपमेकज्ञानमित्याह भिद्यत इति॥ हृदयमन्तः
करणं तस्य ग्रंथी रागादिः सतस्मिन् दृष्टे भिद्यते विदीर्यते सर्वे च संशयाः संसारहेतवश्छिद्यन्ते नश्यंतीत्यर्थः॥ आदिशब्दा
त्तरति शोकमात्मविदित्यादि गृह्यते॥ तेषां तात्पर्यमाहाविधेति॥ संपदादिज्ञानस्याप्रमात्वादज्ञानानिवर्तकत्वादित्यर्थः॥ ब्र
ह्मविद्यार्थत्वाः ब्रह्मावगमलक्षणं तेनापि तत्संपदादिरूपत्वे त्वाह ब्रह्मेति॥ आदिपदं ब्रह्मविदाप्नोतीत्यादि ग्रहार्थं तु तेषा
तात्पर्यमाह तद्भावेति॥ आत्मनो वस्तुनो भिन्नस्याब्रह्मत्वादन्यस्य च्छित्तस्यापरस्य चान्ब्रह्मासि संपदादिपक्षे तद्भा
व वाक्यानामनुरवार्थतेत्यर्थः॥ उक्तेहेतुः सिद्धेति निगमयति तस्मादिति॥ भ्रमितित्वं भ्रमध्वस्तिस्तद्भावापत्तिफलत्वं
चच्छब्दार्थः॥ संपदादिरूपत्वाभावेपि कथमविधेयत्वं तत्राह तदिति॥ तदतंत्रत्वे नित्यत्वमाशंक्याह किं तर्हीति॥ तस्याः वस्तु
तंत्रत्वे फलितमाह एवमिति॥ कृतस्या द्वयज्ञस्य सञ्चातया सिद्धि तस्येत्यर्थः॥ फलितमाध्यस्यैव नियोगविषयत्वाद्ब्रह्मणस्तज्ज्ञा
नस्य वा तदसाध्यत्वादित्यर्थः॥ कथमवेर्धब्रह्मवैफल्याद्कारकत्वाद्वा॥ नाद्यो मुक्तिफलत्वेनेतरो ब्रह्मणः कर्मत्वादित्याशं
क्य विदिक्रियायामुपासिक्रियायां वा तस्य कर्मतेति विकल्प्याद्यं दूषयति नचेति॥ तद्ब्रह्म विदितात् कार्यादन्यदेवाथोऽका
रणादोऽप्यविदितादप्युपरिष्टादन्यदित्यर्थः॥ येन प्रमात्रेदं सर्वं वस्तु लोको जानाति तं केन करणेन जानीयात् करणस्यैतद्विषय २९
विषयत्वात्॥ तात्पर्यमवक्ते स्तन्न ज्ञाता ज्ञेय॥ किमुक्तं हीत्यर्थः॥ द्वितीयं प्रत्याह तमेवेति॥ यद्वाचानभ्युदितं येन वागभ्युद्यत
इत्यविषयत्वमुक्तात् देवेति मात्रत्वादिकल्पनामपोह्य त्वमेतं ब्रह्म महत्तममिति त्वं विद्धि यदुपाधिविशिष्टं देवदेवता

दीदमित्युपासते जनाः॥ नेदं तत्त्वं ब्रह्माविधेयं दीत्यर्थः॥ शास्त्रोक्तज्ञानाविषयत्वे ब्रह्मणि प्रमाण्यप्रतिज्ञाहानिरिति चोदयति म
अविषयत्व इति॥ शास्त्रीयज्ञानाधीनस्फुरणवत्त्वरूपकर्मत्वाभावेप्यविद्याध्वस्तिशयवत्त्वाद्ब्रह्मणः शास्त्रीयत्वान्न प्र
तिज्ञाहानिरित्याह नेति॥ शास्त्रीयधीकृताऽविद्याध्वस्तिमत्वेऽनन्तकृतस्फुरणवत्त्वमपि घटादिवदित्याशंक्य तदेवंधीवि
षयत्वापत्तेस्तेन्मैवमित्याह नहीति॥ तर्हीदं त्वत्पक्षेऽविषयत्वादविद्याध्वस्तिमत्वमपि प्रत्यग्वन्नास्तीति नास्य शास्त्रीयते॥
त्याशंक्याह प्रमादिसाक्षिमात्रत्वेन ब्रह्म ब्रह्मास्मीति बुद्ध्यावाविर्भावयदविद्यामपनयति शास्त्रमिति तत्प्रामाण्यमित्याह किं
तर्हीति॥ तथापि कथमवगम्यं ब्रह्म प्रतिपाद्यं वेदान्तैरित्याशंक्याह वेदेति॥ तत्र श्रुतीरुदाहरति तथा चेति॥ यस्य ब्रह्मा म
तमविषय इति निश्चयस्तस्य तन्मतं सम्यक् ज्ञातं॥ यस्य तु मतं विषयतया ज्ञातं ब्रह्मेति धीर्नासौ तद्वेद न्नेदधीनत्वादेवमेवे
ति नियमार्थमुक्तो विदद्विदस्त्वानुवदति अविज्ञातमिति॥ विषयत्वेनाज्ञातमेव सम्यग्ज्ञातं जानतां ज्ञातमेव विषयतया
यथावदज्ञातमित्यर्थः॥ दृष्टेश्चक्षुर्जन्यायाः कर्मभूतायाः दृष्टारं स्वभावभूतया नित्यदृष्ट्या व्याप्तारं दृश्यया तया दृष्ट्या न
पश्येर्विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तयैव वेद्य॥ याविज्ञाऽदस्यान विजानीयादिति॥ श्रुत्यंतरमाह नदृष्टेरिति
आदिपदेनान्यदृश्येऽनात्मेयत्त्वपदेशमित्यादि गृहीतं॥ ननु यद्येकधीशास्त्रोत्थास्फूर्तिमनुत्पाद्य विद्याबाधयात तत्कथं तथाप
पि बाधितां ब्रह्मात्मप्रमेयेस्य नाविकापरोक्षव्यंजने न निवर्तकं तथा स्थिते तिब्रह्मणि शास्त्रं प्रमाणं॥ तर्हि ध्वस्ताविद्यातत्क
ब्रह्मरूपस्याग्रं तुकत्वान्नतदा मुक्तेर्नित्यत्वे त्वाशंक्याहत इति॥ शास्त्रोक्तज्ञानादित्ति यावत्॥ स्वपक्षे ब्रह्मणः शास्त्रीय
त्वं मोक्षस्य नित्यत्वं चोक्त्वा परपक्षे तदनित्यत्वं वक्तुं तस्योत्पाद्यत्वं विकार्यत्वं प्राप्यत्वं संस्कार्यत्वं चेति विकल्प्य कल्प्यद्वये
कार्यानुप्रवेशमंगीकरोति यस्येति॥ तयेति मुक्तेर्विकार्यत्वे सत्युत्पाद्यत्ववत् कार्यापेक्षायुक्तेत्यर्थः॥ तर्हि कार्यानुप्रवेशाया
स्य तदपरिग्रहः स्यादित्याशंक्याह तयोरिति॥ तदेव व्यतिरेकेण व्यनक्ति नहीति॥ अनित्यत्वनिवृत्तये पूर्वसिद्धस्यैव ब्र
ह्मणो व्याप्त्यादि वाप्यते इति तृतीयमाशंक्याह नचेति॥ ब्रह्मप्रत्यगन्यद्वाप्यं प्राप्यं हस्त्यादिना तेनेति॥ द्वितीयेपि ब्रह्म सर्वगतं प
रिच्छिन्नत्वेऽपि ब्रह्मणः संयोगाख्यात त्वाप्तिरनित्यत्वादयुक्ता॥ तारतम्यतत्क्रमाय निरस्त॥ पक्षान्तरं निराहेह नापीति

तदभावं वक्तुं संस्कारद्वैविध्यमाह संस्कारो हीति। वकारश्चकारश्च सिद्धार्थौ निपातौ। गुणाधानेन मुक्तेर्न संस्कार्यत्वेत्याह॥
आनं ८० नेति। दोषनिरासेनापि न तस्याः संस्कार्यत्वमित्याह नापीति। आगन्तुकगुणदोषयोरभावेपि नैसर्गिकाविद्यादोषात्तन्निरस्या
मुक्तेः॥ संस्कार्यत्वेति शंकते स्यान्मतिरिति॥ वस्तुतत्त्वं स्यात्मैव प्रतीत्याधर्म्ये सन्निति यावत्। स्वाभाविकस्यापि तिरस्कृतस्य कि
२८ यातोभिव्यक्तौ दृष्टान्तमाह यथेति। किमात्मा स्वाश्रयक्रियया पादेयापन्नुत्वा संस्क्रियते किं वान्याश्रयक्रिययेति विकल्प्याद्यं नि
रस्यति नेति॥ आत्मनोऽसंगत्वान्न क्रियाश्रयत्वयोग्यतेत्युक्तं। क्रियायाश्चाश्रयत्वमविकृतां तद्योग्यत्वादित्याशंक्याह। यदाश्रयेति।
आत्मनोपि विकारित्वमाशंक्याह यदीति। न केवलमात्मनो विकारित्वे युक्तिविरोधोपि त्वागमविरोधोपीत्याह। अविकार्य इति।
निष्कलं निष्क्रियमित्यादिश्रुतिसमुच्चयार्थः। अकरो न जायते म्रियते वेत्यादिश्रुतिस्मृतिसंग्रहार्थमादिपदं। तद्धि त्वागमबा
धनमनिष्टं चेदिकारान्निति विशेषः॥ आपद्यते योगं निगमयति तस्मान्नेति। द्वितीयं निराह नेति। क्रियायाः स्वाश्रयेतद्युक्तेवाऽ
न्याश्रयहेतुत्वादसंगस्यात्मनस्तदाश्रयबुद्ध्याध्यासेऽपि न तन्निष्ठक्रिया संस्कारमात्मन्याधत्तुमलमित्यर्थः॥ नान्याश्रया
क्रियात्मसंस्कारेति स्वस्य व्यभिचारं शंकते नन्विति। आदिपदं संध्यावंदनादिसंग्रहार्थं॥ आत्मनो देहाद्यतिरिक्तस्यापि देहा
दिष्वविषया ध्यासात्तदभिन्नस्यैव तत्क्रियया संस्कार्यत्वान्न व्यभिचार इत्याह नदेहेति। देहाश्रयक्रियया देहसंहतस्य
तदभिन्नस्यात्मनः संस्क्रियमाणत्वमुक्त्वा स्नानाचमनादिक्रियाया देहाश्रयत्वे मानमाह। प्रत्यक्षं हीति। असंहतात्मस्थ
क्रियया तस्यैव संस्कार्यत्वं किं न स्यादित्याशंक्याध्यक्षविरोधमाह तयेति। कश्चिद्देहनिर्वर्त्य विशेषमामुष्मिकफलो
पतोगश्च क्रमस्तीत्येवं प्रतिपन्नं निर्दिशति। इदानींतनोऽकस्मादुपयांति यथेत्यादिना विधाय ग्रहीतस्यैत्यविधया मनुष्योऽह २८
मिति मिथ्याज्ञानदृष्टस्यैत्यर्थः। देहेन संहतिफलं तदभिमानित्व इत्युक्तमारोग्यमपि कस्माद्देहसंहतात्मगतं किं न स्यादि
त्याशंक्यानुभवविरोधादित्याहमिति। संस्कारफलं शरुद्धमस्तु तात्मनो यथोक्तबुद्धिमनोऽसंहतत्वमनुभवेन वारयति
सच्चेति। कथं तर्हि स्नानादिर्नां कर्तुः संस्कारत्वप्रसिद्धिरित्याशंक्य संहतस्यैव कर्तृत्वादित्याह तेनेति। यत्तेहमितिक

र्तृत्वमनुभवितुरपि तुल्यमित्याशंक्याह अहंप्रत्ययेति। अनुभवितुर्नित्यप्रकाशस्य न तत्। विषयते त्यर्थः। न केवलमस्या
हंधीमात्रेकर्तृत्वं किं तु धीमात्र इत्याह अत्यपिनेति। आत्मनो भोक्तुरेव कर्तृत्वं भोक्तृभोगाभावादित्याशंक्याह तत्फलं चेति
संहतस्य भोक्तृत्वे मानमाह तयोरिति। जीवपरयोर्मध्ये जीवो नाना रसं कर्म्मफलं भुंक्ते। असंहतस्याभोक्तृत्वे मानमाह
नश्नन्निति। परमात्मा स्वयमभुंजान एव पश्यन्नवर्त्तते। संहतस्य भोक्तृत्वे वाक्यान्तरमाह आत्मेति। आत्मीयं शरीरमात्मा
देहादिसंयुक्तमात्मानमित्यर्थः। यदा आत्मा भोक्तेत्याहुरिति संबंधः। इंद्रियैरित्यादिक्रियाविशेषणं निर्गुणत्वान्निर्दोष
त्वाच्च ब्रह्मात्मनि विधिधारासंस्कारो नेत्युक्तं। इदानीं तस्मिन्गुणदोषयोरभावे मानमाह तथा चेति। मन्त्रश्चायात्मनेद्वै
त्माह एक इति॥ यथाहुः हृदि स्थितानां विना कीर्तिनकुर्धिको पिगीयत इति। अखण्डज्ञानं व्यावर्त्तयति देव इति। आदित्यादिवै
लक्षण्यमाह सर्वेति। तर्हि किमिति सर्वैर्न भानाभिगृह्य इति। तर्हि तत्सद्भावच्छिन्नत्वेनपरिच्छिन्नत्वं नेत्याह सर्वव्यापीति।
न जीववत्तादस्थ्यं वारयति सर्वभूतेति। सर्वेषु भूतेषु पृथक्स्थितस्य तत्तत्क्रियाकर्तृत्वं शंकित्वोक्तं कर्मेति। सर्वभूतेषु धि
त्यादिना भूतानां पृथग्युक्तेः सन्निहितो यत्वेतत्वाह सर्वेति। सर्वेषां भूतानामधिवासोधिष्ठानं न चाकल्पितमधिष्ठानाद्भिन्नमन्त
रमित्यर्थः। न परं कर्मणामेवाध्यक्षः अपितु तद्रतामपीत्याह साक्षीति। तच्चैतन्यस्वाभाव्यहेतुमाह चेतेति। केवलो द
श्यवर्जितो द्वितीयः। निर्गुणः ज्ञानादिगुणरहितः। चकारो दोषाभावसमुच्चयार्थः। ब्रह्मात्मनि दोषाभावे मन्त्रा
न्तरमाह स इति। स ब्रह्मतोऽयस्तु सर्वाणि भूतानीत्यादि वाक्यापरितः समन्तादगात् सर्वगतं शुक्रमित्यादिशब्दः। शु
क्लिंगत्वेन नेत्यासः इत्युपक्रमात् कविर्मनीषीत्यादिना च पुल्लिंगत्वेनोपसंहारात् शक्रो दीप्तिमान् अकायो लिंगदे
हहीनः अव्रणोऽक्षतः अस्नाविरः सिरारहितः ताभ्यां स्थूलदेहासत्त्वमुक्तं। शुद्धो रागादिशून्यः। अपापविद्धो धर्माध
र्म्मविधुरः। मन्त्रयोस्तात्पर्यमाह एतावतीति। तथापि मोक्षस्य किमायातं तदाह ब्रह्मेति। मुक्तिब्रह्मणोरैक्यात्तत्र दोषा
द्यभावात् न तस्याः संस्कार्यत्वमुपसंहरति तस्मादिति। उत्पाद्यादिद्वयान्तार्थो पि शब्दः। मुक्तेरुक्तत्वादिचतुष्टयं
क्रियानुप्रवेशद्वारं मा भूत् तर्हि चतुर्ध्या किंचिद्भूता निष्पत्तिर्यस्मानावान्नेत्याशंक्यात इति। उक्तत्वादिचतुष्टयमतः शब्दार्थः

आनं ६० तस्या लोकवेदप्रसिद्धत्वादित्यर्थः॥ मोक्षे क्रियाया अननुप्रवेशे तद्दर्शे प्रवृत्त्यानर्थक्यमित्याशंक्य ज्ञानार्थत्वान्नैवमित्याह तस्मा
दिति। क्रियाननुप्रवेशद्वाराभावस्तच्छब्दार्थः॥ उपास्तेरपि मोक्षसाधनत्वे दोषो नेति वक्तुं धर्मात्रेत्युक्तं। बाह्यक्रियाया
२९ स्तत्राप्रवेशे केमुतिकन्यायार्थो विशब्दः। मोक्षे ज्ञानप्रवेशे तस्य क्रियात्वादन्यस्यैव तदनुप्रवेशस्तत्रेति शंकते नन्विति। तस्य
मानसव्यापारत्वे लिंगं विधेयक्रियाधर्मत्वं॥ ततो जन्यफलादजन्यफलत्वेन विशेषादित्याह नेति। विधक्रियायत्वे ध्यासा
ध्यासज्ञानं न तत्पेक्षत्वपरं विशेषमाह क्रिया हीति। यत्र विषये यावस्त्वनपेक्षा चोद्यते तत्र सा क्रिया नामेति योजना क्रिया
तत्स्वरूपप्रसिद्ध्यर्थौ निपातौ॥ वस्तुचेत् चकारणं किं तत्राहित्याह पुरुषेति॥ वस्त्वनपेक्षा पुंतंत्रा च क्रियेत्यत्र दृष्टान्तद्व
यमाह यथेति। गृहीतमध्वर्युणेति शेषः। वषट्करिष्यन्निति होतोक्तः॥ संध्यां तदभिमानिनीं देवतामित्यर्थः॥ ना
मब्रह्मेत्युपास्त इत्यादिग्रहार्थमादिपदं। एवमादिषु वाक्येषु वस्त्वनपेक्षं पुंतंत्रं च ध्यानं विधीयते तथा क्रियान्त
रमपीत्यर्थः॥ ननु मानसत्वाविशेषाद्ध्यानमपि ज्ञानमेवेति नास्य क्रियात्वं तत्राह ध्यानमिति। ज्ञानस्यापि पु
ष्यपुंतंत्रत्वं तदाश्रयत्वात्तत्राह ज्ञानं त्विति॥ प्रमाया द्वारा तस्य पुंतंत्रत्वमाशंक्याह प्रमाणं चेति। ज्ञानस्यापुंतंत्रत्वे
फलितमाह तस्मादिति॥ तर्हि ज्ञानस्य नित्यत्वं नेत्याह केवलेति। विशेषणाच्छलमाह नेति। एवकारव्यावर्त्यमाह नापी
ति। ज्ञानध्यानयोर्मानसक्रियात्वे पि गोबलीवर्द्दवद्भेदमत्वा विशेषं न गमयति तस्मादिति। तच्छब्दार्थं पुंतंत्रत्वं
ध्यानस्य वस्त्वनपेक्षत्वे दृष्टान्तावुक्तौ तस्य तद्विरोधित्वे दृष्टान्तौ च चोदयत्याचेति। साग्निधीर्मनिसत्वात्ज्ञानमेवे
त्याशंक्याह। केवलेति। न ज्ञानमिति। तुशब्दार्थः॥ वस्त्वनधीनत्वं केवलमेव कारो योगव्यवच्छेदकः॥ उक्तं बुद्धेरुक्त
क्रियात्वनियमे हेत्वंतरमाह पुरुषेति॥ यथैतौ दृष्टान्तौ तथा क्रियान्तरमपीति पर्यायशब्दो नेयः॥ ज्ञानमपि योषि
दाद्यग्निधीतुल्यमिति नेत्याह यात्विति॥ तस्यास्तर्हि किं कारणं तदाह किं तर्हीति। प्रकृतदृष्टान्तमपेक्ष्य प्रत्यक्ष २९
विषयपदं॥ तेनन्यक्रमेण वेद्यम्यं प्रैषक्रियाधियोरित्याहेति ज्ञानमिति। अध्यासाधियो पर्जन्यत्वयातत्रं त्वपि
शब्दोद्यर्थधियस्तत्कल्पात् चोदनादिजन्यत्वात् शंक्यराहैवमिति। अनुमानादप्रत्यक्षजन्यत्वे पि लिंगादिजन्यत्वा

न्नचोदनापेक्षेति भावः। लौकिकधियश्चोदनाद्यनपेक्षत्वे पि ब्रह्मधीरलौकिकत्वात्तदपेक्षेत्याशंक्याह दृष्टांतेति केलि
गमयति तत्रेति। दर्शितानीत्यासम्यग्ज्ञानेन वस्तुमात्रतंत्रे सतीति यावत्। यथाभूततत्त्वं संदेहरूप्ये विधिक्रियान्तोवेशो
ष्योक्त्या ज्ञानस्याविधेयत्वमुक्तं तत्र ज्ञाने लिंङादिश्रुत्या दृष्टविधेस्तत्कानिरस्यत्वादित्याशंक्याह तद्विषयइति। तद्दे
वज्ञानं विषयस्तत्र यद्यपि लिङादयः श्रुतास्तथापि स्तुत्यर्थवादतया विस्मरूपांशुयश्चैवमित्यादिवदवतिष्ठन्ते अ
निबोज्यमपुंतंत्रतया नियोगानर्हे नियोज्येन वाहितं ज्ञानं॥ तद्विषयत्वात्तेषामविधायकत्वादित्यर्थः॥ कुंठी
भावे दृष्टांतमाह उपलादिष्विति। विधेयज्ञानस्य कर्मणि ब्रह्मण्यतिशयाजनकत्वाच्च न विधेयतेत्याह हेयेति। अनु
पादेयानुपादानोरभावाद्विधयभावेस्तु तेरपि तद्पेक्षत्वेनासंभवाद्विधिशब्दवैयर्थ्यमिति शंकते किमर्थानीति। यो
ऽपि ज्ञान्यः सआत्मेति तत्प्रतिपादकानि तानीत्याशंक्याह विधीति। तेषामनर्थत्वं वक्तुं बुधाभावः। समाधत्ते स्वाभा
विकेति। संगृहीतं विस्तजते योहीति॥ बाहिर्मुख्यं शब्दादिप्रवणत्वं पुमर्थमुद्दिश्य प्रवृत्तः श्रुत्वा किमिति परावर्त्य
ते श्रुतेरनर्थकत्वापातात्तत्राह नचेति। बाध्योऽर्थः स प्रत्यर्थः किमिति तर्हि श्रुतिः सर्वानपि पुरुषान्नानुसरति
तत्राह तमिति। अन्येदृह्यप्रवृत्तितदात्मनो विषयप्रवृत्तिरपि निरोद्धुमशक्येत्याशंक्याह कार्येति। आत्मधियो ना
त्मदर्शने सत्यपि संभवात् किमिति तन्नाशो विमुखीकरणं तत्राह प्रत्यगिति। तत्र चेतसः स्रोतस्तदभिमुख्यं
तद्भावनेति यावत्। तस्य त्वनात्मत्यदर्शिनेत्यत्र वयास्य चेतसोन्यप्रत्यगाभिमुख्यमित्यनात्मधीनिरासेन फलभ
तात्मदृष्टिस्तावकतया तदभिमुख्या यान्वयव्यतिरेकसिद्धा एवं श्रवणादयो विधिसरूपैर्वाक्यैरन्तेऽवधंत्ते
तेन विधिकार्यलेशलाभाद्विधिच्छायान्येतानि विधयइत्यर्थः॥ अस्तु वा मुमुक्षुप्रवृत्त्यैर्वै विधित्वाय वाक्येनैव श्रवणा
दिविधिस्तथापि वस्तुनो विध्ययोग्यत्वान्न तज्ज्ञाने विधिरित्याह तस्येति। यदिदं ब्रह्मेत्यादि तत्सर्वमात्मैवेति
बाधया सामानाधिकरण्याद्वैताभावात्तात्मनोऽद्वितीयत्वेन पूर्णत्वोक्तेर्न तत्र हेयत्वमादेयत्वं वा इत्याह। इद
मिति। अविद्यादशायामात्मनः सद्वितीयतया हेयत्वादिसिद्धिमाशंक्यांगी कुर्वन्नविद्यावस्थायामात्मातिरिक्त

क्रियाधिकाराभावाद्धेयत्वादीत्याह यत्रेति॥ न केवलं विधानस्यायमेवात्मनिष्ठात्रादिविभागाभावः। किन्तु वस्त्वन्तरेऽपी
आनं १० त्याह विज्ञातारमिति॥ आत्मनः स्वविषयत्वेऽपि त्वाकार्येऽपि अप्रत्तिं तद्भावाद्देयतानत्वस्यादित्याशंक्याह यमिति
आदिशब्दात् आत्मतत्त्ववादिसर्वथाप्यसंग्रहार्थः॥ प्रतिपत्तिविधिविशेषणतयेव ब्रह्मशास्त्रीयमित्येतन्निराकृत्य तत्रै
३० व सूचितं पूर्वपक्षमनुवदति यदपीति॥ आत्मज्ञोऽज्ञाचार्यानुपायत्वं विफलत्वं वा तत्राबमंगीकरोति तद्येति। द्वितीयं दूषयति
अलंकार्योऽहीति॥ ब्रह्मात्मावगते रुक्तफलत्वेमानं हि शब्दस्य च्चि तमाह तथा चेति॥ अयं परमात्माहमस्मीत्यपरोक्ष।
तयाय दिकश्चित्पुरुषो जानीयाद्यात्मसाक्षात्कारदोर्लभ्यद्योतीत्येवं सत्यातिरिक्तमात्मनः किं फलमिच्छन् कस्य वाऽऽ
आदि फलायतदलान्ते नशरीरं तप्यमानमनुतप्यत्पाधिसंज्वरेत्प्येतन्निरूपाध्यात्मविदो नान्यद्स्ति फलं नाप्यन्य:
पुत्रादिरित्यादेषः तत्रैवश्रुतिमाह तथा चेति॥ अयं परमात्माऽहमेतदिति॥ गुह्यतमं शास्त्रमेतत्तस्य बुद्धिरर्थतो ज्ञानं॥ विधि
शेषत्वेन ब्रह्मणो न शास्त्रगम्यत्वमुक्तमुपसंहरति। तस्मादिति॥ ज्ञानस्य विधेयत्वाभावस्तथापि फलवत्वं च तच्छब्दार्थः॥
प्रमाणाभारूपधीमात्र विषयः प्रतिपत्तिशब्दस्तद्विधिविषयतयेति। पूर्ववत् प्रपादिद्दसं तेन विविशेषत यात्र ल
णः शास्त्रगम्यत्वमुक्तं निरस्य प्रवृत्तिनिवृत्त्यादावुक्तमनुज्ञापतेयदपीति॥ किं वस्त्वेव नास्ति वेद्यं तत्त्वेधं तस्याप्रसि
द्धत्वात्तदुद्दिश्यप्रतिपादनायोगादतो तस्य क्रियाशेषत्वेति विकल्प्य दूषयति तन्नेति औपनिषदस्य पुरुषस्येत्यादावनि
रस्तं सूचितं प्रपंचयति योऽसाविति॥ तस्यापि तिचेतन्यात्कर्तृत्वेन क्रियाशेषत्वमाशंक्यानन्यशेषत्वादिति द्वि
तीयं निरासमुक्तं विवृणोति। असंसारीति॥ तत्प्रपूर्णत्वां हेतुमाह ब्रह्मेति॥ कर्तृत्वेनानन्यशेपि क्रियायामात्मा कर्मत्वे
नान्यशेषणतीत्याशंक्याहोत्पाद्यादीति॥ विनियोजकमानाभावादपि नान्यशेषत्वं प्रकरणवाक्यं वाक्यबाधाद्दिहाह स्व ३०
प्रकरणस्थो [illegible] तिपर्यन्तावदावक्तं विनियोजकमिति॥ द्वितीयं दूषयति अनन्येति॥ आत्मनो [illegible] बद्धव्यमि
चरितकर्तुसंबंधसाभावादित्यर्थः॥ पद्मद्वयनिरासं निगमयति नासाविति॥ तस्य न क्रियाशेषत्वमपीति विव
क्षितं वेदान्तवेद्यस्य वस्तुनो निरास्या योगे हेतुं तारमाह स एष इति यः स्वच्छो [illegible] तआदेशोनेति नेती

ति विश्वद्दश्य निषेधेनोक्तः स एष पंचमे पिनिरूप्यते तत्र वस्तुन्यात्मशब्दात् तस्य चात्मत्वादेवानिराकार्यत्वात् तत्कर्तु
रेवात्मत्वात्। एवं तस्योद्दिश्यप्रतिपाद्यत्वमपि सिद्ध्यतीत्यर्थः॥ औपनिषदत्वं पुरुषस्याप्रत्यग्न्याशंकते नन्विति॥ अहंधी
विषयत्वं दूषयन् विशेषणं समर्थयते नेत्यादिना॥ संस्कार्यत्व निरासे साक्षी चेतेति मंत्रेणात्मनः सर्वसाक्षित्वमुक्तं ते
नाहंधीविषयत्वस्य प्रत्युक्तत्वाद्विरुद्धं सोपनिषदत्वमित्यर्थः॥ तथापि कर्मकाण्डे तर्कशास्त्रे च सिद्धत्वान्न तस्यो
पनिषदत्वं तत्राह। नहीति॥ न साक्षीति विधिकाण्डागम्यत्वोक्तेः बोद्धसिद्धान्ते नधिगतिमाह सर्वेति। सर्वे हि नश्य
त्सु भन्ते बुद्धिते न नश्यतीत्यर्थः॥ नैयायिकादिमते तदनधिगतिमाह सम इति॥ निर्विशेष इत्यर्थः॥ सांख्यसमयसिद्धत्व
त्वं निरस्य लौक इति चेत्तन्नान्तरशून्यत्वापेक्षेन तत्प्रपंचादिमते प्रसिद्धिं प्रत्याह॥ कूटस्थेति॥ कोऽदस्थ्येकार्यं कारणत्व
न्तत्राह। सर्वस्येति। सर्वाधिष्ठान रज्जोरिव त्रलणेऽपि दे ताधिष्ठानत्वात् कारणत्वमाविधकमिति नाव। अन्यतो न धिग
तो दुर्जितमाहात्मइति तातेद्दिबाध्यो नान्यथेत्यर्थः॥ विधिकाण्डानधिगतिफलमाह विधीति॥ तन्नन्च हेतुं तरमाह
तत्त्वादिति॥ आत्मा सर्वशेषीत्वान्नान्यशेषः सकथं विधिशेषः स्यादित्यर्थः॥ विधिकाण्डात्ततत्व मुक्तं समुच्चित्वं च शब्दः
किंच हेयोपादेयविषयो विधिनिषेधो नात्म निर्विपरीतस्यात्ममित्याहनेति॥ तस्यापि संसारिणोऽनाशित्याऽऽत्य
त्वमाशंक्योक्तं सर्वं हीति॥ निरवधिकनाशासिद्धेरित्यर्थः॥ संसारस्यैव नाशो न पुरुषस्येति तिवक्तुं विकारजातमित्यु
क्तं घटादेर्मृदादेर्नाशात् कथं पुरुषावधिः सर्वस्य नाशोऽस्तत्राह पुरुष इति॥ कल्पितस्यानधिष्ठानत्वात् पुरुषा
निस्सत्त्वनावस्तदधिष्ठानत्वेन विश्वोदयव्ययहेतुरित्यर्थः॥ पुरुषस्य परिणामित्वात्परिणामोदयव्यया।
भ्यां हानादानेस्तामित्याशंक्याह विक्रियेति। सावयवत्वादिरस्त्येतु रशुद्धत्वादित्यागेन शुद्धत्वादेशदेयत्वं शंकित्वा
हात्त इति॥ आत्मनि स्वतो धर्मिता स्वानन्यत्वात्यमतः शब्दार्थः॥ पुरुषावधिर्नाशः सर्वस्येत्यत्र श्रुतिमाह तस्मादि
ति॥ कल्पितस्याकल्पितमधिष्ठानमित्युक्तयुक्तिपरामर्शीतच्छब्दः॥ यथेन्द्रियादिभ्यो नैवं पुरुषादस्ति किंचित्परं सा

पुरुषार्थत्वाकांक्षायां समलमहत्वादेरवधिः सैव परागतिः। परमपुरुषार्थ इत्यर्थः॥ निरतिशयस्वतंत्रतया विध्यशेषत्वेऽश्रुतिरुक्ता
ओं॰नंद॰ मानान्तरागम्यतया वेदैकवेद्यत्वेऽश्रुतिमाहुः तं त्वेति। यस्त्वदुक्तः स विशेषप्रलग्नं पृथिव्येवयस्यायतनमित्युपक्रम्योक्त
मधिष्ठानं तमौपनिषदमुपनिषद्भिरेव वेद्यं तं त्वौपनिषदं पुरुषं पृच्छामि हे शाकल्येति याज्ञवल्क्य॰ प्रश्नः। विशेषणा
३२ भिप्रायं विवृणोति औपनिषदत्वेति। औपनिषदत्वे ऽनन्यशेषत्वे चात्मनः सिद्धे परस्य प्रतिज्ञा निर्व्यू
ढा भवतीति॥ तथाहि त्वादौ वेदानामानर्थक्यत्वमभियुक्तोक्ति विरुद्धमित्युक्तमनुवदति यदपीति। तस्मान्न विषयत्वं
व ऽनन्यपरत्वाविरोधित्वमाह तत्कर्मेति। इत्यादि तस्यार्थः फलवदर्थावबोधनमिति वक्तव्ये धर्मजिज्ञासाप्रक्रमा
द्धर्मकर्मणो ऽश्चैक्याद्युक्तं कर्मावबोधनं तद्विधिनिषेधविवक्षयोक्तं॥ यत्तु चोदनासूत्रे चोदनापदव्याख्यानं तदन्यत्ति
कृत्वं। प्रदर्शमात्रकथनात् परिहीसूत्रप्रमुखमपि सूत्रजातं पूर्वसूत्रार्थोपात्त तत्र श्लिष्टं प्रसङ्गक्रमवशात् कर्म॥ का
र्यार्थमेवातो बलबोधनमपि वेदस्यैकदेशस्य फलितमित्युपनिर्दिशदर्थवित्तेत्यर्थः॥ अर्थवादाधिकरणविरोधं वि
धान्तरेण निरस्यत्यपि चेति॥ तत्र खल्वक्रियार्थत्वेऽसत्यार्थकं भूतोपदेशविशेषस्य वा तन्मात्रस्य वा तत्राद्यमुपेत्य द्वि
तीयं प्रत्याहाम्नायस्येति॥ वषट्कर्तुः प्रथमभक्षो देवदत्तो भुंक्ते निर्वर्त्त इत्यादिभूतोपदेशस्य संबन्धयोग्यताया विभ
क्तिसु तत्स्य द्रव्यादिवाचिनः साक्षात्कार्यार्थता भावात्फलवदर्थत्वादित्यं॥ अतो विशेषात् कार्योपदेशस्यापि तत्प्रस
क्तिरित्यर्थः॥ उक्तं भूतोपदेशेऽपि कर्त्राद्युपदेशधर्मद्वारात् कार्यशेषत्वं तथा फलवदर्थत्वसिद्धिरिति शंकते ३२
धप्रवृत्तीति। तस्मात् ध्यानातिरेकेणाभूतम पि द्रव्यादि वस्तु वषट्कर्तुरित्यादिवाक्यम ध्यानकार्यशेषत्वे तेनापि दर्भि
धातिभूतमप्याम्नायस्य इतो भूतोपदेशस्यार्थवत्वान्नातिप्रसक्तिरित्यर्थः॥ कार्यान्वितस्वार्थाभिधानेऽपि योग्या
न्विताभिधानात्तेनैव कार्यस्य स्वरूपदेशोऽपि स्यादित्याह। कूटस्थेति॥ ननु नतादृशमस्ति वस्तु सर्वं स्यात् प्रदिश्यमान
मूतस्य कार्यस्पर्शित्वात् कार्यतात्त्राह नहीति। क्रियाकार्यभूतस्य तत्संसर्गित्वादात्मं फलफलिभावो वा नाधः क्रि

क्रियाः द्वारा हेतुहेतुमद्भावाभ्युपगमात् द्वितीयेऽपि न तयोरैक्यं फलफलित्वस्य भेदकत्वादित्यर्थः॥ भूतस्याकार्यत्वे
ऽपि तद्धेतुत्वात्तच्छेषत्वात्तदुपदेशोऽपि तच्छेष एवेति गमनप्रेत्याहावाद्यस्तु त्यक्तः कार्यान्वितविषयत्वात् अतो न कूट
स्थोपदेशोऽस्तीति चोदयति। अक्रियाईत्वेऽपीति। कार्यस्य कार्यान्तरात् कार्यपदस्य तदन्विता र्थवाचित्वाद्योग्येतरान्वय
स्यैव सर्वपद शक्ति विषयत्वात् पुत्रजन्मादिवाक्येवा ध्यमुस्येतरकार्यार्थापि इष्ट नर्तोक्तेएकार्यार्थत्वात्कूटस्थोक्तिः
स्यादित्याह। नैष इति॥ उक्तनीत्या भूतोक्तेर्न्नकार्यार्थत्वमस्तु वा तत्रापेक्षात्वार्थस्तु तु क्तेस्तादर्थ्यात् तथापि यत्कार्य
निर्वर्त्तनशक्तिमद्भूतं तदुक्तमेवम नचतत्कार्यं तद्धेतुत्वात्तस्य कार्यान्वयेऽपि न तदन्वयित्वं वाच्यम् निमित्तं कार्यस्य त
दन्नावेऽपि वाच्यत्वात्ततो योग्यान्वितद्रव्यादेस्तच्छब्दवाच्यत्ववत्कार्यानन्वितस्यापि वस्तुनो वेद्यत्वार्थतेत्यर्थः॥
तथापि कार्यशेषत्वे नैवान्यत्र भूतोक्तेर्नस्वतंत्र भूतोक्तिरित्याशंक्याह। क्रियार्थत्वमिति॥ भूतोपदेशस्य कार्यशेषत्वं फ
लवत्वाय चंनचतु कार्यस्य वाच्यकोटिनिवेशोस्तीत्यर्थः॥ कार्यार्थत्वेन ॥ स्योक्तार्थत्वं तत्राह यत्रेति॥ तत्र
द्वितस्य ब्रह्मचारिणो व्रतमित्युपक्रम्येयवा चिव्रतशब्दोऽपि प्रमादेकस्मिन्वाक्ये प्रक्रमाधीनत्वादुपसंहरस्य व्याख्यातान्विते
नन ञादृष्टेऽपि निषेधे ननु दृष्ट यत्नादुपेक्ष्यते धात्वर्थयोगे नच पर्युदासो लक्ष्यते तथा चेक्षणविरुद्धा क्रियासामान्येन
प्राप्ता तद्विशेषेण वुभुत्सायां सर्वक्रिया प्रत्यापन्नसंकल्प इत्यवगतमीक्षः इति तु संकल्पो नाद्रियते तत्र सुखं घस विरोधा
तअतोनीक्षणासंकल्पलक्षणापात तद्विधिपरत्वं युक्तं नैवं निषेधे अपवादकस्मस्तीति विरोधि क्रिया लक्षणायाना
नुष्ठाननिष्ठतेत्यर्थः॥ आदिपदं समस्तपर्युदासविषयसंग्रहार्थं॥ हनना द्युधृक परस्थादिपरावर्त्तनस्यात निव
त्तित्वात्तत्प्रावेहननादिप्रागभाव पालनसंजवाद्युक्त निवर्त्तेऽश्वनन्तर्थधीफलत्वात्तदर्थो हननाद्विगतेऽपायत्वाभाव
एवेनिरिष्टत्वे॥ ननु निषेधवाक्यवत् कार्यार्थत्वेऽपि वेदान्तानामर्थवत्वे चेदर्थवादाधिकरणं कथमित्याशंक्याक्रि
यासंनिहितार्थवादादिविषयं तदित्याह तस्मादिति॥ उपनिषद्मुक्तनीत्यार्थवत्वं तद्व्यार्थः। उपाख्यानशब्दः सा
मान्यार्थः आदिशब्दस्तद्विशेषार्थः॥ आम्नायस्याक्रियार्थत्वादिति॥ हेतोस्तद्वलेनाक्रियार्थानामप्रामाण्यपूर्वपक्ष

स्य विधेकवाक्यत्वेन प्रामाण्यं सिद्धांतस्य चोपलक्षणार्थमानर्थक्या भिधानमित्युक्तं सर्वेषामेषामुक्तविषयत्वाविशेषादु
पनिषदामपि पुरुषार्थानवसायित्वाद्दर्थवादाधिकरणविषयते त्याशंक्य पूर्वपक्षोक्तमनुवदति पदपीति॥ तत्रोक्तं परि
हरं स्मारयति॥ तदिति॥ उक्तं वैषम्यं शंकते नन्विति॥ ज्ञानमात्रादूर्ध्वं वासंसारित्वं तत्वसाक्षात्काराद्यावत्राधर्मगोकु
र्वन्नाह॥ अत्रेति॥ द्वितीयं निरस्यति नेत्यादिना॥ तत्परं चपति नहीति॥ शाब्दज्ञानाभ्यासः संस्कृतं चेतो ब्रह्म तत्वसा
क्षात्कारहेतुरिति॥ प्रत्येपति ईतो दुवे देत्यादि पदं॥ तत्वसाक्षात्कारवतो दुःखानुदये दृष्टांतमाह नहीति॥ तस्यैव सांसारि
कसुखानुत्पादे दृष्टान्तमाह नचेति॥ तत्वविदो देहाद्यभिमानहीनस्य संसारिकसर्वधर्मस्पर्शे मानमाह तदुक्तमि
ति॥ जीवतोऽशरीरत्वं ममप्राप्तं बंधेति वद्धृति रुद्धमिति शंकते शरीर इति॥ आत्मनो देहसंगते रविद्यत्वात्तत्वज्ञानेन
ध्वस्ते जीवतोऽपि युक्तमशरीरत्वमित्याह नेत्यादिना॥ तस्याविद्यत्वमन्वयव्यतिरेकाभ्यां साधयति नहीति॥ अशरीरत्व
स्य स्वतस्त्वाद्विजीवतस्तद्विरुद्धमित्याह॥ नित्यमिति॥ आत्मनः शरीरत्वमज्ञानादित्युक्तमसम्यक्त्वात् आशंकते तत्कृते
ति॥ नस्यात्मन इत्यत्र प्रकृतात्मा तत्छब्दार्थः॥ आत्मनो देहत्वेसंबंधाद्धर्मादिकर्तृत्वं स्वतो वा द्वेतस्य तद्योगः स्व
तोऽन्यतो वाना द्यः॥ तत्कृतधर्मादिनिमित्तं सशरीरत्वमित्युक्तिविरोधात् न द्वितीयः॥ तस्याविद्यामनिघ्नता वस्तुतो
पगमात् धर्मादिकर्तृत्वाद्दत्ते तस्यातन्निमित्तत्वाद्देहे धर्मादिकार्यदिहस्तदसिद्धौ तद्द्वारा धर्मादेरात्मकृतत्वासि
द्धेरित्याह नेत्यादिना॥ स्वाशात्मकृत धर्माधर्मेषु तयातस्य देहयोगेन द्वारा तयोरात्मकृतत्वमित्याशंक्याह शरीरेति॥ न
नु प्राक्तनेन कर्मनिमित्तं संप्रति तनं शरीरं तच्च कर्म प्राक्तनदेहयोगाधीनं सोऽपि प्राचीन कर्मणोऽतीते तरेतराश्रयत्वं
नचानवस्था बीजांकुरवत् कर्मदेहयोगयोरनादित्वात् तत्राह॥ धेति॥ आत्मनि कर्मयोगस्या देहयोगस्य चाविद्यमा
नत्वादित्यर्थः॥ आत्मनः स्वतो धर्मादिकर्तृतेति पक्षं प्रत्याह क्रियेति॥ कूटस्थनंत चिद्धातो रक्रियत्वात्तस्य स्वतो
धर्माद्यकर्तृत्वान्नतत्कृत कर्मफलतमात्मनः शरीरित्वमित्यर्थः॥ स्वगत क्रियाभावेऽपि कारके पुंसः संनिधिमा
त्रेणास्य कर्तृतेति दृष्टान्तेन शंकते संनिधीति॥ वैषम्योक्त्या प्रत्याह नेति॥ उपार्जनं स्वीकरणं अस्तु प्रस्तुतेऽपि

किंचिद्धनादितुल्यं संबंधनिमित्तमित्याशंक्यासंगत्वात्तत्वमनो वस्तुतस्तस्य योगाद्वस्तुत्वेत्यन्यतरहत्वा इति मत्वाह
नेति॥ स्वकृतधर्मादिफला त्मनः सदेहत्वे स्वेतदप्रामाणिकमित्युक्ता स्वपक्षे मानमाह मिथ्येति॥ ननु ममेति धीशक्ते
मध्यिकारिणं कर्तारं चोद्दिश्य यागादि विधेश्चेतनस्यैव कर्तृत्वं यथाकुर्यज्जमानः तत्वमध्यात्मा सक्रियत्वात्प्रपद्यते।
नपरिस्पंदः एवैकः क्रियानं करणं जो जि वदितितत्राह एतेनेति॥ क्रियाश्रयत्वनिरासेन नेत्यर्थः॥ देहादावात्मधर्मि
त्वे त्यक्त्रमीमांसकश्चोदयति अत्रेति॥ आत्मनाऽहं स्वकीये देहादावात्मधीराज्ञोभत्यादाविव गौणी ततत्वी यदेहादि निमि
त्तं तस्य कर्तृत्वादिवास्तवमित्यर्थः॥ नात्मनो देहादावात्मधीर्गौणी तत्प्रापकाभावादित्याह नेति॥ प्रसिद्धो वस्तुभेदो यस्य पुं
सस्तस्येति यावत् उक्तमेव व्यनक्ति यस्येति। तस्मान्यत्रान्यशब्दप्रत्ययो गौणाविति संबंधः॥ तत्रोदाहरणं यथेति
तत्रैव सिंहशब्दस्तत्वी श्वनान्यत्रेत्यन्वयव्यतिरेकावन्यः पुरुषादि तिशेषः तत्रश्च सिंहादित्येततत्॥ यः सिंहपुरु
षयोः क्रूरशौर्यादेवेतितस्येतिबलीनेयायथासिंहः पुमानित्युच्चहरणं तथाग्नि र्माणवकइत्यादियाद्यमितिय
याशब्दो योज्यः॥ शब्दधियोर्गौणत्वविषयमाहनेति॥ नप्रसिद्धो भेदो यस्य तस्य पुंसो न्यत्रान्यशब्दप्रत्ययौ नगौ
णौ चेत् कथं तर्हि तस्यान्यत्रान्यशब्दप्रत्ययादित्याशंक्याह॥ तस्य त्विति॥ तत्र संशये समारोपितां शब्दप्रत्यया
वुदाहरति यथेति॥ पुरोवर्तिनः स्थाणुत्वेऽपि स्थाणुरयमित्यगृह्यमाण विशेषत्वे हेतुमाह मंदेति॥ तत्र पुरुषशब्द
प्रत्यायोपाधिका इति शेषः॥ वस्तुतः स्थाणुविषयत्वं नप्रतीति तः प्रतीतिस्तत्त्वारोपित विषयत्वं संशये समा
रोपितगतौ प्रान्ति कौ शब्दप्रत्ययावुदाहृत्य विपर्ययेतथा विधौ निश्चितावुदाहरति यथावेति तु शुक्तिका
यामिति वस्तुवृत्तोक्तं संशये विपर्यये च दृष्टहेतुसाधारणधर्मदर्शनादेः समत्वाद्विपर्ययस्यैवोत्सतौ कोहेतु
रित्याशंक्याह अकस्मादिति॥ दृष्टहेत्वविशेषेऽपि अदृष्टवशादित्यर्थः॥ दृष्टान्तमिथुनस्य दार्ष्टान्तिकमाह तद्व
दिति॥ अविवेकिनां देहादावहंधीशब्दयो मिथ्यात्वेऽपि विवेकिनां ततत्वौ गौणावित्याशंक्याह नेति॥ अवि

आनंद० विक्षाय विवेकोत्पन्नांतिलतावितिपावत्॥ आत्मीयेपि देहादावात्मबुद्धावात्मीयत्वेनारोपितं सर्पबुद्धाविवरज्जुत्वमिति
मत्वा परमतनिरासमुपसंहरति तस्मादिति॥ तत्राहंधियो मिथ्यात्वेपि किं सिध्येतित्यत आह तस्मान्निष्पेति। नकेव
३३ लं विदुषो जीवतोप्यशरीरत्वं। योक्ति किंकिंतु श्रोतं चेत्याह तथा चेति॥ अथ ब्रह्म समश्नुत इति पूर्वकाले जीवन्मुक्तिरु
क्ता सजीवन्मुक्तो देहस्थोपि पूर्ववत्संसारी दृश्यत इति तत्र दृष्टांतमाह तद्यथेति॥ तत्तत्र जीवन्मुक्तदेहे जीवन्मुक्ते च दृष्टांतो यथा लो
को हि निर्ल्वयनी सर्पनिर्मोकस्तदीयालके वल्मीकादौ प्रत्यस्ता प्रक्षिप्ता मृता पूर्वमिवाहिनात्मत्वेनानिबध्यमानेन तथैवे
दं विदुषः शरीरं मुक्तेन प्रागिवात्मत्वेनानिरूपितं शेते इत्यर्थः॥ सर्पदृष्टांतस्य तात्पर्यं व्यतिक्रमाह यथेति॥ तथार्थे यथाशब्दो
यथा प्रत्यस्तया त्वचा युक्तोपि तामात्मेति नाहिरभिमन्यते तथायं जीवन्मुक्तो देहस्थोपि न तत्राहंधियमादधातीति अ
त एवामृतो देहाभिमानवतो हि मरणं निरुपाधिः सन् प्राणीति जीवतीति प्राणः साक्षी सच ब्रह्मैव तच्च तेजो विज्ञानं ज्योतिरे
वेत्यर्थः॥ तत्रैव श्रुत्यंतरमाह। सचक्षुरिति वस्तुतोऽचक्षुरपि बाधितानुवृत्त्या सचक्षुरिवेत्यादि योज्यं॥ श्रौतेर्थे स्मृति
मपि संवादयति स्थितधीरिति विदुषो जीवन्मुक्तौ प्रमितायां फलितमाह तस्मान्नेति॥ प्रमितं जीवन्मुक्तिस्त्वं त्वेन ब्रह्मा
र्थः॥ प्रतीतिमात्रशरीरसंसारित्वमनुजानातीत्यथेति॥ ननु ब्रह्मविदप्येवास्माकं संसारित्वमबाधितमनुभूयते।
नेत्याह यस्येति॥ साक्षात्कृतसतत्त्वस्य पूर्वमिव संसारित्वायोगाद्युक्तो वस्तुमात्रोक्ते रज्जुस्वरूपोक्तिवदर्थवत्तेत्युप
संहरतीत्यनवद्यमिति॥ वेदांतेषु नास्ति वस्तुमात्रोक्तिर्मननादिविधिशेषत्वेन ब्रह्मोक्तेः। इत्याशंक्योक्तिमनुवदति
यत्पुनरिति॥ श्रुतमात्रस्य मननादियोगेनावगतस्य स्वात्मत्वात्पत्त्यादिना॥ वेदांतानामेकरसे ब्रह्मणि शक्तितात्पर्यनिश्च
यः॥ श्रवणांतरं स्वयं श्रुत्यनुसारिण्या युक्त्या संभावना ध्यानं मननं श्रुते मते च बुद्धेः स्थैर्यं निदिध्यासनं॥ तज्जमैक्या ३३
परोक्षप्रतीतिव्यंजकत्वेत छेव त्वान्नावगतमत्र विनियुक्तमित्यर्थः॥ अवगतस्यान्यत्राविनियोगेपि ब्रह्मणो विधि
शेषत्वं किं नस्यात्तत्राह यदीति॥ ब्रह्मणी मितेमिते च तद्द्वियोर्विध्यसिद्धेरपातह इष्टे साक्षात्कारार्थं श्रवणादिषु

विहितेषु तेष्वस्तद्वावान्न तस्य विधिशेषत्वेत्युपसंहरति तस्मान्नेति॥ नच वस्तुप्रकरणे श्रवणादिविध्ययोगो वाक्य
भेदोपगमान्नच तद्विषये लिङाद्यश्रवणादिभाष्यविरोधस्तस्य ज्ञानविधिनिरासार्थत्वात्। अतएवात्र प्रतिपत्तिशब्दः
नचैवं वेदांतानां श्रवणादिविधिपरत्वं वाक्यभेदस्योक्तत्वात् नचान्यथाप्रसिद्धहेतुभावेषु तेषु न विधिरेव व्यर्थत्वेपि
नि तदनुवादापातात् स्वीयमादरस्योभयत्र तुल्यत्वात् सर्वापिक्षाधिकरण्यात् तस्य ज्ञानोत्पत्त्युपयोगादिति भावः॥
उक्तेर्थे सूत्रं संयोजयति तदिति। विधिशेषत्वेन शास्त्रप्रमाणकत्वासिद्धिरित्यतः शब्दार्थः॥ वेदांतानां विध्य
नपेक्षसिद्धबोधित्वे शास्त्रारंभभेदप्रमाण्यत्वं चेति॥ विधिशेषत्वेन ब्रह्मणोपि शास्त्रं पृथगारम्भे तेषा
शंक्याह प्रतिपत्तीति। नन्वाद्येकार्थेवास्वक्रियाविधिरधिगतो मानसज्ञानविधिविधिविचारायकार्यान्तरमारभ्य
तेनेत्याह आरभ्यमाणं चेति॥ देहादिसाध्यकर्मविचारानन्तर्यमथेत्युक्तं॥ तस्यैव चित्तशुद्धिद्वारा ज्ञानविधिविचारोप
योगित्वात् शब्दार्थः॥ तत्रचातुर्थिकमुदाहरणमाह अथातइति॥ तत्रियेश्रुत्यादिविनियोगप्रमाणशेषित्वे सिद्धे सत्यन
न्तरं शेषिणो वशो ब्रह्मप्रयुक्तिसंभवात् कोनामक्रतवे प्रकुरुते कोवा पुरुषार्थायेति क्रत्वर्थपुरुषार्थयोर्जि
ज्ञासा ज्ञातुमिच्छा प्रवर्तते तन्वचतुर्थादिषु॥ तिज्ञासस्त्वविदमपि ब्रूयात् नचैवं ब्रवीति तस्मान्नोक्तविभागधीरित्यर्थः॥
तन्मतेपि कथं पृथगारंभः शास्त्रस्येत्याशंक्य मेयफलभेदादित्याह ब्रह्मेति॥ स्वार्थत्वेन ब्रह्मणोपेक्षा निष्ठत्वे वेदा
न्तानां तदेवतात्विकमिति कथं कैवल्यं वनस्य विधिवाक्यस्य [illegible] माने तेत्युपसंहरन्नुपरिहरति तस्मादिति॥
अद्वैतधियो [illegible] विरोधित्वं तत्शब्दार्थः॥ इति [illegible] तस्मादित्युक्तं हेतुं व्यनक्ति नहीति॥ त
त्वसाक्षात्कारे तद्ज्ञानध्वस्तौ तदुत्थमात्रादिसर्वभेदध्वस्तेरविद्यायां वस्थायां [illegible] व्यवहार इत्यर्थः॥ का
र्या [illegible] ब्रह्मण्य [illegible] उपसंहरति मिति शंक्य [illegible] नकेवलमस्माभिरयमर्थोभ्युपगतः किं
त्वन्यैरपि ब्रह्मविद्भिरित्याह अपिचेति॥ सत्या [illegible] ब्रह्मात्मैक्यबोधजाते पुत्रदेहादे [illegible]

धनान्मायामात्रत्वावगमात्प्रमरुमेवेति पुत्रादावहमभिमानस्य गौणत्वान्नेमनुष्योऽहमिति देहादावहमभिमानस्य च
आनं॰ ६० मिथ्यात्वात्तनोऽसत्त्वे कार्यं कथं भवेत् । तन्निमित्ताभावात् । विधिविधेयादिव्यवहारो न कथंचिदित्यर्थः ॥ यद्यात्मा सङ्क्रान्तैवक
३४ स्तर्हि विमातापद्यमेवकपरस्तर्हि ब्रह्मता स्येत्याशंक्याह अन्वेष्टव्येति । प्रत्यगात्मा परतत्पादेत्यादि । श्रुतिसिद्धआत्मान्वे
ष्टव्यः सोन्वेष्टव्य इति श्रुतेस्तद्विरा नास्त्र्व सात्मनोमातृत्वं मातैवान्विष्टव्यः स निर्देशः परमात्मास्यादतोन्वयव्यति
रेकाभ्यामात्मनोमातृत्वमाविरभिमित्यर्थः ॥ तस्याविद्यत्वे कथमध्यस्तादीनां श्रुतेः प्रमाणता करणादिबाधादित्याशंक्याह
देहेति ॥ यथा देहात्मनि विकात्मवादेकल्पितापि देहात्मत्वबुद्धिर्व्यवहारे ॥ तथा मानाभिप्रेते ॥ तथा तत्त्वसाक्षात्कारपर्यं
तं व्यवहारांगत्वात् व्यवहारे बाधाभावात्प्रमाणत्वात्तस्य अध्यस्तत्वे वैदिकमपि व्यावहारिकं मानं ॥ श्रुतेस्तु वर्णादेर्वाद्विविदात्मधी
हेतोस्तात्त्विकमेव मानत्वमित्यर्थः ॥ शास्त्रार्थं चतुर्भिः सूत्रैः संक्षिप्य वक्ष्यमाणाधिकरणानामपुनरुक्तमर्थं वक्तुं संकीर्त
यत्येवमिति ॥ तेषां तत्फलत्वे हेतुस्तत्त्वार्ये णेति ॥ कार्यान्विते ब्रह्मणि तात्पर्यं तेषामित्याशंक्याहान्तरेणेति ॥ स
मन्वयसत्त्वार्थमन्यथातीतसत्त्वात्सार्थमनुवदति ब्रह्म चेति ॥ उक्तेलक्षणे लक्षणे तिव्याप्तिशंकायां तन्निरासस्य सावकाश
काशत्वात्तद्ब्रह्मणो जिज्ञास्यलक्षणमपि शास्त्रीयस्योक्तमित्यर्थः ॥ तस्मिन् ब्रह्मणि सिद्धे समन्वये समन्वयाध्यायस
मासिरुत्तरसंदर्भानर्थक्यमित्याशंक्याह । सांख्यादयस्त्विति । सिद्धेर्थेमानत्वविरोधि कार्यानुप्रवेशप्रत्युक्तेपि ब्रह्म
ण्येव समन्वयो नान्यत्रेत्यनिर्धारणात्तत्र ब्रह्मकारणताविरोधिप्रधानादिवादनिरासायोत्तरः संदर्भ इत्यर्थः ॥ परि
निष्ठितस्य मानान्तरगम्यत्वे तत्संवादादिना तत्र वेदान्तानां प्रामाण्यात्तन्नततो जगद्धेतुर्ब्रह्मसिध्यतिचेति तर्हि केन
मानेन तद्धेतुरित्याशंक्योक्तं प्रधानादीति ॥ कातर्हि वेदान्तानां गतिः परार्थानुमानतेत्याह तत्सरतयेति ॥ हेत्वा ३४
द्यनुक्तेस्तेषां न परार्थानुमानतेत्याशंक्याह सर्वेष्विति ॥ तेन जसास्मोस्पर्शगुणेन सन्तमसमन्विच्छेत्यादि अनुमा
नतानातीत्यर्थः ॥ कार्यलिंगमनुमानं ब्रह्मैव गमयिष्यतीत्याशंक्य सुखदुःखमोहात्मकं कार्यमित्याह

गेयकारणमनुमापयतीत्याह । प्रधानेति । तस्याचेतनस्य स्वार्थाभावात्पुमर्थप्रवृत्तौ पुंसि मानं वाच्यमित्याह ॥
पुरुषेति ॥ बुद्धौ यस्य तिबिंबस्तादृशबिंबप्रत्यक्षः प्रतिबिंबत्वाद्दर्पणमुखाभासवदित्यर्थः ॥ संबंधमाहोदेतादृ
र्थयोगात्तत्रापि मानाकांक्षायां । विमतं चेतनसंयुक्तमचेतनत्वाद्रथवदिति बुध्यासंयोगग्रहणं मतान्तरमाहका
णादास्त्विति ॥ यत्तोवाङ्मानी त्यादिवाक्येभ्योपच्छन्दोपनिषत्सिद्धं च जगद्धेतुः परामर्शात्तत्कार्यं बुद्धिमत्कर्तृ
कमिति सामान्यतो दृष्टादीश्वरं कल्पयन्तीत्यर्थः ॥ स्वपरिमाणादल्पपरिमाणारंभपरादिदृष्टान्यदपि कार्यं तथेति
समवायित्वे न च तुर्विधनयपरत्रकल्पयंतीत्याहाणूंश्चेति । असद्वा इदमग्र आसिदित्यादिवाक्याभासादीपादेर्निरन्व
यनाशदृष्टां दृष्टिव्याहरपितथा न इस्यासत एवोत्पत्तिरित्यादिश्रुत्याभासाच्चाहैतवादेमाध्यमिकादयो विरोधिनो
भवंतीत्याह एवमिति । वादिविप्रतिपत्तीरुक्त्वा तन्निरासायोत्तरग्रंथमवतारयति तत्रेति । वादिषु भिन्नप्रस्थानेषु ।
सञ्छ्विति यावत् ॥ वाक्याभासेषु युक्त्याभासेषु च प्रतिपत्तिर्येषां ते तथा ॥ उत्तरग्रंथतात्पर्यमुक्त्वा सदेवेत्यादेः सच्छ
ब्दितमीक्षितृ सर्वज्ञं जगदुपादानं प्रधानं ब्रह्मैवेति ॥ वादिविवादात्तद्वाक्यतात्पर्यं संशय्यानंतराधिकरण
पूर्वपक्षमाह तन्नेति ॥ स्थितं समुच्चयतात्पर्यं स समन्वयः ॥ सर्वज्ञे जगद्धेतौ समन्वयोक्त्या तद्धेतवन्यमात्तिप्य समर्थ्यते
इत्यधिकरणसंगतिः ॥ नानाशाखास्थ स्फुटब्रह्मलिंगवाक्यानां ब्रह्मसमन्वयोक्तेः श्रुत्यादिसंगतयः ॥ तत्त्व
मसीतितत्त्वंबुद्धितत्पाधान्येकसंपत्तिः ॥ पूर्वपक्षे सिद्धान्ते चिदात्मनो ब्रह्मैक्यं फलं ॥ प्रकर्षेण धीयातस्सर्वज
गदस्मिन्निति व्युत्पत्त्या प्रधानं तत्तो विशिनष्टि त्रिगुणमिति ॥ परिणामयोग्यत्वमाहाचेतनमिति सांख्यीयं मतं श्रुति
विरोधमत्यज्यमित्याशंक्याह । यानीति । जीवारव्यचित्त्वप्रतिबिंबानां स्वतो विज्ञानमनियमनेकीकरणाशक्यो
न प्रधानस्याचेतनस्येत्यन्यदेव सर्वशक्तिमदेष्टव्यमित्याशंक्य चित्प्रतिबिंबानामनुत्पादत्वादुपाधार्थप्राप्ति
रस्याविस्वादित्याह सर्वेति । तथापि कुतोऽस्याचेतनत्वे सर्वज्ञता तत्राहैवमिति ॥ यस्य ज्ञानमेव तस्य कुतः
सर्वज्ञतेत्याह कथमिति ॥ प्रधाने ज्ञानकर्तृत्वं संभावयितुं सत्त्वस्य रूपमाह यदिति ॥ ननूक्तज्ञाने न चेतना

नामेव योगिनां सर्वज्ञत्वादचेतनं प्रधानं कथं तेन सर्वज्ञमुच्यते तत्राह तेनेति ॥ कार्यकारणयोर्वस्तुतश्चैतन्यमुक्तं ॥ तत्रा
आनं० प्यचेतनांशस्यैव सर्वज्ञत्वं सत्वस्य सहायतयांतदुत्कर्षान्वयव्यतिरेकयोरस्य घासिद्धेरित्याशंक्याह । सत्वस्येति
केवलव्यतिरेकाभावाच्चेतनांशस्यैव सर्वज्ञत्वमित्यर्थः ॥ किंचतस्य सर्वज्ञत्वं दुर्ज्ञेयं दुर्वारं चिन्मात्रस्य ज्ञानकर्तृ
३५ त्वायोगादित्याह नेति ॥ कार्यकरणविरहित्वान्नास्य ज्ञानकर्तृत्वमित्याह कार्येति । पूर्णत्वाच्च तथेत्याह पुरुषस्ये
ति ॥ प्रधानावस्थायां गुणसाम्ये सत्वोत्कर्षायोगान्न तस्य तत्कृतं सार्वज्ञमित्याशंक्याह त्रिगुणत्वादिति । नच ज्ञान
प्रतिबंधकरजस्तमसोरपि तत्र भावान्न सार्वज्ञं वस्तुतस्तत्कार्यं वेपि मायावक्ष्याम्नित्वव तदुपचारस्त्वाहोपच
र्यतइति ॥ गौणमुख्ययोर्मुख्ये संप्रत्ययान्मुख्यग्रहणमाशंक्याह वस्तुभिति ॥ तत्रहेतुमाह नहीति ॥ तथात्वेका
नुपपत्तिरित्याशंक्य तज्ज्ञानं नित्यमनित्यंवेति विकल्प्य नेति । तथाहीति । तत्राद्यं दूषयति । ज्ञानेतिहि ॥ नियमकं ग्रस्त
मत सिद्धान्तमाह अथेति । सादिना ॥ अनित्यज्ञानपक्षे लक्षणः सर्वज्ञानशक्तिमत्वेनैव सर्वज्ञत्वे तत्रहेतुं तस्मा
दापिचेति ॥ तथापितस्य सर्वविषयं ज्ञानं किमितिनोत्पद्यते तत्राह नचेति ॥ आदिपदेन शौचसत्वादि संग्रहः
ऽन्यपत्राप्यनुपपत्तिसाम्ये कथं पक्षविशेषपक्षपातः इत्याशंक्य प्रधानपक्षे विशेषमाहापि चेति ॥ एकस्यापि ब्रह्म
णः सामग्रीसंनिधानात्कारणत्वमाशंक्य तस्यासंगत्वाद्द्वयत्वाच्च नैवमित्याह नेति । जगदुपादानत्वादि वेदा
न्तानां प्रधानपरतेति पूर्वपक्षमनूद्य सूत्रेण सिद्धान्तयति एवमिति । सूत्ररूढनञ्पदं व्याचष्टे नेति ॥ तत्रसोत्रमेव
हेतुमाह शब्दहीति ॥ सदेवेत्यत्र सच्छब्दस्य तच्छब्दस्त्वाच्छब्दत्वमित्याह कथमिति ॥ सोत्रपदमवतार्य व्या
करोति ईक्षतेरिति ॥ अनुमेयं प्रधानं हित्वा तत्त्वादिश्रुतिसिद्धस्य कथं कथं कारणत्वमित्याह कथमिति ॥ का ३५
र्येण कारणमात्रमनुमातुंशक्यं न तद्विशेषस्तत्र श्रुतिरेव मानमिति मत्वाह एवंहीति ॥ श्रुतोपादानस्य चेतनार्थ
त्वमाह तदैक्षतेति ॥ केचिदिक्षितारमीश्वरं सद्वितीयं संगिरंते तान्प्रत्याहैकमेवेति । तस्योपादानार्थत्वमा
ह । बहुस्यामिति । इक्षणफलमाह तदिति । तदाकाशं वायुं च सृष्ट्वा तेजः सृष्टवदित्यर्थः ॥ श्रुतेरनुमितार्था

नुवादित्वमुक्तसार्थमर्थमाह तत्रेत्यादिना ऽन्यश्रुतिः सत्यमित्यर्थः ॥ छंदोगश्रुतिवदैतरेय श्रुतिरपि प्रधानवादविरोधिनी
त्याह तथेति । मिषत्सलक्षणत्वात्क्रांतमिति यावत् ॥ प्रश्नश्रुतिरपि प्रधानकारणतां वारयतीत्याह क्वचिच्चेति ॥ सप्राणमसृज
तप्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोन्नमन्नाद्वीर्यं तपो मंत्राः कर्म लोका लोकेषु नाम च इत्युक्ताः षोडश कला ॥ ईक
स्तिपो धातुनिर्देश इति स्मरणादिक्षतेरिति तिपा धातुस्वरूपकथनाच्च तस्य चेतनोपादानत्वसाधनत्वेत्याशंक्याह ईक्ष
तेरितीति ॥ विषयिणा विषयस्य लक्षणादित्यर्थः ॥ प्रसिद्धार्थे यंलक्षणेत्याह यजतेरितिवदिति स समोक्षितमिति
कर्तव्यताविधेयं जतेः पूर्ववत्वमिति ॥ कर्तव्यतायाः सौर्यादिषु विकृतिष्वविधानादनितिकर्तव्यताकत्वमाशंक्य प्र
त्युच्येत यथा लोके ऐकादिषु सिद्धेषु वदत्योदनं पचेति । तथेह सिद्धवत्कृत्य सामान्येनेति कर्तव्यतां करणं विकृतिं
तस्याश्च विकृतिष्वविधेः सौर्यादीनां विकृतियागानां दर्शादि प्रकृति विहितप्रवृत्तेति कर्तव्यतावत्वमिति तत्रयथा
यजतेरिति ॥ यागो गृहीतस्तथेहापीक्षतेरितीक्षणमित्यर्थः ॥ ईक्षतेरित्युक्तेरर्थपरत्वेवासौ तरात्वपि प्रधानपक्ष
प्रतिक्षेपायात्र सूत्रितानि वर्तीत्याह । तेनेति ॥ सामान्यतः सर्वज्ञो विशेषतः सर्ववित् तिच्छेदः ज्ञानमयं ज्ञानात्म
कं तपोनत्वायासरूपमेतत् ब्रह्मजायमानं हिरण्यगर्भाख्यं कार्यं नामदेयं वदत्तादिरूपं नीजपीतादि अन्नं व्रीहिय
वादि आदिपदेन सूतः कालकारो गुणी सर्वविद्यः ॥ सकारणमित्यादि गृहीतं सिद्धान्तमुपपादयन्परोक्तमनुवदति
यत्त्विति ॥ प्रधानेगुणानां तुल्यतया सत्वकार्यज्ञानस्यैवासंभवे सर्वज्ञत्वं दूरस्थमिति निरस्तमित्याह तन्नेति ॥
अंगांगिभावाविरोधे सार्वज्ञमुक्तं स्मारयति नन्विति ॥ सत्वस्य सूक्ष्मरूपेण ज्ञानहेतुत्ववदितरयोरपि तेनात्मना
तत्प्रतिबंधकत्वान्न सर्वज्ञेति त्याह तदपीति ॥ केवलसत्ववृत्तेः ज्ञानत्वमुपेत्य सत्वधर्मेण तेनासर्वज्ञतेत्युक्तमपि
दत्तीनकेवलासत्ववर्तिनि किंतु तदभिव्यक्तचितकाशस्तथा विधज्ञानवत्वं च न प्रधानस्येत्याहापि चेति ॥ तर्हि
प्रधानमेव चिदात्मना परिणतं अवच्छेदकवत्वात्म नापि परिणस्यतेनेत्याह नचेति ॥ हेतुरन्चेतनास्य तु क्तः स

आनंद० धानस्यासर्वज्ञत्वमुक्तं निगमयति तस्मादित्यचेतनस्याज्ञातृत्वं तदुक्तं कार्यं ॥ परोक्तं दूषयितुं विकल्पयति योगिनामिति

३६ ति । सत्त्वोत्कर्षोपि चेतनस्योपकरोति नाचेतनस्य प्रधानस्याधस्येव आत्मोत्कर्ष इत्यर्थः ॥ सेश्वरसांख्यमतमाशङ्कयति ।
मत्स्यस्वतोनित्यत्वं तस्य कार्यं तदन्यकृतमपि स्यादित्याशंक्याह्यपेति ॥ लाघवेन सिद्धान्तयति । तथेति सिद्धान्तेपक्ष
कामनुपपत्तिमनुज्ञापलेथत्युनरित्तितस्य मुख्यं सार्वज्ञ्यं प्रतिजानीते तत्रेति ॥ तत्र परोक्तमनुपपत्तिं निरसितुं पृच्छतीति
दमिति । प्रकृतस्य चाचाया स्वं त्वया वाच्या वा ब्रह्मलक्षणे । सर्वज्ञतेति प्रश्नमेव तत्र कल्पयति कथमिति ॥ प्रथमं प्रत्याह य
स्येति । उक्तव्यतिरेकद्वारा विवृणोति अनित्यत्वेहीति । द्वितीयं शंकमते ज्ञानेनेति । स्वतो नित्यस्य विज्ञानस्य तद्दृष्टा
वच्छिन्नस्य कार्यत्वात् तत्र स्वातंत्र्यं ब्रह्मणो धर्मलक्षणः सिद्ध्यतीत्याह नित्यादिना ॥ चेष्टमेव शंकते नन्विति ॥ ब्रह्मणो
विविधयत्सं बंधे जानातीत्यादित्यादिशंक्याह नत्विति । यत्रस्वातंत्र्यं तत्र क्रिया प्रयत्नेमेवाव्यभिचारादितिदूषय
तिनासत्यपीति । प्रकाशतेरकर्मकत्वात्तथा व्यपदेशो भिन्नमातेः सकर्मकत्वात्कर्माभावे तथा व्यपदेशो न स्यादित्या
शंक्याह कर्मेति । प्रकृतस्य दृष्टांतस्य प्रत्ययार्थस्यापि बाधाभावात् तस्तुत्यामित्युक्तं ॥ यथा कुंभकारकास्य व्याचिकीर्षि
ताकारस्योपाधेः । प्रयत्नः करणपरिणतिरीक्षणं तथा ब्रह्मणोप्यवि द्याया स्वोपाधेः । रनादिप्रवृत्त सर्गसंस्कारा
याः तद्धेतु कर्मवयोपाधि तत्संस्कारादिवशेन सर्गोन्मुखपरिणतिरीक्षणं ततोन्यस्य मुख्यस्यासंभवादिद
मेव मुख्यं तत्र चास्यादिकर्तुरस्ति कर्ततेतिभावः ॥ न च पदिष्टं कर्म ब्रह्मणो भिन्नमपि न्नं वा घेतदेव तदाह ॥
द्वितीयेसर्वज्ञत्वासिद्धिरित्याह किमिति तन्नामरूपाभ्यामेवेत्यादिश्रुतेः सर्वस्य कार्यप्रपंचस्य नामरूपात्मकत्वात् ३६
तयोश्च ब्रह्मणोन्यत्रार्थादुर्निरूप्यत्वात्तं । नेवमित्याह तत्त्वेति । प्रागेव तयोः सत्त्वे सर्गसिद्धिमाशंक्याह व्याकृतेति । त
योस्तथात्वा स्वाभाव्ये नावेकृत ॥ सृष्टिरित्याशंक्योक्तं व्याचिकीर्षितेति निरीश्वरवादिनं प्रति ब्रह्मणः सार्वज्ञत्व
मुक्त्वा सेश्वरवादिनं प्रत्याह यत्सत्साधादिति ॥ ततः प्रत्यक्षचेतनाधिगमोऽतरायाभावश्चेति योग ॥ सूत्रस्य भक्ति

विशेषत्वादावर्जितईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिनेति । तद्भाष्यस्य च दृष्टेः योगशास्त्रविद इत्युक्तमपि नास्य ।
चितकेसुतिकं न्यायमाह किम्चिति ॥ तथा च सेश्वरवादे ब्रह्मणः सार्वज्ञ्यमनायासमितिशेषः । जीवस्येश्वरस्यापि ।
ज्ञानानुगुणहेत्वपेक्षामनुवदति यद्यपीति ॥ वस्तुतस्तु तो नित्यस्य स्वतो हेत्वनपेक्षत्वात् नैवमित्याह नत्विति ॥ तस्य
व्यतिरेकेण साधयत्यपि चेति ॥ अविद्या मिथ्याज्ञानं । आदिशब्देनास्मितादिरुक्तः ॥ ननु संसारिणोपि ज्ञानस्य नि
त्यत्वान्न हेत्वपेक्षास्याच्चेदीश्वरस्यापि स्यादन्यथा दित्याशंक्याह विधूतेति माद्यस्य विशेषमाह नज्ञानेति । सोपि ज्ञा
नप्रतिबंधकारणवानितरवच्चेतनत्वात् तस्य स्यापि देहाद्यपेक्षाज्ञानोत्पत्तिरित्याशंक्य कालात्यापदिष्टत्वमाह मंत्रो
चेति । चकारः शंकितनिरासार्थः कार्यं शरीरं करणमिंद्रियजातं । समः समानजातीयो भ्यधिको विजातीयो दृश्य
त इति नञा द्वितयं मानाभावपरं । सत्त्वासत्त्वादिनानवगाह्यत्वं परत्वं । शक्तिर्मूलकारणं माया तस्याः विविधत्व
माकाशाद्यशेषाकारत्वमेतिश्रमाचेसिद्धा साचेन प्रामाणिकीति वक्तुं श्रूयत इत्युक्तं मायानुसारित्वं स्वाभावि
त्वं ज्ञानमेव बलं तेन क्रियाजगतः सर्गस्थित्यादि सा च स्वाभाविकीति ॥ अपाणिपादोपि जवनो ग्रहीता अपादोपि जवनो वे
गवद्धितरया वानश्च चक्षुरपि पश्यतीत्यकर्णोपि शृणोति ॥ किं बहुना सर्वमपि वेदनयोग्यं कार्यं करणानपेक्षो
वेत्ति पर्यवसितं तस्मिन्नवेदिता त्वं अतोनतस्यान्यो वेदितास्ति नित्यस्फुरत्वाच्च तं चादिकोत्तरिमहान्तमाच
क्षते ब्रह्मविदो न च तन्महत्त्वमापेक्षिकमिति पुरुषपदं ॥ आदिमत्तः संसारिणो देशाद्यपेक्षाज्ञानोत्पत्तिर्नेश्वरस्यो
त्पत्त्यापसिद्धान्तं शंकते नन्विति ॥ न केवलमपरामृष्टाऽऽदीश्वरो दन्योनसंसारी किंतु श्रुतिविरोधादपीत्याह नेति
व्यक्तिरिक्तेसंसारिण्यसतिविभागोक्तिरयुक्तेति फलितमाह तत्रेति ॥ स्वाभाविकमोपाधिकं वान्यत्वं नास्तीति
विकल्प्यतत्त्वेति । तत्राद्यमंगीकरोतिसत्यमिति द्वितीयं प्रत्याह तथापीति ॥ तत्कृतमन्यत्वं चेत्यमेवेतिशेषः ॥
अपरिच्छिन्नस्य परिच्छिन्नोपाधिसंबंधे दृष्टांतमाह घटेति ॥ विमतो तत्त्वतो भिन्नो अपुनरुक्तशब्दधीगम्यत्वात् । घ

रादिवदित्याशंक्य व्यभिचारमाह तत्रेति। उपाधिसंबंधस्य शब्दार्थः। हेतुवदाकाशेसाधर्म्यावर्तयत्याका
आनंद० शेति। तस्यतत्त्वतोऽन्यत्वेपीति यावत्परापरस्योस्तात्विकभेदाभावे कथं तत्प्रश्ये त्याशंक्याऽऽह तत्रेति।। पूर्ववस्त्व
ऽदृष्टांतस्थमर्थं दार्ष्टान्तिके योजयति तथेति। चिदात्मासस्य सम्पर्कः विशिष्टोपाधियोगादविवेकस्तेन कृतेत्येतदा
३७ भासावनात्मनि। भ्रांतिसिंधवेपि कथमात्मनि स्वप्रकाशे स्यादित्याशंक्याऽऽह दृश्यते चेति। तत्वतोतिरिक्तस्येचसत
आत्मन इति योजना। तत्रकारणमाह मिथ्येति। पूर्वभ्रांतेरेव संस्कार द्वारा भ्रांतिकारणत्वमवधारयितुं तन्मात्रग्रह
णं किंतु तस्य तोविचारासहत्वं वक्तुं अतो हेत्वंतरमविरुद्धं उपाधिद्वाराचिदात्मनि संसारित्वेपि ब्रह्मणि किं जातं
तदाह सति चेति। ईश्वरस्यासंसारिणो महाकाशस्थानीयस्य तत्पनपेक्ष्यमीत्थितत्त्वमिति शेषः। प्रधानस्य परोक्तं सर्व
ज्ञत्वं निरस्य ब्रह्मणस्तदुपपत्तिरुक्ता संप्रति प्रधानस्यैव कारणत्वायोग्यतेतुक मनुवदति यदपीति।। तस्य कारणत्वं
शब्दस्तस्तर्कतो वानाध इत्याह तदिति। द्वितीयं निरस्यति यथा त्विति। प्रधानस्य न कारणतेत्युक्तस्त्विति ईक्षितृत्व
स्य चेतन कारणहेतोर्व्यभिचारं चोदयत्यत्रेति। उक्तमनुद्य व्यभिचारं स्फोरयति यदुक्तमिति। हेतुश्रवणं तदपरा
मर्शमप्याप्य जिज्ञासत्कारणत्वस्याचेतनत्वेपीत्यर्थः।। कथमुपपत्तिर्नेति तत्र मुख्यमीक्षित्वं तत्राऽऽहचेतनेपीति।
तदेव दृष्टान्तेन व्याचष्टे प्रत्यासन्नेति। तथापि कार्यप्रधाने तदैक्षतेति व्यपदेशस्तत्राऽऽह तद्वदिति। उपचारे
निमित्तं प्रत्यासन्नेत्यादि। तथा विधेपि प्रधाने सिसृक्षतीतिस्यात्कथमैक्षतेति तत्र चेतनवदिति विरुद्धं ३७
क्षांतं व्याकुर्वाणो लौकिके त्वितत्सामान्यविषयतत्क्रियाकारित्वादि युक्तिरित्याऽऽह यथेति। तस्मादिति नियतप्रव
त्तिमत्वं हेतत्वं तन्मुख्यगौणयोर्मुख्यग्रहणं न्याय्यमिति। सिद्धान्ती शंकते कस्मादिति।। गौणो ह्यणसन्निधिनास
माधानेत्तेतत्तेज इति। दर्शनाद्येपचारिकं सतोपीक्षितृत्वमिति संबंधः।। संनिधिफलमाह तस्मादिति तच्छब्दार्थं

व्याकरोत्युपचारेति। तस्माये तत्र करयोइति शब्दः शंकोपक्रमस्थक्रियापदसंबंधः। व्यभिचारशंका मनूद्यस्य
त्र मुत्तरत्वेनावतारयत्येवमिति। अनुवादभागं विभजते यदुक्तमिति।। परिहारभागं व्याकरोति नानर्थमुक्त्वा प्रश्नपू
र्व हेतुमाह तदस्य दिति। परमतं निरसितुं प्रकरणमनुसंदधानो हेतुं व्याचष्टे सदेवेति। सेति प्रकृतं सदात्मोक्तिमि
यमिति संनिहितेत्विदं निर्देशादेवतेत्यलौकिकत्वमुक्तमीक्षणमभिनयति हंतेति। सूक्ष्मभूतसर्गानन्तरं तावता।
वता व्यवहारायोग्यात्त्वपेक्षायामित्यर्थः। सृष्टिवाक्येनोक्तानि तेजोबन्नानि निर्दिशति इमा इति सूक्ष्मभूतानां
व्यवहारायोग्यत्वेनाधात्मन्नात्तेषु देवताशब्दो नेनपूर्वसृष्ट्यनुकृतेन जीवेन प्राणधारयित्रेत्वनात्मना सरूपेणायथो
क्तादेवता।। सर्गानंतरं प्रविश्य नामरूपे चेति विस्पष्टप्रासमंतात्करवाणीति परादेवते त्वितवतीत्यर्थः।। ननु न
जीवमात्मशब्दो न विधत्ते तथापि प्रधानस्य गौणमीक्षित्वं किं नस्यात्तत्राऽऽह तत्रेति।। ईक्षणवाक्यसम्पर्थः।। जीवस्य
चेतनत्वात्तद्वचेतनप्रधानस्य तदात्मत्वायोगादित्यर्थः। तस्यापि प्राणात्मना प्रधानकार्यत्वात्तत्समत्सिद्धात्मशब्दः स्यादि
त्याशंक्य जीवस्वरूपमाह जीवो हीति। तस्य तद्दीपाचेतन्यस्य च प्रसिद्धयोर्निपातौ चेतनत्वे हेतुः शरीरेति। तत्र जीवशब्द
प्रवृत्तौ निमित्तमाह प्राणानामिति। उक्तचेतनस्य जीवत्वे मानमाह प्रसिद्धेरिति। प्राणविषयत्वेनापि लौकिकी प्रसिद्धिः स्या
दित्याशंक्य जीवप्राणधारण इति धात्वर्थानुरोधादुक्तं चेतनो जीव इत्याह निर्वचनाच्चेति। सिद्धे तज्जीवस्य चेतनत्वे फलि
तमाह स कथमिति। आत्मशब्दार्थं वदन्नसंभवं साधयति आत्मा हीति।। पूर्वच निपातौ। संसार्यसंसारिणोर्विशेषात्तत्त्व
म्नतेपि ब्रह्मणो जीवेन कथमात्मापदं प्रयुक्तमित्याशंक्याऽऽह यद्यपीति। तत्त्वतो विरोधात्तदृष्टिं तो विरोधस्य बिंबप्रतिबिंबयो
र्व्यभिचारं जीवब्रह्मणोः प्रकृत्य ब्रह्मणो जीवेयुक्तमात्मपदमित्यर्थः। जीवस्य तत्र आत्मशब्दान्नतत्र प्रधानमितियुक्तं विधान्तरेणाहेतुं
व्याचष्टे तथेति।। यः स दारव्यः स एषोऽणिमाणोर्जीवो भावन विज्ञेरन्नेत्त्वदृष्टिरित्येतदेतदात्म्यमेतदात्मनोभावोयमपि
प्रयोगोऽनवधित्वपरः सर्वमिदं जगदेतदात्मकमितियावत् तत्परमसूक्ष्मं सर्वात्मकं सदेवसत्यं पारमार्थिकं तत्त्वमसि तिकेत्ये
व सत्यमिति दृष्टान्तरस्त्रावधारणस्यात्रापि संबंधः सर्वस्य संसर्ववस्यात्मानि रूपचरितं रूपं हे श्वेतकेतो त्वं चनासि संसा

री किं तु तदेव ब्रह्मेत्यध्याहृत्य योजना ॥ तत्रापेक्षितं प्रतीकमादाय विवक्षितमाहेत्यत्रेति ॥ तथा च । चेतनस्यात्मशब्दार्थत्वस्य प्रथम
आ०नं० ९० नत्वे त्वर्थः ॥ यत्तु न रूपचारप्रायं यागादीत्युक्तं । सतोऽपि गौणमिति तत्राह अपतेजसो लिखित्वेति । युक्तमीक्षितृत्वस्य गौणत्व
३९ त्वमिति संबंधस्तत्र हेतुमितिशब्दः । स च प्रत्येकं संबध्यते यत्तथैतन्न्यायाप्रवृत्तिविषयत्वेन निर्देशात् तयो रचेतनत्व
मादिपदेन प्रवेशनियमनादिसंग्रहः ॥ यतश्च तत्र तत्र प्रयोगस्यत्वेनैव तयो रुक्तिर्यस्मात् स दीक्षितत्वस्य मुख्यत्वे हेत्वा
त्मशब्दवत्तयोरीक्षितृत्वस्य मुख्यत्वे हेतुर्न दृष्टस्तस्मात्फलस्य गुणवत्त्वापि प्रतिषेधात्तद्गुणमत्तेजसो गौणमीक्षितृत्व
मित्यर्थः ॥ तर्हि न्यायपाठस्य का गतिरित्याशंक्य मुख्यत्वस्येत्युक्तवान् गौणेत्यनालुप्यत्वादि स्थानुदृष्टे प्रायवचनमकिंचि
त्करमित्यभिप्रेत्याह जसोरपि मुख्यमेवेक्षणमापद्यमानत्वे न गौणमित्याहेह तयोरपीति ॥ कारणेक्षणकार्ये लक्षणया योच्यते
चेत्तत्रापि कथं मुख्यत्वमित्याशंक्याह सतस्त्विति ॥ आत्मशब्दोऽपि प्रधाने गौणः स्यादिति चोदयत्यपेति ॥ गौणप्रयोगे गुणयो
गं दर्शयति आत्मन इति । स्वर्यार्थस्यापि कृत्स्यता ः स्वगृशब्दस्य हेत्वाद्यमार्थमपि प्रधानं नात्मशब्दार्हमित्याशंक्याह । यद्ये
ति ॥ प्रधानस्य भक्त्यर्थे तन्न्याभावान्न तस्यार्थप्रवृत्त्ययोगान्नात्मार्थकारितेत्याशंक्याह प्रधानं हीति ॥ नृत्यस्य राज्ञि विवेकावि
वेकाभ्याम तुल्यापरत्वेत्वात्र दृष्टान्तेत्याशंक्यापकारित्वमात्रं तुल्यमित्याह राजेति ॥ गौणत्वनिरसितुमुक्तात्मश
ब्दस्य न गौणत्वेत्यपि स्थितं प्रत्याह न वेति ॥ प्रधानेऽपि प्राकृतकल्पे गौणमुख्यस्य शक्यदृष्टप्रयोगादनेकत्रशक्तिसिद्धे नैवमित्याह
ऋतात्मेति ॥ प्रधानात्मा परमात्मा चेति चकारार्थः स्तुत्या त्मशब्दस्यात्मन्येव मुख्यावृत्तिः ॥ प्रधाना ह्येगेणी त्याशंक्यभिन्नजातीय
योरेकशब्दप्रयोगे शक्तिद्वयमेव कल्प्यमित्याहयथेति ॥ आत्मशब्दस्याचरणोपेक्षलित्माह तत्रेति ॥ शंकोत्तरत्वेन सूत्रं पात
यत्नत इति । हेतुमात्रस्य सूत्रे नानात्पूर्वसूत्रस्यानुत्तमात्र्याख्यप्रतिजानीते प्रधाने इति ॥ तत्र हेतुं सूत्रं व्याचष्टे स इत्यादि
नासात्त्वि त्वेनाहंकाराद्यध्यासनिरासयोग्यतां वक्तुं चेतनस्येत्युक्तं ॥ ऐक्यापरोक्ष्यप्रमितिप्रतिबंधनिवर्तकं सञ्चय ३९
त्याचार्य्यवानिति ॥ उक्तप्रमित्या सर्वबंधनिवृत्त्या देहादिदृष्टेऽपि निवृत्तिः प्रासो शब्दारब्धकर्म्मणा न दृष्टानुवृत्तिमा
चष्टे तस्येति ॥ कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशंक्यनो गादिति मन्वानोऽक्रमे तेयावदिति ॥ आरब्धकर्मध्वस्तावपि

कथं देहादिधीध्वस्तिरित्याशंक्या प्रतिबंधादित्याहाथेति ॥ उत्तमपुरुषस्तु नयत्र प्रथमपुरुषेऽर्थं दसत्वात् ॥ सोऽखण्डच्छे
पि मोक्षोपदेशोपपत्तिमाशंक्याह परीति ॥ तदा चेतनं संतं मुमुक्षुमचेतनोसीति ब्रुवच्छास्त्रं विपरीतवादि स्यादित्वा पुंसोनर्था
येति ॥ कृत्वा स्यार्थप्रमाणमिति योजना ॥ अस्तु शास्त्राप्रामाण्यं नेत्याह । न चेति ॥ आत्मनोऽनजत्वेऽत्यपि सत्याधेसदनव
च्छिन्नतया शास्त्रप्रमेयमित्याशंक्याह यदिवेति ॥ शास्त्रोक्ते विश्वासबुद्धौ हेतुमाह श्रद्धानतयेति ॥ अनात्मन्यात्मदृष्टिं
नासौ सजेदित्यत्र लौकिकं दृष्टान्तमाह यथेति ॥ कश्चित्किल पश्चिमचेताः गृहनविपिनसंसमीपसंचारिपथिपतिं ।
तमतिदुःखितं विनष्टदृष्टिद्वयमपि पुरुषापशदमवलोक्य तदंतिकमुपसृत्य विपललंबमिच्छन्नपहृत्य किमिति
वतातिबहुतरगोगवयादिसंचारसंकीर्णे दुर्गमार्गे प्रचुरपारीणतरद्वरोपणादिपरिवृतेऽकांतारपरिसरे परिहाय
यसंपदमास्यते सच विवेकपरिचयविधुरो मधुरां गिरमुपश्रुत्य सहासमं जोषदेवोपहृतोपहतनयनयुगलोवता
हं कयापि विधया पंथानमेन मासाद्य नानाविधवंधुनिकरपरिपूरितमतिसविधमपि नगरं जिगमिषुरिहैवास
मर्थो बहु तिथमत्वचाहं संप्रतितु भवतो दृष्ट्या दृष्टेः स्वदृष्टिपथमवतीर्णस्समासादितमनोरथः शोकसागरादुत्तीर्ण
मात्मानमाकलयामि लब्धलक्ष्यो निर्वृतोस्मि सच विप्रलिप्सुः शिक्षाविपक्षमुक्तायमभ्याशे देशनिवासि न मुष्णाप्तिचिरं
तमाकलय्यास्य तु पृष्ठपुच्छं गृहीत्वा गच्छ तु भवानेष त्वामभिमतं नगरं नेष्यतीत्यावाच्य तदनुमोदनपुरस्सरं पुरुषप
शुमानीय तदीयलांगूलं ग्राहयामास च गृहीततदीयनालधिर्विविधावेदनास्तत्र हितारतस्ततोनीयमानोऽनु
भवन्नपि नगरं जिगमिष यातत्प्राप्यादिष्टुय प्रतादृष्यास्वयमुपात्तप्रबलबलीवर्दपुनः चरमसंगीगं परित्यक्तुं नै
व धियं दधार सच भयो भयोभयसीर्यातनाः प्रतिलब्धापेक्षितमप्रतिपद्येव महति मोहसागरे निपतितस्तथैवान्यो
नायमपि श्रद्धालुत्वादनात्मनि श्रद्धाहितामात्मदृष्टिं मत्वजन्नर्थनागी भवेदित्यर्थः ॥ आलाजडादृष्टत्वात् तस्मात्
लात् परसात्विवदित्यतिरिक्तात्मधियापुरुषार्थभागीस्यादित्याशंक्यागमविरोधान्मैवमित्याह ॥ तत्र ब्रह्मत्विति किं चेति
आत्मज्ञानाभावे दोषमाह । तथेति ॥ विहतिर्मुक्तिश्चात्काभावः ॥ अनात्मनि दृष्टत्वे दोषमाह ॥ नर्थं चेति ॥ तास्ते प्रेत्यापि

आनंद० गच्छंतीयोकचात्मप्रत्तनोजनादित्रिश्रुतेरित्यर्थः। परमतेतन्निष्ठानुपपत्तेः। सत्तात्मत्वोपदेशनिष्ठतासतप्तेतनत्वमेवक्ष्यमितु
पसंहरतितस्मादिति। नन्वानत्वारोपेपापिशास्त्रेष्वकनोपदेशात्कथंतद्यथाभक्तमेवोपदिशतीतिनियम्यतेअत्राहएवंचेति
३५ कस्यचिद्दारोपितचोरत्वस्यसत्येनतप्तंपरशुंगृह्णातीमोक्षोदृष्टःतद्दृष्टान्तेनसत्येब्रह्मणिअभिसंधिमतोमोक्षोदास्तद्य
थापरशुंतप्तप्रतिगृह्णातित्पत्रोक्तःसचतत्त्वतोवस्तूपदेशेसंभवतीत्यर्थः। सदात्मत्वोक्तेरारोपितार्थत्वेपिसत्याभिसंधि
सिद्धिर्यस्यस्यादेवेत्यादिप्रधानवाक्येनदृष्टेत्याशंक्याहान्यथेति। उक्तंप्रधानेमहावाक्योत्थज्ञानमिदमोच्यतेतस्य
संपन्नमात्रत्वेनानित्यफलत्वेफलितमाहतत्रेति। मोक्षस्यतद्वादिभिनित्यत्वोपगमादित्यर्थः। मोक्षोपदेशस्यपरपक्षे
ह्यनुपपत्तिमुक्तोपसंहरतितस्मादिति। दृष्टान्तेगौणत्वमंगीकरोतिकल्प्येत्विति। इतश्चात्मशब्दस्यदृष्टान्तेनप्रधान
विषयतयानगौणतेत्याहापिचेति। मुख्यार्थयोगेगुणयोगश्चगौणत्वहेतुःतदभावेपितत्कल्पनातिप्रसंगिनीतिहेतुं
त्तरमेवस्फोरयतिक्वचिदिति। अग्न्यादिशब्दानांमाणवकादिषुगौणत्वदृष्ट्याहनादिघपितत्प्रसक्तेरित्याहहस
र्वत्रेति। गौणत्वंनिरस्यसाधारण्यंपुनरस्यितुमनुवदतियत्विति। एकत्रमुख्यश्शब्दस्यतद्योगादन्यत्रवृत्तिसंभवेत
त्राविशक्तिकल्पनेगौरवात्र्वेदमित्याहतन्नेति। क्वचित्त्वगत्यानेकार्थतेत्यर्थः। प्रधानमात्मशब्दस्यमुख्योर्थस्तद्विवे
कार्येन्यत्रतच्छब्दतेत्याशंक्यास्यादिनिमित्तस्यचेतनेमुख्यत्वात्तत्रैवात्मशब्दस्यमुख्यतेत्याहतस्मादिति। कथंतर्हिक
ताक्षेपादिवाक्यमित्याशंक्याजीवेक्याध्यासात्पंचकोशात्मकतानामिंद्रियाणांचात्मशब्दत्वंपरमात्मन्यारोपात्तथाप्रधा
नस्यप्रकृतेरित्याहचेतनत्वेति। आत्मापुपाधेरात्मशब्दस्यचेतनेमुख्यत्वेप्रधानेपितथैवतन्मुख्यत्वसिद्धेःसाधा
रण्यमित्याशंक्याह। साधारण्येपीति। परमसूक्ष्मशब्दात्मकप्रकृत्यर्थोपिनिमशंक्यातज्ञाप्यसिद्धेस्तद्विषयत्वमात्म
शब्दस्यपर्शाकं निश्चेतुमित्याशंक्यशंकेरर्थ्यंतस्यचिदात्मनिनिरंकुशमयायस्त्वमित्याहनचेति। अत्रेतिप्र ३५
करणोक्तिः। किंविशेषकरणमुपपद्यतेत्यर्थः। कथंतर्हिचेतनविषयत्वेप्यस्याशंक्यक्रमेणप्रकरणोपपदेदर्शय
तिप्रकृतंत्विति। चेतनसंनिधानेपितस्यतत्त्वमसीत्यचेतनप्रधानतादात्म्योक्तेरहेतुःसंनिधिरित्याशंक्याहन

डीति। चेतनेप्रकरणादिनावेफलितमाहतस्मादिति। जीवेनात्मनासआत्मेतिचवाक्यमिहेत्युक्तं। आत्मशब्दस्य
धारण्येदृष्टान्तंज्योतिःशब्दंविघटयतिज्योतिःशब्दोपीति। कथंतर्हिवसंतेवसंतेज्योतिषायजेतेत्यत्रकालविशेषप्र
त्तज्योतिःष्टोमेनज्योतिःशब्दस्तत्राहाध्वनादेरिति। कतमानिज्योतींषीत्युक्त्वाचेतनानिवाचवतिज्योतींषियएतस्यस्तो
मास्यपर्याकारेणकल्पितज्वलनेनसादृश्यं। त्रिवृदादिस्तोमानांफलप्रकाशकंततोज्योतिःष्ट्वेनिरूपितत्रिवृदादि
स्तुतिसमुदायत्वात्ज्योतिष्टोमेनज्योतिःशब्दस्तस्यादेकस्यात्मशब्दस्यानेकसाधारण्येनदृष्टान्तोदाहरणमित्यर्थः। आ
त्मशब्दादितिपूर्वसूत्रोक्तहेतुसाधकतयातच्छेषत्वेनसूत्रंव्याख्यायाधुनास्वतंत्रहेतुपरतयाव्याकरोत्यथवेति।
निरस्तगौणत्वस्यसाधारणत्वस्यचशंकायस्मात्सत्तथा तस्मान्नाधवस्तात्पर्यतयात्मशब्दंव्याख्यायेतिसंबंधः। सत
श्चेतनस्यचतादात्म्यवचनंपूर्वसूत्रोक्तोहेतुःतद्यनिष्ठस्यमुक्तिरूपपरानंदेसाक्षेश्चचितानप्रधानेकमितिहे
त्वंतरमिहोच्यतइत्याहतत्रइति। चेतनाचेतनयोरैक्यायोगादचेतननिष्ठतयाचेतनस्यमोक्षोपदेशासिद्धेः। सिद्ध
मुपसंहरतितस्मान्नेति। यथाकश्चिदरुंधतींदर्शयितुंनिकटस्थांस्थूलांताराममुंसेतिदर्शयति। एवंदुर्ज्ञेयत्वा
दात्मत्वस्यादौप्रधानात्मत्ववचनात्स्वेवसच्छब्दमितिशंकतेकुतश्चेति। सूत्रमुत्तरहेयत्वेति। तद्व्याख्यातुंहेय
त्वोक्तिंप्रतियोगिनीप्रसंजयतियदीति। एवमुक्त्वातन्निराकरणंपंकप्रक्षालनमनुसरतीत्याशंक्यपरोक्तदृष्टान्ते
नपरिहरत्यपेति। प्रतियोगिप्राप्तिमुक्त्वातन्निषेधंसूत्रार्थमाहनचेति। तत्रहेतुःसन्मात्रेति। अन्नतजडशक्ति
शबलेसतितत्त्वमसीतिसत्पदविधानादसत्याकारंसआत्मेतिचिद्रूपत्वविधानाज्जडाकारंचबाधित्वासत्यैकरस
चिदात्माकारायाःपरोक्षप्रमितिस्तत्त्वेनैवबुद्ध्यादर्शप्रेषएसमानिदर्शनात्। प्रकृतसदात्मत्वाप्रत्याख्यानात्तत्त्वम
सीत्यमुख्यात्मत्वोक्तिस्युक्तेत्यर्थः। पूर्वोत्तरहेत्वोःसंभूयप्रमापकत्वेकृतंचकारेणेत्याशंक्याहचशब्दइति। हे
यत्वावचनाभ्यांप्रधानस्यनिरासेकिंप्रतिज्ञाविरोधोस्तीत्याशंक्याहस्वयत्वोक्तिमुपेत्यचकारार्थंस्फुरयतिसत्य
पीति। प्रसंगंप्रकटयितुंप्रतिज्ञास्वरूपमाहकारणेति। हेश्वेतकेतोतमप्यादेशमादिप्रश्नतइतिशास्त्राचा

यौक्तिकस्यैव स्वप्नादृष्टः प्रष्टवान्॥ सिलक्षमाचार्ययेन श्रुतेन शास्त्रतोन्यश्रुतमपि श्रुतं भवति येनमतेन तर्कतोन्यमत
आनं० मपि मतं येन विज्ञातेनान्यदविज्ञातमपि विज्ञातं। ननु श्रोतव्यादिशिष्टमिति पितृवाक्यस्यार्थः अन्यज्ञानादन्यन्न ज्ञेयमि
५० ति पुत्रो ब्रूते कथं त्विति॥ नान्यत्वं कार्यस्य कारणादित्याह यथेति। ज्ञातेपि मृत्पिण्डे कुतस्तद्विकारधीरित्याशंक्याह वाचे
ति। या विकारः स वागालंबनमुच्यते परं न वस्तुतोस्तीत्यर्थः॥ तत्र हेतुर्नामधेयमिति॥ नाममात्रं नार्थोस्ति चेत्तर्हि घ
टादिवदसत्यत्वसंभवात् कारणस्यापि कथं सत्यतेत्याशंक्याह मृत्तिकेति॥ उक्तदृष्टान्ताद्दाकाशादेरपि मृषात्वात्का
रणस्य सन्मात्रस्यैव सत्यत्वात्तज्ज्ञाने ज्ञातव्यशेषो नेति दार्ष्टान्तिकमाह एवमिति कार्यस्य कारणमात्रतोपगमात्पर
स्यापि प्रतिज्ञासिद्धिरित्याशंक्याह नन्वेतिप्रतिज्ञाविरोधफलमाह तस्मादिति॥ तत्रैव प्रश्नपूर्वकं हेत्वंतरमाह
कुतश्चेति। प्रधानमसच्छब्दवाच्यमित्यत्र चित्तत्तिर्विवार्ना चिदात्मनि विवेकयादिति व्यधिकरणो हेतुरित्याशंक्य
प्रकरणाचानुसंधानपूर्वकं सूत्रं व्याचष्टे इष्टं तदेवेति। यत्रसुप्तो पुंसः स्वपितीत्येतन्नाम भवति तदा पुरुषः सता संपन्नस्ते
नैकीभूत इति योजना॥ प्रकरणेनेकप्रमितेः सच्छब्दजन्यास्यैव चिद्बिबात्वान्वयधिकरणत्वेति सत्येश्चैवत्वसत्य
मित्यमिति॥ तत्र लौकिकप्रसिद्धिमाह तस्मादिति। तदथ्वार्थं स्फुटयति स्वं हीति। उक्तश्रुतेस्तात्पर्यमाह एवेति।
नामनिरुक्तिश्रुत्युदाहरणं व्याचष्टे स्वशब्देनेति॥ कथं निन्द्रविषयागतिरात्मानमेव विज्ञापीयात् कुर्यादित्याशंक्योपसञ्चा
ज्ञय धीरित्याह यपि पूर्वस्येति॥ प्रसिद्धिमेव प्रकटयति भवतीति देवतिर्गत्यर्थस्यापि पूर्वस्य लयार्थत्वेपि कथम
नाधनं तस्य लयः स्यादित्याशंक्यान्तरीयलयस्योपाधिकत्वं वक्तुं जागरितमनुवदति मनइति। बुद्धिपरिणामा एव
वोपाधयस्तैरस्यार्थविशेषयोगाच्चक्षुरादिन्द्रियेस्तानेव स्थूलानर्थान्पश्यन् जीवस्तद्विशेषेण स्थूलदेहेनेव्या ५०
रोपमापन्नो जागर्तीति व्यवह्रियते इत्यर्थः॥ स्वप्नमुपन्यस्यति तदासनेनेति जाग्रद्वासनाभिर्विचित्राभिर्विशि
ष्टो मनोमात्रोपाधिर्जीवः स्वप्नानुस्वाव चान्यवासनामात्रं हि दृशानन्तुभवन्नेवमेव खलु सोम्येत न्नाम इतिमन।
शब्दवाच्य इति प्रागुक्तोपनवलीत्यर्थः॥ तथापि कुतोस्य लयोक्तिरित्याशंक्याह॥ स इति। स्थूलसूक्ष्मचोपा

हीति॥ उक्तं दृष्टान्तेनमे दमध्यमधियां ध्यानव्यवहारायत्रत्वपुन्मानकल्पनेति दार्ष्टान्तिकमाह
तद्वदिति॥ अवशिष्टं हेतुद्वयं निराचष्टे स्थानेति॥ सूत्रतात्पर्यमाह हेति॥ तमेवपरिहारमुक्तानु
वादद्वारा स्फोरयति॥ यदपीति तत्रसूत्रावयवं हेतुत्वेन योजयति। यत इति॥ स्थानविशेषो बुद्धि
रादिस्थश्चक्षुरित्यादिः॥ द्वयोरपि परिहारं संक्षिप्य विभज्य दर्शनीयत्वाद्देसंबंधव्यपदेशं प्रत्याह
संबंधेति॥ भेदव्यपदेशोपि स्थानविशेषादितिपदं योजयति तथेति व्यपदेशयोरोपाधिकत्वे प्र
काशदृष्टान्तं व्याचष्टे प्रकाशेत्यादिना॥ आदिशब्देनोक्तमुदाहरणान्तरमाह यथा वेति॥ एवमेकस्मि
न्नपि ब्रह्मण्युपाध्यपेक्षावेतो व्यपदेशाविसाह लद्दिति॥ मुख्यव्यपदेशद्वये कुतस्तदोपचारि
कत्वमुच्यते तत्राहोपपत्तेश्चेति॥ तत्र संबंधव्यपदेशे सूत्रं योजयति उपपन्नश्चेति॥ अत्रेति ब्रह्मा
त्म त्मनोरुक्तिः॥ औपचारिकस्यैव संबंधस्योपपत्तिमुपपादयति स्वमिति॥ मुख्यसंबंधासंभवे सा
धयति स्वरूपस्येति॥ संबंधस्य द्विष्टत्वादेकस्मिन्नतद्योगमाशंक्याहोपाधीति॥ इदानीमौपचा
रिकं भेदमादाय सूत्रं योजयति तथेति॥ भेदव्यपदेशस्य मुख्यत्वमेव न त्वौपचारिकत्वमन्यत्राह
देवेत्याशंक्याह तथा चेति॥ स्वपत्ते हेत्वन्तरमाह तथेति सूत्रतात्पर्यमाह एवमिति॥ ब्रह्मणोद्विती
यत्वं तत्त्वं स्वपत्वहेत्वन्तरमेव सूत्रयोजनया विशदयति तथेति यथासत्यादिव्यपदेशोन्या
नवस्त्वंतरधीस्तथेतियावत्॥ अन्यत्रापि तमुदाहरति तथा हीति॥ तस्यैतावत्स्यैव व्यासे धस

आनंद० हमेवेति ॥ अहंकारस्य सर्वात्मत्वप्राप्तिं प्रत्याह तथैवेति ॥ निंदानुपपत्त्या चेदं निषेधं दर्शयतीति स
४१ र्वमिति बाधया सामानाधिकरण्यं दर्शितं सिद्धिरित्याह अहमेवेति ॥ आर्थिकीं निषेधश्रुतिमुक्त्वा सा
क्षाद्वचनतस्तामाह नेहेति ॥ यस्मात्परमित्यत्र तेनेदं पूर्णं पुरुषेणेत्युत्तरेणास्य संबंधः ॥ सेत्वादिव्यप
देशेऽस्मिन्दर्शितवाक्यानां विशेषमाह स्वप्रकरणेति ॥ अस्मिन्नेवार्थे हेत्वंतरमाह सर्वांतरेति ॥ ब्रह्म
णो द्वयेऽपि सर्वगतत्वं सर्वात्मत्वं च कथ्यते आयामशब्दादिनेति ॥ सत्त्वं प्रकरणेनेत्याह आदिनेति ॥ सेत्वादिव्यपदेशा
नामनिरासे परप्राप्तिवेधनाश्रयणे च सर्वगतत्वमाकाशस्येव ब्रह्मणः स्यादित्याशंक्याहान्य
थेति ॥ तत्र सेत्वादिव्यपदेशनिरासे सर्वगतत्वासिद्धिं स्फुटयति सेत्वादीति ॥ परनिषेध
नाश्रयणेऽपि तद्वत्सिद्धिं साधयति तथेति ॥ परिच्छेदप्रसक्तिरिष्टैवेत्याशंक्याह अविशिष्टं व्याचष्टे सर्वे
ति ॥ आदिशब्दः स्मृतेरस्मिन्नर्थेऽपेक्षितया प्रयुक्तः ॥ तत्र श्रुत्या सह स्मृतिरुदाहृता ॥ न्याय यस्त्वप रि
च्छिन्नत्वे सत्यनित्यत्वादिलक्षणो यावद्विकारस्तत्रोक्तः ॥ न च सर्वकर्तृसंयोगित्वं सर्वगतत्वसत्त्वे हे ४१
तुः स्यादिति ॥ युक्तं तत्कल्पनाधिष्ठानतया ब्रह्मणः सर्वगतत्वोपगमात् ॥ द्वितीयमनवच्छिन्नं ब्रह्मे
ति ॥ ब्रह्मातिरिक्तेऽर्थे निषिद्धे ब्रह्मणो निर्विशेषत्वात्फलदातृत्वमित्याशंक्य व्यवहारतस्त
दुपपादयितुमुपक्रमते फलमिति ॥ पूर्वाधिकरणयोस्तत्पदलक्ष्यं ब्रह्मोक्तं इदानीं तत्पदस्या
र्थमीश्वरं दर्शयितुमधिकरणस्य तात्पर्यमाह तस्यैवेति ॥ कुतो निर्विशेषत्वेनोक्तस्य फल

हेतुत्वेत्याशंक्याह व्यावहारिकमपीति ॥ निर्विशेषस्यैवाद्वितीयपूर्णस्वभावादन्यत्वं फलहेतुत्वा
त्मकः स्वभावः ॥ तात्पर्यमुक्त्वा विचारविषयमाह यदीति ॥ इष्टं देवत्वाद्यनिष्टं तिर्यक्त्वादि व्यामिश्रं मनु
ष्यत्वं कर्मफलत्वं साधयितुं संसारावस्थागतत्वमाह संसारेति ॥ त्रिविधकर्मफले लोकानुभवं
प्रमाणयति प्रसिद्धमिति ॥ उभयोरपि फलहेतुत्वश्रुतेरुक्ते विषये संशयमाह किमिति ॥ सर्व
गतत्वेन फलदातृत्वस्य सत्यपि समानन्यायत्वे कर्मपदिष्टं निराकरिष्यन्नादौ सिद्धांतमुपक्रम
ते तत्रेति ॥ वाच्यार्थोक्तेर्लक्ष्यार्थोक्तिविशेषत्वात्तस्य च वाक्यार्थधीहेतुत्वाद्ध्रस्वपादादिसंगतयः पू
र्वपक्षे कर्मण एव फलदाने सामर्थ्यादीश्वरस्याकिंचित्करत्वं सिद्धांते स्वतंत्रस्य कर्मयोगसा
मर्थ्यलक्षणद्वारा परस्यैव तद्भावात्तस्यार्थवत्त्वं च दृष्टेष्वन्नसंस्कारादिवत्तृष्णादिसंस्कारात्फ
लोत्पत्तौ नश्वरादप्यपेक्षितिरिति शंकते कुत इति ॥ तत्र सौत्रं हेतुमवतार्य व्याकरोत्युपपत्तेरिति ॥ देश
कालविशेषाभिज्ञत्वे योग्यत्वमाह सर्वेति ॥ कर्मानुरूपफलदातृत्वहेतुमाह स्व[illegible]विम
तं विशिष्टज्ञानवद्दातृकं ॥ कर्मफलत्वात् ॥ सेवादिफलवदित्यर्थः ॥ कर्मपक्षे क्रियातो वा त
ज्जन्यापूर्वाद्वा फलमाशंक्य दूषयति कर्मण इति ॥ क्रियारूपं कर्म क्षणिकं तच्च निष्टं वा फलमुत्पा
दयेदुत्पाद्य वा फलं नश्येन्नाद्य इत्याह नाभावादिति ॥ द्वितीयं शंकते स्यादिति ॥ तदेव तर्हि योग

आनंद० स्यादित्याशंक्य कर्म्मान्तरप्रतिबंधमलदाभोक्तुमयोग्यत्वाद्वानैवमित्याह तदिति ॥ स्वर्गादिभोगस्यैवा
र्थ्यमानत्वेन फलत्वादनुज्यमानमपि फलं स्वरूपेणास्तीत्ययुक्तमित्याह तदपीति ॥ किंच स्वर्गनर
४२ कयोर्ऌतीन्द्रसुखदुःखत्वादननुभूयमानयोरसिद्धेः स्वरूपेण फलसत्वोक्तिरयुक्तेत्याह यदिति
प्रसिद्धिमेव व्यतिरेकद्वारा स्फोरयति नहीति ॥ कल्पान्तरमुत्थापयत्यथेति ॥ तस्य स्वर्गस्य चेत
नाधिष्ठितात्फलदातृत्वं नाद्य इत्याह तत्रापीति ॥ नद्वितीयस्तस्यैवाप्रामाणिकत्वादित्याह तदस्ति
त्वे चेति ॥ आप्तुत्तरं विनाशिनो यागस्य कल्पान्तरस्थायि फलहेतुत्वे श्रुतं सत्यादि वा स्वव्यतिरेकेणानुपलं
भनमपूर्वं कल्प्यत इत्यर्थापत्तिरत्र मानमित्याशंक्यार्थापत्तिरिति ॥ कर्म्म चिरराधितादीश्वरा
देव स्वाराधिनो यथोक्तफलसिद्धेर्मैवमित्याह नेश्वर इति ॥ श्रुतिविरुद्धत्वाच्च न फलहेतुत्वेन नि
योगकल्पनेत्याह श्रुतत्वाच्चेति ॥ सूत्रं व्याचष्टे न केवलमिति ॥ कर्म्मफलत्वादित्तया पूर्वोक्तोप
पत्तिस्तामेव श्रुतिमुदाहरति तथा हीति ॥ निरूपाधिकं रूपमुक्त्वा सोपाधिकमाह स वा एष इति अन्न
मात्सर्मंतात् प्राणिभ्यो ददातीत्यन्नादः वसुधनमर्थिभ्यो ददातीति वसुदानः ॥ तदुक्तय मन्त्रं वसु च ४२
कर्म्मफलं संप्रति परत्वेनपत्तयति ॥ धर्म्मं जैमिनिरत इति सूत्रं विभजते जैमिनिरिति ॥ श्रुतेरित्युक्तं व्यनक्ति
श्रूयत इति ॥ कथमेतावता फलहेतुत्वं कर्म्मणः सिद्धं तत्राह तत्र चेति विधिश्रुतिर्विध्यर्थस्त
स्य लिंङाद्यर्थस्य प्रेरणात्मनो यागो विषयस्तु ...त्रा यावद्वगमो यः स्वर्गस्य साधनमितिगम्यते
घा

पुरुषाभिलषितस्वर्गसाधनत्वाभावे यागस्य तत्र प्रेरणायोगादित्यर्थः ॥ पुरुषप्रवृत्तेरर्थभावनायाआ
व्याकांक्षत्वादेकपदोपात्ततया यागस्य संनिहितत्वाद्भाव्यत्वेन संबंधेन विषयत्वेनेत्याशंक्याहृत्वान्य
थेति ॥ योग्यतायाः संनिधेः प्रकाशान्तरंगत्वा यागस्य च क्लेशरूपत्वेन फलार्थप्रवृत्तभावनाभाव्य
त्वायोगात्पुरुषविशेषणत्वेन श्रुतस्वर्गादेरेव भाव्यत्वेनोद्देश्यरूपभाव्यत्वसिद्धेः पुरुषार्थे पुरुषस्य प्रवृ
त्तेः स्वर्गादेरेव भाव्यत्वं यागस्य तु करणतया साध्यतेत्यर्थः ॥ कर्म्मणः कालान्तरीयफलदातृत्वाभिकत्वादि
त्युक्तं स्मारयति नचेति ॥ श्रुत्यवष्टंभेन निराचष्टे नेति ॥ तत एवाभ्यन्तरा स्मृतिश्चेदिति उपपत्तिमेव व्य
तिरेकद्वारा दर्शयति नचेति ॥ कर्म्मणो व्यापारमुपेत्य कर्म्मणो वेत्युक्तं फलोत्पत्त्यन्यथानुपपत्त्या
कल्प्यमानत्वं गृहीत्वा फलस्य वेत्युक्तमुपपत्तेश्चेति ॥ द्वितीयं हेतुं विवृणोत्युपपद्यते चेति ॥ तत्र विधिश्रुतेरि
त्यादिरुक्तप्रकारः ॥ श्रुत्युपपत्तिभ्यां स्वपक्षमुक्त्वा सिद्धान्तं धूत्वाहेश्वरस्त्विति ॥ एकरूपात्कारणान्नानेक
रूपं कार्यं कार्य्यवैचित्र्यानाकस्मिकत्वादित्यर्थः ॥ शुभाशुभं दत्त्वेरागद्वेषादिमत्वापत्तेश्च नेश्वरा
त्फलमित्याह पूर्वैव कर्म्मेति ॥ ईश्वरस्य फलदातृत्वे कर्म्मनिरपेक्षत्वेनैव यथर्थत्वोपान्तरमाहतदिति ॥ उक्तदो
षनिवृत्त्यर्थमपूर्वादेव फलं जनेश्वरादित्युपसंहरति तस्मादिति ॥ ईश्वरात्फलमिति सिद्धान्तयति पूर्वं
त्विति ॥ उत्तरपक्षप्रतिज्ञां विभजते बादरायणस्त्विति ॥ परपक्षनिषेधप्रतिज्ञां प्रकटयति केवलादिति
ईश्वरानपेक्षादिति यावत् कथमीश्वरस्यापि केवलस्य फलहेतुत्वं तत्राह कर्म्मेति ॥ यद्याप

आनं.गि रपत्ते कर्मापेक्षादपूर्वादपूर्वापेक्षाद्वा कर्मणोऽस्तु फलमित्युपगतं तथात्वदन्यतरापेक्षादीश्वरादेव फल
मस्तु तथा च न वैषम्यादी त्यर्थः ॥ तत्र प्रश्नपूर्वं प्रमाणमाह कुत इति ॥ अपूर्वस्याचेतनस्य केवलस्या
४२ प्रवृत्तेस्तस्यैव फलदातृत्वकल्पनायां दृष्टविरोधाद्देवतापूजात्मकत्वाच्च यागस्य पूज्यमानदेवताप्रसा
दद्वारा फलवत्त्वादुक्तश्रुतार्थापत्तेरीश्वरेणैव फलं तत्र यादृश्यमप्रमाणमिति मत्वा हेतुं व्याचष्टे श्रुतेति
श्रौतं हेतुव्यपदेशमुक्त्वा स्मार्त्तं कथयति स्मर्यते चेति ॥ तस्य फलदातृत्वं स्वजावस्यमनेति यावत् लतत
स्तस्मादाराधितादस्तु फलमित्यर्थः ॥ हेतुव्यपदेशादित्यस्यार्थान्तरमाह सर्वेति ॥ ईश्वरस्य सत्यादि हे
तुत्वेऽपि कथं फलहेतुत्वं तत्राह पूर्वं त्विति ॥ यत्तु विचित्रस्य कारणस्येत्यादि तत्राह विचित्रेति ॥ ॥
॥ इति श्रीमत्परमहंसपरिव्राजकश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते शारीरक
भाष्यविभागे न्यायनिर्णये तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ॥ ॥ श्री ॥ ॥
ॐ कर्मांगसेगिविधोक्तिप्रसंगाद्ब्रह्मज्ञानस्य कर्मांगत्वमाशंक्य परिहृति पुरुषार्थ इति परापरब्रह्म
विद्यानां गुणोपसंहारोऽत्र परिमाणमवधार्यतासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वमवस
एयाऽसौ निरूप्यते तत्र कर्मानपेक्षाया अमर्षाकामप्रतिकर्त्तव्यतान हि तां विना कारणतेत्याशंक्य
यज्ञादयः श्रवणादयः शमादयश्च विद्योत्पत्तुपयोगिन्य इति कर्त्तव्यता निरूप्यते तदभिप्रेत्याहा ४२
येति ॥ फलभेदाभेदौ विनाऽन विद्याभेदाभेदौ न च तौ विना गुणोपसंहारानुपसंहारौ ॥ तेन प्रागेव वि

धानां पुमर्थहेतुत्वे स्थिते प्रथममौपनिषदमात्मज्ञानमधिकृत्य वादिविप्रतिपत्त्या संशयमाहौपनिष
दमिति ॥ अनेन चात्मज्ञानविशेषणेन शास्त्रसंगतिरुक्ता ते सिद्धे फलवत्त्वे स्वतन्त्रमेवेदं फलवदिति सा
धनाद् अध्यायपादसंगती पूर्वपक्षे समुच्चयपक्षसिद्धिः सिद्धान्ते केवलस्य ज्ञानस्य कैवल्यसाधनतेति
मत्वा पूर्वपक्षमग्रे दर्शयिष्यन्नादौ सिद्धान्तमाह सिद्धान्तेनेति । सूत्रस्थां प्रतिज्ञां योजयत्यस्मादिति
तन्नैव प्रमाणं दृष्टमिति कुत इति सूत्रावयवेनोत्तरमाह शब्दादित्याहेति । प्रमाणं विवृणोति तरत्याही त्या
दिना ॥ सगुणब्रह्मज्ञानस्यापि स्यात्तथैव पुमर्थहेतुतेति वक्तुं तद्विषयां श्रुतिमाह य आत्मेति ॥ निर्गुण
विद्याविषयं वाक्यान्तमाह ब्रह्मेति ॥ उक्तश्रुतिषु विद्याफलयोः साध्यसाधनत्वं न जातीत्याशंक्य तयोरे
कपुरुषसंबन्धसामर्थ्यादिवत्तद्धीरित्याशयेनाह केवलाया इति पूर्वपक्षमवतारयत्यथेति ॥ सिद्धा
न्तोत्थानन्तरमात्मज्ञाने विषये फलश्रुतिमधिकृत्य मीमांसकश्चोदयतीत्यर्थः ॥ पुरुषार्थवाद इत्य
र्थस्त्र हृष्यं तन्त्रेणोपात्तं तेन पुरुषार्थार्थवाद इति द्रष्टव्यं ॥ तत्वज्ञानं कर्माङ्गकर्तृद्वारा प्रयोगविधि
नादेयमादीयमानकर्माङ्गकर्त्राश्रयेण शास्त्रसिद्धित्वाद्यजमानसंस्काराञ्जनादिवदिति मत्वा शेष
त्वादित्येतद्व्याचष्टे कर्तृत्वेनेति ॥ तत्वज्ञानं प्रयोगविधिनादेयं साध्यफलोक्तिश्रुत्यत्वे सति कर्माङ्गा
श्रयत्वात्तपर्णमयीत्वादिति प्रयोगः स्वतन्त्रफलस्य कथं प्रोक्षणादिवत्कर्माङ्गतेत्याशंक्य पुरुषार्थ
वादस्तत्रस्यार्थमाह त्यल इति ॥ वेदार्थजिज्ञासायां तत्वनिर्णयार्थं संशयादिप्रतिन्यासी सो गुरोरग्रे शि

आनं द॰ क्षेण दर्शनीयो गुरूपाचतन्निरासेन तत्त्वमाविष्करणीयमिति शिष्याचार्यद्वयी चित्तुंजेमिति निग्रहणं नप्र
५५ तिपन्नत्वाच्छिष्यस्य तद्योग्यत्वफलश्रुतेरर्थवादत्वे सूत्रितं दृष्टान्तं व्याचष्टे यथेति॥ पर्णमयीड्ले यज
मानस्यांजनादिसंस्कारे प्रयाजादिकर्मसु चक्रमेण फलश्रुतीराह यस्येत्यादिना॥ साच फलश्रुतिर्न
फलपरा फलवत्क्रत्वर्थत्वात्पर्णतादेः फलशेषत्वायोगादतः सार्थवादएवेति पर्णमयीत्वाधिकरणे
रमर्थितं तथात्मज्ञानेपि फलश्रुतिरर्थवादएवस्यादित्याह तद्वदिति॥ विनियोजकमानाभावादात्मधियो
कर्म्मांगत्वान्न तत्र फलश्रुतिरर्थवाद इति शंकते कथमिति प्रकरणादिनाक्रतुसंबंधेपि जुहूद्वारा पर्ण
मयीत्वस्य वाक्यात्क्रतुसंबंधवदात्मधियोपि कर्तृद्वाराद्वेदान्तवाक्यात्क्रतुसंगतिरिति पूर्ववाद्याह
कर्त्रिति॥ सोऽन्ती दूषयति नेति॥ तदेव विवृणोत्यव्यभिचारादिपोति॥ जुहुवदात्मज्ञाने कर्तुर्वा व्यभि
चारिहारमित्याशंक्याह कर्त्रेति॥ तस्याव्यभिचारित्वे फलितमाह तस्मादिति॥ किं देहातिरिक्तात्मज्ञानस्य
कर्मांगत्वं विनियोजकवाक्यान्निरस्यते किंवापहतपाप्मत्वादिविशेषितासंसार्यात्मविषयोपनिषद
ज्ञानस्येति विकल्प्याद्यं पूर्ववादिदूषयति नेति तस्याविषयद्वारान्ते हत्तुप्रवेशाच्च कर्म्मांगत्वं निषेद्धुं श
क्यमित्यर्थः॥ लौकिककर्मण्येपि कर्म्मदेहादिकं कर्मवत्कर्तृद्वारे व्यतिरिक्तज्ञानापेक्षेति कर्तुः स्वा ५५
धिकरणमित्याशंक्याह न हीति॥ सर्वथेति व्यतिरिक्तज्ञानायोदित्यर्थः॥ तर्हि वैदिकान्यपि कर्म्माणि
कर्म्मत्वादितरवन्न व्यतिरिक्तज्ञानापेक्षाणीत्याशंक्याह वैदिके त्विति॥ कारीर्यादिनिवृत्त्यर्थं देहापातेत्या

दिविशेषणं॥ द्वितीयमालंबते॥ नन्विति॥ अनुपयोगित्वाद्विरोधित्वाच्च तस्य न कर्त्वंगतेति भावः॥ क्रत्व
पेक्षितं रूपं हित्वान्यद्विवक्षितमित्याह नेत्यादिना॥ जायादीनामात्मार्थत्वेन प्रियत्वमुक्त्वात्मा द्रष्टव्य
इति वदता जायादिनासंयोगेन संसारिणो भोक्तुरेव द्रष्टव्यत्वमिष्टं भोक्तृज्ञानं च कर्मसु प्रयुज्य
मतो भोक्त्रतिरिक्तमात्मरूपं न श्रौतमित्यर्थः॥ अपहतपाप्मत्वादिविशेषणस्य चोक्तार्थयुक्तत्वादतिरिक्त
मात्मरूपमेष्टव्यमित्याशंक्याहापरतेति॥ जन्मादिसूत्रमारभ्य तत्र तत्राप्य पंच ब्रह्मात्मपरतावेदान्तानां
मुक्ता तत्कथमपहतपाप्मत्वादिकीर्तनस्य स्वरूपार्थतेति शंकते नन्विति॥ अधिकमिति विशेषणस्य शं
काशंकितं द्वैतं वारयति तदेवेति॥ संसारिणः संसारीश्वरो रूपमिति व्याहतिं प्रत्याह पारमार्थिकमिति
ऐक्यप्रमाणं पूर्वोक्तं सूचयत्युपनिषच्चेति॥ पूर्वपक्षाक्षेपं समाधत्ते सत्यमित्यादिना॥ फलद्वारेणेत्या
त्मज्ञानं वेदान्तानां फलं तत्क्रत्वर्थं पुरुषार्थं वेति विचारद्वारेत्यर्थः॥ साधितस्येवाक्षेपस्य समाधिर्व्या
साधयन्नस्य फलमाह तदर्थायेति॥ किंच जनकादीनां विद्यया सह कर्माचरणदर्शनान्न केवलैव विद्या
मोक्षहेतुरतः सहानुष्ठानं विद्यायाः स्यात्तेषामात्मज्ञानेन कर्म्मांगत्वे लिंगमित्याह आचारेति॥ सूत्रं व्याचष्टे
जनको हेति॥ विदेहानामधिपतिर्जनको नाम राजा बहुदक्षिणसंज्ञेन यज्ञेनाश्वमेधेन वा बहुदक्षिणा
युक्तेन पुराकदाचिदीजे यागं कृतवान् केकेयस्य राज्ञो ब्रह्मविदो वाक्यमाह यक्ष्यमाण इति विद्यार्थि
नः समागतान् प्राचीनशालादीन् जगाद इति संबोध्याह यक्ष्यमाणोऽस्मि तत्र कमिति चिह्निनाना

आनंद० ध्यमिति राजोक्तवानित्यर्थः ॥ उक्तवाक्यानि विधार्थानि न कर्मपराणीत्याशंक्याह अन्येति । इतश्च ब्रह्मविदामस्ति
कर्मसंगतिरित्याह । तथेति । आदिपदेन व्यासयाज्ञवल्क्यादिसंग्रहः द्वितीयेन नारायणानुशासनादि गृह्य-
४५ ते ॥ कर्मत्यक्तं विद्वद्भिरेव केचिदित्येतावता विद्याशक्तैरपन्नवायोगात्केवलैव सा मुक्तिहेतुरित्याशं-
क्याह केवलादिति । अत्यायासमुपायं हित्वा न कोपि महायासं तमाद्रियेत इत्यत्र लौकिकन्यायमाह
केचेदिति । सप्तमीप्रवचनोक्तः शब्दः न केवलं विद्याबालिंगादेव कर्मत्यागः किंतु तत्रैव श्रुतेरपीत्याह तदि-
ति ॥ सूत्रार्थं विवृणोति यदेवेति । इतश्च न स्वतंत्रा विद्या पुमर्थहेतुरित्याह ॥ समन्वारंभणादिति । सर्वत्र
विद्यातिलमित्यादिना ॥ तं परलोकं व्रजंतं विद्याकर्मणी समनुगच्छत इति यावत् ॥ तदस्वातंत्र्ये लिंगान्तर-
माह तद्वत इति । तस्माकरोत्याचार्येति । तस्य कलं गृहमुपनयनं कृत्वा तत्रा स्वनन्तरं गुरोः शुश्रूषा-
रूपं कर्म विधायातिशेषेण शिष्टेन कालेन यथाविधानं पवित्रपाणित्वधा इत्यादि विलक्षन मन-
ति कृष्ववेदमधीत्यानंतरमभिसमावृत्य प्रतसमर्थं कृत्वा दारानाहृत्य कुटुंबे गार्हस्थ्ये स्थितः शुचौ दे-
शे स्वाध्यायाध्ययनं कुर्वन्न कर्मान्तराणि च विहितानि यथाशक्ति कुर्वाणो ब्रह्मलोकमभिसंपद्यत इ-
त्यर्थः ॥ अध्ययनशब्दस्य यथाश्रुतमर्थं गृहीत्वाशंकते नन्विति । अध्ययन विरोधेऽरवशाता दि- ४५
विधिवद्दृश्यत्वादर्थावबोधनंतो व्यापारोस्तीति प्रथमे तंत्रे समर्थितमित्याह नेत्यादिना ॥
इतश्च न स्वतंत्रा विद्या पुमर्थहेतुरित्याह नियमाच्चेति । नियमं विभजते कुर्वन्निति ॥ इहेदं शतं समाः श-

तसंख्याकान् संवत्सरान् यज्जीजिविषेत्तत्कर्माणि कुर्वन्नेवेति नियमविधिरेवं त्वयि नरे वर्तमाने सत्य-
श्रुतं कर्म न लिप्यते तेन त्वेन लिप्यस इति यावत् इतस्तस्मात्प्रकारादन्यथा प्रकारान्तरं नास्ति येनाकर्म-
लेपः स्यादित्यर्थः ॥ नियमांतरमाह तथेति ॥ जरामर्यं जरामरणाभ्यामधिकं तदेव विशदयति त्वस्येति ॥
श्रुत्यादिभिरात्मधियः सिद्धेऽकर्मणस्त्वेन तत्फलेनैव फलवत्वमित्युपसंहर्तुमितीत्युक्तं फर्वपदमम् व-
क्तिस्थान्तर्यत्सेवमिति सूत्रं योजयति तुशब्दादिति ॥ पक्षाविपरिवर्तमानमेव पक्षमनू दर्शयति य-
दिति ॥ अनुपपत्तिहेतुं प्रश्नपूर्वकमाह तस्मादिति ॥ अधिकोपदेशं व्यतिरेकेणोदर्शयति यदीति ॥
यः कर्ता कर्मांगं नासौ वेदांतवेद्यस्त्र ब्रह्म तद्वैष्णं न तत्कर्मांगमतस्तज्ज्ञानस्य कुतः शेषता कुतस्त-
रां फलश्रुतेरर्थवादतेत्यर्थः ॥ ब्रह्मात्मधीर्न क्रतुप्रयोगविधिनोपादेया तद्विरोधित्वादादौ यमानो दि-
तहोमविरोधमनुदितहोमवदिति मत्वाह प्रस्तुतेति ॥ बादरायणस्येत्यादिव्याचष्टे तस्मादिति ॥ उक्तात्म-
ज्ञानस्य क्रतुशेषत्वायोगस्तु छब्दार्थः ॥ अधिकोपदेशासिद्धिमाशंक्य तद्दर्शनादित्येतन्न प्रत्यवत्याह त-
थाहीति ॥ कल्पयेदिति तद्रूपं हित्वान्यदात्मरूपमनिष्टमित्युक्तं तत्राहय । रश्चेति ॥ आत्मनस्तु कामा-
य तत्पुत्रःप्रियो भवत्यात्मा वा अरे द्रष्टव्य इति वाक्यं ब्रह्मोपयदिद्विज्ञायां सत्यामेव ब्रह्मात्मकाभिप्रायमित्यत्र
त्र वाक्यशेषमाहास्येति ॥ यः प्राणेनेत्यादिवाक्यस्यैक्यपरमित्यत्र वाक्यशेषं दर्शयति योशनाये-
ति यएषो त्यादि ॥ वाक्यमपि तद्येत्यस्मिन्नर्थे शेषानुगुण्यमाह परमिति ॥ उक्तैः शेषैः संसा

आनं ६० रिणोयदधिकं ब्रह्म तस्योपा॥ इदि दिक्षां द्यायां सत्यामेव ब्रह्मणो जीवस्यात्यंतभेदाभावधिया दहरव्यादिवा
क्यमितिशंक्य तत्त्वनपेक्षितमात्मरूपं वेदान्तेषु विवक्षितमिति तदुपगमेन कश्चिद्विरोधोस्तीत्याह नेत्यादिना॥
४६ कुतो जीवब्रह्मणोरभिधोविरोधसदित्याशंक्याह तात्त्विको विरोधो नास्तीत्याह पारमेश्वरमिति। प्रातिभासि
कस्तु विरोधस्तात्त्विकाभेदाविरोधीतिमत्वाहोपाधीति। जीवस्य तात्त्विकं रूपं ब्रह्मैवेत्यत्र श्रुतिसंवादमाह
तत्त्वमितिसंपदादिविषयं तत्त्वमादिवाक्यं न वस्तुविषयमित्याशंक्याह सर्वं चेत्युपरोक्तं लिंगदर्शनं अप्र
स्तोह तुल्यं त्विति॥ उक्तमनूद्य सूत्रमुत्तरत्वेन योजयति यदित्यादिना॥ इतश्च विद्याया न शेषत्वमाह तत्र
वक्ष्येति॥ आदिशब्देन शुकादयो गृह्यन्ते॥ कथं तेषामकर्मनिष्ठत्वं तत्राह हेतावादिति॥ उभयथा लिं
गदर्शने संशयमाशंक्य परकीयलिंगनामन्यथासिद्धिं वक्तुमारभते विद्येति॥ तत्र यस्मा इत्यादि
लिंगदर्शनस्यान्यथासिद्धिमाह यत्तु प्रमाण इति॥ तत्रापि विधित्वान्न कर्मसाहित्यमन्यथा ब्रह्मविद्याया
मपि तत्संगादित्याशंक्याह॥ न संभवतीति तर्हि वैश्वानरविद्यायामिव तत्र स्यात्तत्रेण फलवत्त्वं कर्मांग
त्वांगीकारात्तत्राह एकत्वेति॥ येषां चात्र प्रविद्यामपि कर्म दृश्यते न तत्तेषां कर्म तद्विद्योद्भवात्प्राक्तनं तेषां
चाहंममाभिमानाभावेन चोदनाभावात्कथंचिदनुवर्तमानमपि तदाभासमात्रमिति भावः॥ परोक्तं ४६
श्रुतिमनूद्य तदुत्तरत्वेन सूत्रमवतारयति यदितीति॥ तद्विभजते यदेवेति विद्याशब्दस्य सामान्य
विषयस्य विशेषाकांक्षायां प्राकरणिकविशेषेणावच्छिन्नार्थत्वादिति॥ हेतुमाह प्रकृतेति॥ आत्म

धियस्तत्रादृष्टशंकां प्रत्याह प्रकृता चेति॥ परकीयं लिंगांतरं दूषयति विभाग इति॥ चोद्यमनूद्य पूर्वोत्तरत्वे
न सूत्रं व्याचष्टे यदपीत्यादिना॥ सामान्यश्रुतौ कथं विभागः स्यात्तत्र दृष्टांतमाह शतवदिति॥ समन्वार
भवचनस्य मुमुक्षुविषयत्वमुपेत्य कर्मसाहित्येन तल्लिंगं विभागादित्युक्तमिदानीं मुमुक्षुविषयत्वाद्विभा
गेपि न दूषणमित्याह नचेति॥ तस्या मुमुक्षुविषयत्वे सूत्रमाहाध्येति॥ संसारिविषये तद्विद्येत्यादि
वाक्ये विद्याशब्दार्थमाह तत्रेति॥ उक्तायां विधिविषया विहिता विद्या प्रतिषिद्धा च नन्वन्यस्यापि दर्शनादिरूपा
तथाभूतकर्मसाहचर्यादपि तथाविधैव विद्येत्याह कर्मापीति॥ प्रकृते वाक्ये विद्याकर्मणोरविशेषो
पादाने हेतुमाह यथेति॥ उक्तार्थवाक्यस्य संसारिविषयत्वे फलितमाहेवमिति॥ लिंगान्तरमनूद्य सूत्र
मादत्ते यच्चेति॥ यच्चेत्युक्तमित्यर्थः॥ सूत्रं विभजते त्याचार्येति॥ मात्रग्रहणेनार्थज्ञानमात्रं व्यवच्छिन्नमि
तिमन्वानः शंकते नन्विति॥ अविद्यावत्त्वाद्धीनत्वादिति॥ अध्ययनमात्रग्रहणमात्मज्ञानापेक्षं न कर्माव
बोधापेक्षमित्याह नेत्याहनेत्यादिना॥ वेदार्थत्वात्मदर्शनस्य ज्ञानमपि कर्मबोधवदधिकारिविशेषित
व्यमित्याशंक्याह यद्येति॥ पूर्वस्तत्रव्याख्यासमाप्ताविति शब्दः॥ जैमिनिलिंगान्तरमनूद्य सूत्रान्तरमाद
त्ते यदपीति॥ अविद्वद्विषयं नियमविधानमिति व्याचष्टे कुर्वन्निति॥ विद्वद्विषयत्वमुपेत्य परिहारान
तरमाह स्तुतय इति॥ एवं हि प्रकरणमनुगतमिति मत्वा सूत्रं विभजते कुर्वन्नेवेति॥ विशेषमेव विशिष्य
तियदपीति॥ स्तुत्यर्थं कर्मानुज्ञानमित्यत्र वाक्यशेषमनुकूलयति नेति तथापि कथं स्तुतिस्तत्राहेदिति

आनं०

५७

एवंकर्मकुर्वीत्यपित्वपिनेनेतो ब्रह्मभाष्या। विद्यायाम्मध्यमस्यासंसारापत्तिरस्ति यतो न कर्मालिप्यत इति तियोजना
गहीत्वादसंहरति॥ तस्येत्यमिति॥ पूर्वपक्षहेतुनेवं नुन्यथ्यस्यपक्षेहेत्वंतरमाह कामेति॥ इतश्च विद्यायानुक
र्मांगत्वमित्यर्थमाहापि चेति॥ स्वेच्छया कर्मसाधनप्रजादित्यागलिंगादपि विद्यायाः स्वातंत्र्यमित्याह
त्वंन्तरमेव स्फोरयत्येक इति॥ येषां नोस्माकमयमपरोक्षः सन्नात्मायं लोकः फलं तेषां किं प्रजया कारि
ष्यामह इति निश्चित्याग्निहोत्रादिन कुर्वंत इत्यर्थः॥ मोक्षस्यादृष्टफलत्वात्कथमुक्तनिश्चयात्प्रजादि
त्यागसिद्धिरित्याशंक्याह॥ नुचवेति॥ ब्रह्मधीनं क्रतुप्रयोगविधिनाथद्दयाक्रत्वंगसंबंधित्वेपि फलांतरयोगित्वा
द्रोदोहनवदिति। मत्वाह तोपीति॥ अधिकोपदेशात्दित्यत्रात्मनोशनायाद्यत्ययात्सद्धीनं कर्मांगमित्युक्तमिदानीं
मपरेयक्रियाविनाशोपमर्दकत्वादपि न तत्कर्मांगमित्याह उपमर्दं चेति॥ इतश्च न धीनं कर्मांगमिति केचकारा
र्थमाहापि चेति॥ हि त्वंन्तरं स्फोरयति कर्मेति॥ विद्यासामर्थ्यं प्रपंचोपमर्दफलितमाह वेदान्तेति॥
आत्मज्ञानस्यादियमानक्रत्वंगविरोधित्वे फलितंनिगमयति तस्मादिति॥ विद्यास्वातंत्र्ये हेत्वंतरमाहोर्ध्व
रेतस्स्विति॥ विद्याकर्मणो नांगांगित्वं ते मिथोव्यतिरेकित्वात्क्रतुगमनं नैष्ठिकवत्तवदिति मत्वा योजयत्यू
र्ध्वेत्यादिना॥ तथापि कथं कर्मांगत्वं विद्यात्याश्रमे ध्यतेत्राह न चेति॥ तेषामपि स्नानादिकर्मास्तीत्याशं० ५७
क्याह नहीति॥ बाधितानुवृत्त्यालस्याद्यपि वैदिकाग्निहोत्राद्यभावाच्च कर्तृत्वं ज्ञातात्मज्ञानस्येत्यर्थः॥ शब्दे
ह्येति सन्न्यासाद्यवश्याप्त्वर्थमाशंक्याह स्यादिति॥ सन्न्यासवचनोत्तरमाह तदपीति॥ कर्मनिधिक्तत्वं ध्या

दिविषयं पारिव्राज्यमित्याशंक्याह प्रतिपद्येति॥ ऊर्ध्वपाक रेत्य श्रुतिस्मृतिभ्यां गृहस्थस्यैवाश्रमांतराणां त्रयस्यै
वोर्ध्वरेतस्त्वोक्तिर्मैथुनासमाचारोपलक्षितं पारिव्राज्यमित्याशंक्याह तानुत्तेति॥ साक्षाद्विधिश्रुतिविरो
धर्थवादश्रुतिस्मृत्योर्न विधित्वमित्येत्ययुक्तं श्रुतीति॥ श्रुतिर्ब्रह्मचर्यादेव प्रव्रजेदित्याद्यादर्शितास्मृतिस्तु
तस्याश्रमविकल्पमेके ब्रुवते यमिच्छेत्तमावसेदित्याद्यो दाहार्याकिर्ध्वरेतास्त्याश्रमे वृत्ति विद्यायाः सिद्धौ फलितमा
हतस्मादिति॥ तस्याः स्वातंत्र्येकैवल्यात्सिद्धमुक्तिफलत्वेति वक्तुमितीत्युक्तं॥ पूर्वाधिकरणांतरसूत्रे
पात्तेपलक्षणं संगतिं विवक्षन्व्याप्तिपतिपरामर्शमिति॥ ऊर्ध्वरेतश्शब्दितं पारिव्राज्यं नानुष्ठेयमनुष्ठेयं वेति
संतिप्रमाणमत्वात्संदेहे पूर्वपक्षोपतित्रयइति अत्र शास्त्रीयसम्यग्ज्ञानस्यांतरंगसाधनप्रसंगाद्व
क्ष्ययमुच्यत इति स्फुटयाद्यादि संगतिः पूर्वपक्षे परिव्राजकेविद्याप्रसिद्धेर्विभ्रमत्वात्तस्यान स्वातंत्र्यसिद्धिः सि
द्धान्ते तस्या स्तत्रप्रामाणिकत्वात्तत्सिद्धिरिति स्वीकृत्य परामर्शं जैमिनिरिति व्याख्यायहे त्वाकांक्षायाम चो
दनेति हेतुत्वेन व्याचष्टे कृतइति॥ एतावन्त्र प्रतिपत्तव्याइति वक्तव्यमतां विधिरित्याशंक्याह संस्तुताद्विवि।
धिपरत्वात्वाक्यजातस्यान्वेष्यपि तिचशब्दार्थमहरेति॥ तन्नत्र ब्रह्मसंस्थता द्विविधिपरत्वं त्रयइत्यादि
वाक्यस्य साधयति त्रयइत्यादिना॥ अन्यत्र विहितस्यान्यत्र परामर्शादन्यत्र विधिकल्पनादिहेवकल्प्यतामि
त्युत्याशंकते न त्विति॥ परामर्शस्यानुवादस्य स्वप्रधुरोवादापेक्षत्वाच्च दशादाश्रमप्रतीतिमंगीकरो
तीति सत्यमिति॥ नहि तद्विषयश्रुतेरन्यत्राप्रतीतत्वाद्गौरवमित्याशंक्याह स्मृतीति॥ तयोरपि श्रुतिमूलत्वा

आनंद०

९८

द्विविधयुक्तश्रुतिकल्पनादिदेवतत्वकल्पनेत्यत्राचनमित्याशंक्याहातश्चेति॥ प्रत्यक्षश्रुतिर्यविक्रीवादिश्रुतिः नि
रालंबनत्वात्कथमपि सालंबनत्वं युक्तमिति कल्यांतरमाहानधिकृतेति॥ क्रोधादयो नित्यादिकर्मस्वनधिकृ
तास्तद्विजया आश्रमांतरस्यात यस्तत्त्वचारा श्चेत्यर्थः॥ आश्रमान्तराणां परामर्शेपि गार्हस्थ्यवत्प्रामाणिकत्वसि
द्धे रनुरूपयतेतिशंकतेन चेति॥ परामर्शसाम्यमंगीकरोति सत्यमिति तर्हि प्रामाणिकत्वेनानुष्ठेयत्वमपितु
ल्यस्यादित्याशंक्य न परामर्शमात्राद्गार्हस्थ्यसिद्धिरपितु प्रत्यक्षविधानादिति विशेषमाह॥ तथापीति॥ गार्हस्थ्य
मेकमेव श्रौतमिति स्थितौ ब्रह्मसंस्थतास्तु सर्वेमेवत्रय इत्याद्याश्रमांतरवचनमित्युपसंहरति तस्मादिति॥
नित्यमानत्वाच्चाश्रमांतरमनुष्ठेयमित्याह अपिचेति॥ तत्र सत्रावयवयोजनया पवदतीति॥ त्रयइत्यादिवा
क्यस्यान्यार्थत्वमुक्त्वा वाक्यांतरस्यापि तद्वदेवार्थांतरपरत्वमाह तथेति॥ तेर्चिषमभिसंभवंतीति सूर्यद्वारेण ते वि
रजाः प्रयांतीति वाक्यशेषादेवेत्या॥ नोक्तिपरं तदित्यर्थः॥ आश्रमवाचकशब्दाभावाच्चार्थांतरत्वमित्याह स्तं
दिग्धं चेति॥ प्रव्रजंतीत्याश्रमवाचिशब्द इति रनुष्ठेयं पारिव्राज्यमित्याशंक्याह तथेति॥ एवं विशिष्टो यमात्म
लोकायदेनं साक्षात्कर्तुमिच्छंतोऽनुष्ठेयामपि प्रव्रज्यां कुर्वंतीति स्तुतिर्न तद्विधयो विधिर्वर्तमानापदे
शादित्यर्थः॥ पूर्वपक्षमाक्षिपति नन्विति॥ प्रत्यक्षविधानमंगीकरोति सत्यमिति॥ तर्हि पूर्वपक्षासिद्धिरि ९८
त्याशंक्य नास्तीदं विधानमिति कृत्वा चिंतेयमित्याह नैषदोष इति॥ सिद्धान्तसूत्रमवतार्य व्याकरोत्यनुष्ठेय
मिति पूर्वपक्षमनुभाष्य तन्निरासप्रतिज्ञां विवृणोति वेद इति॥ तत्र प्रश्नपूर्वकं हेतुमाह कुत इति॥ तस्मा

सूत्रार्थमाह समाहिति॥ तस्यैव तात्पर्यमाह यथेति॥ त्रयो धर्मस्कंधा इत्यत्रोर्ध्वरेतस आश्रमा आश्रमांतरप्रसि
द्धा एवपरामृश्यंते एतद्वाक्यपरामृष्टत्वाद्गार्हस्थ्यवदित्यर्थः॥ परामर्शस्य विधिपरत्वकल्पे दृष्टान्तमाह यथे
ति निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्मणमेव तत्कुरुत इत्यत्रोप
वीतविधिपरे वाक्ये विध्यंतरसिद्धयोरेव निवीतप्राचीनावीतयोर्यथा परामर्शस्तथात्रापीत्यर्थः॥
निवीतं मनुष्याणामित्यादौ दर्शपूर्णमासयोः श्रुतं तत्रोपवीतं विधीयते एवेतरयोस्तु विधिरर्थवादो वे
ति संशये सत्यपूर्वार्थत्वान्मनुष्यशब्दस्य च मनुष्यप्राधान्यवादित्वादिति प्रकरणे निवीतं पित्र्ये च प्रा
चीनावीतमिति प्राप्ते मनुष्याणां क्रियासु सौकर्यायैकं तुलं विवस्त्रधारणस्य वादेहार्थत्वं धनस्यानिवीत
स्य प्राप्तत्वात्प्राचीनावीतस्य च पित्र्ये वाक्यांतरे प्राप्तत्वादनुवादेन निवीतमित्यादि उपवीते स्तुत्यर्थ
वाद इत्युक्तं प्राच्यां मीमांसायां स्थितं तथैव परामर्शस्तु तावपि त्रयइत्याद्यायां गार्हस्थ्यवदाश्रमांतरमपि विहित
मेवात्र परामृश्यते तस्य विध्यपेक्षत्वादित्यर्थः॥ साम्यश्रुतिफलमाह तस्मादिति॥ त्रयइत्याश्रमांतरस्य
गार्हस्थ्येन साम्यश्रुतिफलं संप्रति पारिव्राज्यवाक्येपि साम्यश्रुतिमाह तथेति॥ अस्येति पारिव्राज्योक्तिः वि
धेयसाहित्यादस्यापि विधेयतेत्यर्थः॥ वाक्यांतरेपि साम्यश्रुतिमाह येचेति॥ श्रद्धेति वानप्रस्थोक्तिः
विधेयपंचाग्निविद्यात्तस्य साहोक्तिरस्ति तेन तद्देवयानप्रस्थमनुष्ठेयमित्यर्थः॥ परोक्षमप्रत्यक्ष
त्वाह यत्तित्वादिना॥ किं तत्प्रत्यक्षकारणं तदाह चत्रयइतिस्कंधशब्दस्य समूहवाचित्वेपि त्रित्वप्रति
य

न्नास्यादित्याशंक्याह न चेति॥ यजेत दद्यादित्यादिश्रुत्या विधिनिग्रासे ते बहवो धर्मा नाश्रमसंबंधमंतरेणा
त्रित्वं तत्रावचितुं शक्यं तेषां आश्रमपरः स्कंधशब्दो न स्यात् नस्यात्ततो यज्ञादीनां त्रित्वं तेषामाधिकत्वादतः स्कं
धशब्दस्य समूहार्थत्वायोगात् त्रित्वमेय स्कंधानामाश्रमत्वनिश्चायकमित्यर्थः॥ कथं तर्हि तेषामाश्रमाणां
विज्ञानस्तत्राह तचेति॥ वाक्यांतरेति निश्चायकं दर्शयति चेति॥ परोक्तं निरस्य स्वमतमुपसंहरति तस्मादि
ति परामर्शमुपेत्यानुवृत्त्यमुक्तमिदानीं विधिरेवास्मित्याह विधिर्वेति॥ प्रतिज्ञां विभजते विधिरिति॥ स्व
स्याचारयोराश्रमचतुष्टयनिविष्टयोरितित्वायोगात् अल्पकल्पनायां विधियुक्तवाक्यकल्पनाऽजतीयस्त्र
यः इत्यादि आश्रमकल्पनं मितिनाव अल्पफलेनाश्रमत्रयनिंदया ब्रह्मसंस्थता स्तुते रेकवाक्यत्वनिश्च
यात् तद्भंगेनात्राश्रमविधिकल्पनमयुक्तमितिशंकते नन्विति॥ एकवाक्यताधीरेव कथं तत्राह प्रतीयते॥
चेति॥ एकवाक्यत्वसंभवे तद्भंगेन युक्तिमानित्यंगीकरोति सत्यमिति॥ आश्रमाणां पूर्वसिद्धेस्तानात्त
त्वरामर्शेन श्रुतेरयोग्यादेकवाक्यत्वे वाक्यायुक्तेत्याह हसतीति॥ किंच विधियुक्तवाक्यांतरकल्प
नायामाश्रमांतराणां विहितत्वोपगमप्रसंगात्मास्यपक्षहानात् तत्कल्पना ऽदृष्टेहेवानीष्टे वाक्ये विधिमा
त्रकल्पना युक्तेत्याह विध्यंतरस्येति॥ किंच मुख्यमाश्रमांतरप्रत्ययं तत्स्तुतिलक्षणमेकवाक्य ४५
त्वकल्पनायोग्या ऽवगमनेदेन विधिरेवायमित्याह विस्पष्टाच्चेति॥ एकवाक्यताज्ञानेपि तत्त्यागे नापू
र्वविधेर्दृष्टान्तमाह धारणवदिति॥ महापितृयज्ञादिसंगताग्निहोत्रे च श्रुतं वाक्यमुदाहरति

धस्तादिति॥ उदाहरणव्याख्यानोपयोगित्वेन वाक्यस्यार्थमाहान्वेति॥ अनुद्रवेदनुविशेषेस्तु स्रुचिप्र
क्षिप्तं हविराहवनीयं प्रतीयदानीयते तदा पित्रे होमे तस्य हविषोऽधस्तात्समिधं धारयन्ननुद्रवेदि
त्यधो धारणस्य विहितत्वादुपरि हीति तच्छेषानुवादतया तदेकवाक्यत्वसिद्धावप्युपरिष्टात्समिद्धा
रणस्यापूर्वत्वाद्देवहोमे यावत्त्रेदं कृत्वा तद्विधीयत इत्यर्थः॥ उक्तेर्थे तात्पर्यं सूत्रमुदाहरति तथेति॥ उपरि
हि देवेभ्यो धारयतीत्यत्रोपरिधारणं विधीयते नवेति सन्देहे धारयतीति वर्तमानापदेशादुपरिहीति हिश
ब्द श्रुतेश्चोपरिसमिधः प्राप्तेर्हविर्यंश्चास्ति हि तद्व्यत्वेन येन केनापि दर्शपौर्णमासादेसमिधमुपसंगृ
ह्यानुद्रवतीति वाक्यांतराप्रसमिन्नियमनादयमनुवादो नाविधिरिति प्राप्तेस्त्रग्दंडे समिधमुपसंगृह्येति
हविषः प्रदेशे समिद्धारणस्य प्राप्तत्वेपि तस्यादुपरितन्त्रधारणस्याप्राप्तेश्चान्यादिशब्दे पंचमलकारे
णविधिरेवायमित्याह विधिस्त्विति॥ दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह तद्वदिति॥ परामर्शपक्षमेवाव
लं ब्याश्रमाणां परामर्शेपि पारिव्राज्यस्य विधिरेष्टव्यो ऽन्यथास्तुत्ययोगादित्याह यदेति॥ ब्रह्मसंस्थ
तायाः तत्स्तूयते तद्विधीयत इति न्यायादिधेयत्वेपि पारिव्राज्यस्य किंस्यादित्याशंक्य तदर्थं विजानस्य
वतारयति सा चेति॥ पक्षद्वयस्य निर्बीजत्वान्नेदं विन्त्यार्थमित्याशंक्य परामर्शश्रुतौ परिव्राजकोऽपि
परामृष्टो नवेति विकल्प्याधमन् प्रथमपक्षमाक्षिपाह यदीति परामृष्टत्वाविशेषाच्चेतु धर्मेश्रमेषु
यः कश्चिद्ब्रह्मसंस्थोऽन्निविष्टतीति संबंधः॥ ब्रह्मसंस्थोनाश्रमी कस्मान्न स्यादित्याशंक्यानाश्रमित्व

आनंछा०

५०

स्य विद्यमानत्वादित्याहुराश्रमित्वेति। द्वितीयमनूद्य द्वितीयपक्षमाश्रिमाहाथेतिपक्षयोः संभावनया वि
चाराऽसंभवमुक्त्वा पूर्वपक्षमाह तत्रेति। परिव्राजकस्यापि यमनियमादितपःसंभवादित्यर्थः। आश्रमा
णामेकैकशोऽसाधारणधर्मरूपदर्शनायोपक्रमात्तदनुसारेण चोपसंहारस्य युक्तत्वात्तपःशब्देनाश्र
मग्रहणमिति द्रष्टव्यमिति तदिति। किं तर्हि युक्तं तदाह यदेति। कस्तर्हि तपःशब्दार्थस्तत्राह तप एवेति। तेषां
तत्साधनत्वेऽपि तपःशब्दस्यासाधारण्यं किं तस्य तत्राह तपःशब्दस्येति। तस्येतरस्य च द्वारे रूढेरन्यत्र तद
भावात्तेन वानप्रस्थ एव परामृश्यत इत्यर्थः कथं तर्हि परिव्राजकधर्मोऽतीपीत परशब्दप्रयोगस्तत्राह त्रिदो
स्त्विति। इतश्च सर्वपरिव्राजकोऽनोक्तस्त्याह चतुर्थेनेति नहि प्रसिद्धसंख्याभेदेषु संख्यान्तरोक्तिर्युक्तेत्यर्थः।
पृथगुक्तिसामर्थ्यादपि ब्रह्मसंस्थिमत्यया व्यतिरिक्तो ब्रह्मसंस्थ इत्याहापि चेति। भेदव्यपदेशेऽपि कथं प्रत्यक्तत
त्राह पृथक्त्वे चेति। सर्व एते पुण्यलोका इत्यत्र भिक्षुरपि परामृश्येत तस्याचाब्रह्मसंस्थत्वाभावादम
तत्वमेवेति न पुण्यलोकत्वं विरोधश्च च तपःशब्देन भिक्षोरपि ग्रहेऽतद्वर्जनं युक्तमेवेत्यस्ति प्रश्नलानोका।
र्वेनणपरा वर्णास्तस्मादेदोत्त्वादत्पत्वमेवेत्यर्थः। अपृथक्त्वे दोषोक्तिरयुक्ते त्यत्र दृष्टान्तमाह वह्नीति।
पृथक्त्वेऽलुतुक्तिर्युक्तेत्याह नवतीति न चावरुद्धाचेदापेत्तयादृष्टान्ती क्रियोः सिद्धिरपृथक्त्वेपीति नान्यंसत्ति ५०
कर्मित्वे मंदप्रज्ञत्वे च ब्रह्मसंस्थता या महाप्रज्ञत्वस्य चायोगात्पृथक्त्वोक्त्याद्युक्तमादितिमन्त्वोपसंहरतीत
स्मादिति। किमेष ब्रह्मसंस्थशब्दो योगिको रूढो वेति विकल्प्याद्येन परिव्राजकमात्रविषयतेति शंकतेक

यमिति द्वितीयं निराकरोति रूढीति। यौगिकत्वमुपेत्य परिहरत्यत्रेति। यथोक्तं ब्रह्मसंस्थत्वमन्येषामपि सिध्यतीत्या
शंक्याह तच्चेति। तुर्यस्य संन्यासिनोऽपि स्वाश्रमकर्मानुष्ठाने प्रत्यवायत्वं तत्कुतोऽस्य ब्रह्मसंस्थत्वं तत्राह परिव्रा
जकस्येति। तस्यापि शमाद्यनुष्ठेयमिति चेत्कुतो ब्रह्मसंस्थतेत्याशंक्याह शमेति। तत्र हेतुर्ब्रह्मेति। शमादेर्ब्रह्म
संस्थतांगत्वाच्च तद्विरोधित्वेत्यर्थः। गृहस्थादीनामपि ब्रह्मसंस्थत्वाविरोधेऽपि स्वाश्रमविहितकर्मेत्याशंक्याह य
ज्ञेति। तानि हि रागाद्यक्षिप्तानि च रागादिमतां ब्रह्मसंस्थतेति भावः। शमदमाद्युपेतं ब्रह्मसंस्थत्वमेव संन्यासिनः स्वा
श्रमकर्मेत्युक्तं तदकरणे तस्य प्रत्यवायित्वं त्वेपदार्थविवेकः। कायेति। स्मृतेरित्याह तदिति। चकारादितरेषामपि
तत्तदाश्रमकर्माणि। क्रमे प्रत्यवायित्वमकुर्वन्नविहितं कर्मेत्यादिस्मृतेरिति स्मृच्यते। संन्यासिनः सर्वकर्म
त्यागेन ब्रह्मसंस्थत्वमेव स्वाश्रमकर्मेत्यत्र मानमाह तथा चेति। न्यास इति संन्यासो ब्रह्मेति स्तूयते तत्र हेतुमाह
ब्रह्मा हीति हिरण्यगर्भो हि श्रुतिस्मृतिषु परोऽभीष्टस्तथापि कथं संन्यासस्य तत्त्वमत आह परो हीति।
तस्य परत्वे हेतुर्ब्रह्मेति तद्धि हेतुत्वात्परो यस्मादसौ संन्यासस्तस्माद्ब्रह्मेत्यर्थः तस्य परत्वं स्फोरयति तानीति॥
पूर्वोक्तानि सत्यादीनि प्रसिद्धान्येतानि ज्ञानहीनान्यवरायेतानि तपांसि निकृष्टहेतुत्वान्न्यास एवात्यो
तिरिक्तः श्रेष्ठो ब्रह्मसंस्थताद्वारामृतत्वहेतुत्वादित्यर्थः। तस्य कर्मान्तरानावेशाच्चावान्तरमाह वेदान्ते
ति। शुद्धबुद्धयो विरक्ताः संन्यासयोगाद्वेदान्तविज्ञानेन सुनिश्चितार्था मुच्यन्त इति वचनात्कर्मान्तरा
भावः संन्यासिनां ज्ञातीत्यर्थः। न कर्मणा न प्रजया त्यागाद्यस्याः श्रुतयो वसंतीति वक्तुमादिपदं। तस्मि

आनं० ब्रह्मणि बुद्धिर्मनो येषां ते तथा ॥ तदेव ब्रह्मात्मा स्वरूपं येषां ते तदात्मानस्तत्रैव निश्चयेन स्थितिमाह तन्नि
ष्ठा इति ॥ विषयांतरे पारवश्यं व्यावर्तयति तदिति ॥ यथोक्तान्यपि कर्माणि परिहाप्येत्यादिस्मृतिसंग्रहार्थमा
५१ दिपदं उक्तश्रुतिस्मृतितात्पर्यमाह ब्रह्मेति ॥ ब्रह्मसंस्थशब्दस्य परिव्राजके रूढिमुपेत्योपसंहरति ॥ तस्मा
दिति यथा ब्रह्मसंस्थशब्दस्य यौगिकत्वे सत्यतिप्रसंगपरिहारायाश्रमविशेषे रूढत्वेऽपि भवन्न गार्हस्थ्यमात्रा
त्युपपत्तौ कासिः किंतु यथोक्ताग्निहोत्रादिकर्मत्यागात्तथा परिव्राजकस्यापि ब्रह्मसंस्थस्य वाक्यार्थसाक्षा
त्कारद्वारेणैव मुख्यममृतत्वमिति कुतो ज्ञानानर्थक्यमित्यर्थः ॥ एवमेकदेशिमतं प्रत्याख्याय मतं ब्रह्म
संस्थशब्दस्य परिव्राजकविषयत्वे स्थिते संस्तवसामर्थ्याद्ब्रह्मसंस्थत्वं पारिव्राज्यमितरपरामर्शेऽपि विधेय
मिति परमप्रकृतमुपसंहरति तदेवमिति ॥ शिष्यबुद्धिविकासार्थं परामर्शश्रुतिमाश्रित्य कृत्वा चिंतया वि
चारं कृत्वा चिंतामुद्घाटयन्नपेक्ष्येति ॥ यदि वेतरथेति ब्रह्मचर्ये स्थितं तस्यैव पारिव्राज्ये गार्हस्थ्यं च वैरा
ग्ये दैवयोगाद्यदीत्यर्थः ॥ यत्त्वनधिकृतांधादिविषयः संन्यासः स्यादिति तत्राह नचेति ॥ अविशेषश्रुति ५१
रसति बाधके न विशेषसंकोचमर्हतीत्यर्थः ॥ इतश्चेदं तावन्नानधिकृतविषयमित्याह प्रथमेति ॥ अनधि
कृतानां संन्यासस्य तिशेषश्च ॥ व्रती गोदानादिव्रतवान् अव्रती तद्विपरीतः स्नातको गुरुकुलनिवृत्ति
रूपस्नानानंतरमपि गुरुशुश्रूषापरस्तद्विपरीतोऽस्नातकः उत्सन्नाग्निर्मृतभार्यः पूर्वमेवाग्निपरिग्रह
रहितो वा परिव्रजेदिति कर्माधिकारप्रतिपत्तिहीनानामपि संन्यासस्य पक्षांतरेण वा समनधिकृत

विषयमित्यर्थः ॥ संन्यासविधेरनधिकृतविषयत्वे हेत्वंतरमाह ब्रह्मेति ॥ श्रवणादिद्वारा संन्यासस्य ब्रह्म
ज्ञानहेतुत्वं प्रकरणादिसिद्धं तेन समर्थस्यैवाधिकारस्तस्मिन्नित्यर्थः ॥ पारिव्राज्यस्य ब्रह्मनिष्ठार्थत्वे
श्रुतिं प्रमाणयति तथेति ॥ ब्रह्मज्ञयाय ब्रह्म ज्ञानाय तस्मान्न्यासात्कारणेत्यर्थः ॥ अंतर्गर्भिताधिकरणार्थमुप
संहरति तस्मादिति ॥ प्रामाणिकत्वं तच्छब्दार्थः ॥ तेषां प्रमितत्वेनानुष्ठीयमानत्वेऽपि प्रसक्ते किं ज्ञानमित्या
शंक्य प्रथमाधिकरणसिद्धं निगमयति सिद्धं चेति ॥ अनुष्ठेयसाम्यश्रुतेराश्रमांतरमनुष्ठेयतया विधेयमित्यु
क्तं संप्रति रसतमत्वादीनामंगाश्रितत्वेनेयमेव जुहूरित्यादिस्तुतिवदन्यतमपास्तुत्यर्थत्वमित्याशंक्य प्रत्या
हस्तुतीति ॥ अधिकरणस्य विषयं वदन्वाक्यानि पठति स इति ॥ एषां भूतानां पृथिवी रसः पृथिव्या आपो
रसः अपामोषधयो रस ओषधीनां पुरुषः पुरुषस्य वाग्वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रस इत्युपक्रम्य श्रूयते स एष रसानां
पृथिव्यादीनां सामान्यानां मध्ये तूत्तरोत्तरसारत्वेनोक्तानामतिशयेन सारो रसतमः परमः परमात्मप्रतीकत्वा
त्परस्य ब्रह्मणो दृष्टांतं तदर्हतीति परार्ध्यः परब्रह्मवदुपास्य इत्यर्थः पृथिव्याद्यपेक्षया ष्टमः कोऽसावुद्गीथो य
उद्गीथः ॐकार इत्यर्थः ॥ उद्गीथागंतावच्छ्रुतीरधिकृत्य पर्णमयीत्वादावंगसंबंधे विध्यफलश्रवणस्याविधे
पि स्वर्गो लोक इत्यादेस्तु फलत्वावश्यसंशयमाह किमिति ॥ अंगावबद्धानामपि बुद्धीनां स्तुतित्वाभावाद्विधेयत
या स्यात्तंत्रेण पुरुषार्थहेतुत्वे सत्यनंगात्मधियः स्वतंत्रतया फलवत्त्वमुपासिषु तुल्यन्यायाः किं वक्तव्यमित्यु
क्तेरवपादादिसंगतिः ॥ पूर्वपक्षे स्तुतित्वादंगधीष्वनुष्ठानासिद्धिः सिद्धांते तासां विधेयत्वात्तत्सिद्धिरधी

आनंद० रित्यंगीकृत्य संशयमनूद्य पूर्वपक्षयति त्वस्मिन्निति विमताः प्रस्तावाः स्तुत्यर्थाः कर्म्मांगविषयत्वादृक्पदार्थाधस
५२ मघत्ययत्वात् स्वर्गो लोक आहवनीय इत्यादिप्रत्ययवदित्यर्थः॥ जुहू रियमेव पृथिवीति स्तुत्यस्ते कर्म्मश्र
यनगतः सत्रादिस्त्विति आहवनीयोऽग्निः स्वर्गलोक इति च स्तुतिरेवेत्यर्थः स्तुतिकल्पनाद्विधिकल्पनमेवयु
क्तमनुष्ठानफलाभावादित्याशंक्य परिहरति नेत्याहेति विमताः प्रस्तावा न कर्म्मांगस्तुतयोऽपूर्वार्थत्वात् क्रत्वंतरवदि
त्यादिनेति॥ विमता धियो न कर्म्मांगस्तुतयो विशिष्टफलसंबंधत्वात् संमतवदित्याह विधीति॥ वायुर्वै क्षेपि
ष्ठेत्यादिवदुद्गीथादिश्रुतीनां स्तुतिसामर्थ्येऽपि कस्मादपूर्वत्वं न स्यादित्याशंक्याह विधायकस्येति॥ अस्तु
तर्हि विधायकश्रुत्यशेषत्वेनेवोद्गीथादिश्रुतिनामपि स्तावकत्वमपूर्वत्वं किमुद्गीथादिप्रत्ययेषूद्गीथादिवि
धिः स्तूयते किं वा तद्रूपास्तिधीरिति विकल्प्याद्यं दूषयति॥ प्रवेशमात्रेति॥ उद्गीथादिविधेः कर्म्मप्रकरण
स्थत्वेन व्यवधानाभावात्तेनोद्गीथादिश्रुतीनामेकवाक्यतेति विमता धियो न कर्म्मांगस्तुतयो तत्प्रकरणस्थत्वा
त्क्रत्वंतरवदिति भावः परोक्तं दृष्टांतं विघटयति इयमेवेति॥ अनुमानकृत्यफलं निगमयति तस्मादिति
न द्वितीय उपास्यविषयार्पणेन विध्यन्वययोग्यत्वे यावास्तुत्यर्थत्वायोगादित्याह भावेति॥ संनिहितवि
धेर्विषयार्पणेन चलितत्वायं स्तुतिपरत्वमपि यत्रायुक्तं स्तुत्यपेक्षया विषयार्पणस्यांतरंगत्वात्त ५२
त्र कर्म्मांगस्तुतिपरत्वं नेति विमृश्य वक्तव्यमिति भिन्नानां चोख्याच हेडुद्गीथमिति निमंत्रणादि च पि लिंगादस्म
रणात्कथमुपासीतेत्यादिशब्दस्य विधिपरतेत्याशंक्याह तथा चेति॥ धात्वर्थानामनेकत्वेपि उक्तस्वरूपो

भ्रसत्तायामसनुवादीति चानेव धात्वर्थभावना सामान्यवाचिनः सर्वधात्वर्थमुदाहरति कुर्यादिति॥ आदित्स
कर्त्तका भावना कुर्यादित्युक्ता॥ सेवा हि सकर्म्मिका क्रियेते सुघ हृता सेव कर्त्तव्यमिति॥ धात्वर्थोपसर्जन
भूता निहितेति भेदः॥ नवेदिस्तत्रापि कर्मपेतत्र वितव्यमित्युदाहार्यं भवतेरस्तेश्चैकार्थ्ये पिना स्याद्धर्थभव
तिं दृष्टुमदृधागस्तिमुदाहरतिस्यादिलीति॥ यथापूर्वमुदाहरणमिहापि द्रष्टव्यं॥ यागकर्मानुश्रित्य पंचधमभि
तुलमेतस्यात्वनुगतप्रस्पयेः सर्वभावनानुगतश्रेयः साधनत्वरूपो विधिरुच्यते॥ नतु प्रतिधातुं प्रतिप्र
त्ययं पंच भावना भेदोस्तीति मत्वाहेतदिति कथन्तर्हि निमंत्रणादिषु लिंङादिस्मरणं मिथो विरोधादित्याशं
क्योस्मात्तो वेदेविधिपरालिङादयोपवादादन्यथात्वमित्यभिप्रेत्याह लिङादीति॥ उद्गीथादिश्रुतीनां
स्तुत्यर्थत्वाभावे हेत्वंतरं चकारसूचितमाह घतीति॥ फलंचेदृश्रवणमुपसंहरति तस्मादिति॥ पूर्वोक्ता
पूर्वत्वादिसमुच्चयार्थमपीत्युक्तं॥ उद्गीथादिस्तुतेरुपास्तिविषयार्पकत्वं ज्यायो रसतमत्वादेरित्युक्तं मधु
नाख्यानानामपिविधास्तुतेः सकाशात्पारिप्लवशेषत्वं ज्यायोनुष्ठानावसानयोगादित्याशंक्य परि
हरति पारिप्लवेति॥ विषयोक्तिपूर्वकमाख्यानत्वसाम्यादिधासंनिधेश्च संशयमाह इत्यादिना॥ पारि
प्लवप्रयोगनामाश्वमेधे। पुत्रामात्यपरिवृता युवराजे पारिप्लवमाचक्षीतेत्यादिना नानाविधाख्यानकथ
नं विहितं अत्रचोपनिषदुक्तोपाख्यानानां तादर्थ्यं निरासेन तत्र तत्र संनिहितस्वतंत्रपुरुषार्थहेतुविधा
र्थत्वसमर्थनात्पादादिसंगतिः पूर्वपक्षे प्रयोगशेषत्वादाख्यानानां वेदोदात्तानामपि तद्भावात् विधा आ

आनं० धर्मासिद्धिः। सिद्धांते विशेषणादुपनिषदाख्यानानां अवच्छेदात्तत्तेषाम् प्रयोगशेषत्वात् विद्याप्रधानत्वसिद्धि
५३ रिति स्वीकृत्य पूर्वपक्षं यतिपारिप्लवेति। गुरुशिष्यसमाचारप्रदर्शनेन बुद्धिसौकर्यद्वाराच विद्याशेषत्वं
सामर्थ्यलिंगादासांसिद्धमित्याशंक्य पारिप्लवश्रुतिविरोधे लिंगमप्रयोजकमित्याह आख्यानेति। यस्माच्चिन्नेश
स्यमाने सूर्योऽभ्युदियादपि सर्वाहा शतयी रजकाद्दिति सर्वासामाख्यानानाम ग्रहणं सने सर्वश्रुत्यादिनिःशुक्रानाम्
पि प्रातिस्विकविनियोगवदाख्यानानां पारिप्लवे पारिप्लवमाचक्षीतेति चोदितानामेव लिंगेन संनिधेर्वा विद्यायां
विनियोगः स्यादित्याशंक्य प्रातिस्विकविनियोगस्य समुदायविनियोगस्य च श्रौतत्वेन तुल्यत्वात् प्रकृतेतदभा
वान्नैवमित्याह ततश्चेति। आख्यानानां प्रयोगशेषत्वेपि सर्वेषां वेद्यत्वानामतच्छेषत्वाद्युक्तं विद्याप्रधानत्वमि
त्याशंक्याह मंत्रवदिति। देवस्यत्वेत्यादिमंत्रे कस्यचिद्देवपदस्य समवेतार्थतया प्रयोगशेषत्वे सिद्धे तदेक
वाक्यत्वेनासर्वोपनिषद्गतच्छेषत्वाच्च विद्याप्रधानतेत्यर्थः। सामान्यश्रुतेर्विशेषोत्पातत्परत्वान्नतया
लिंगादिबाधोस्तीति सिद्धान्तयति नेत्यादिना। अश्वमेधे प्रथमेहनि मनुर्वैवस्वतो राजेत्याह द्वितीये
हनि यमो वैवस्वत इति तृतीये हनी वरुण आदित्य इत्याद्याख्यानविशेषाणां वाक्यशेषे श्रुतास्तद्वदाद्युपक्रम
स्य संकोचो युक्तो न चोपसंहारः सर्वशब्दादुपसंहारस्थविशेषो क्लिष्टः रूपलक्षणार्थ इति वाच्यमादौ सर्वाण्या ५३
ख्यानानि पारिप्लवे शंसतीति तत्स्थापारिप्लवमाचक्षीतेति च विधाय मनुर्वैवस्वत इत्यादि पठ्यते तन्न
पुनर्विधानं वाक्यशेषस्थाख्याननियमार्थमित्यपावेयप्यति सर्वशब्दोपि वाक्यशेषस्थापारख्यानमध्य
तयापदं तराद्यमपि तच्छेषचमित्युक्तं तथाख्यानानां प्रयोगशेषत्वेन तदेकवाक्य ९

स्य कतिपयप्रयो।। गमात्रे शेषत्वं ज्ञात्वा वर्तयितुमित्यर्थ वानि तिमत्यासिद्धान्तं। विद्यशेषा ति पारिप्लवमिति।
यत्वाख्यानसामान्यात्पारिप्लवार्था इमाः श्रुतय इति तत्राह आख्यानेति। विशेषणफलनिगमयति तस्मादि
ति। तर्हि कुत्राख्यानान्युपयुक्तानीत्याशंक्य विशेषणाश्रुत्या सर्वश्रुतौ न यानि निर्बाधसन्निधिर्विद्यास्तेषाप
निषदाख्यानानि विनियुंजीतेत्याह तथा चेति। सत्यार्थं विद्यया प्रसतीति एकवाक्यतोपसंबंधं विभजते।
तथा हीति। प्रतेचन मनुरागजननं संनिहितविद्याभिराख्यानानामेकवाक्यता प्रतीत्विद्याह इत्यरतिमैत्रे
यीति। आख्यानत्वेपि पारिप्लवार्थत्वादर्शनाच्चन तादर्थ्यं प्रकृताख्यानानामित्याह यथेति। ३६ कि वदत्
उद्धृतवान्क्लोमायेति यावत् श्रुतिलिंगसंन्निधिभिर्विद्यार्थत्वे सिद्धे फलितमुपसंहरति तस्मादिति। कथा
नां विद्याशेषत्वे दर्शितेते कर्मणामपि तर्हि तच्छेषत्वाभावेपि स्यादित्याशंक्य प्रसंगागतं विचारं परिसमा
प्य पुरुषार्थाधिकरणस्य फलमाहात इत्ते ब्रह्मविद्यामोक्षे कर्माणीति कर्तव्यत्वेनापेक्षते न वेति वादि
विप्रतिपत्तेः संदेहे यज्ञेनेति विविदिषायां विनियुक्तयज्ञादीनां विषयसौंदर्यजन्याद्यातस्या मनन्वया
तद्विषयज्ञानसाध्यमोक्षान्वयस्य प्रयुक्तत्वादपेक्षत इति पूर्वपक्षोऽकारः पचतीत्यात्र पाकसाध
नत्वाज्जनककार्यानां पाके तुल्यदर्शनात्तज्ञाने छाजनकालः करणशुद्धिहेतुत्वेन यज्ञादीनां ज्ञाने ध्या
हेतुत्वसिद्धेः साक्षाद्देवमोक्षान्वये च यज्ञेनेत्यादिकरणविज्ञतिसंगात्वात्पर्यस्येवोपायत्वात्सापेक्षा
त इति सिद्धान्तः। एतदधिप्रेत्य संनिहितस्यातः शब्दपरामर्शयोग्यस्याभावादतः पादानुपपत्तिमाशंक्य

आ०नं० स्त्र्यादाराधियोजयन्ति पुरुषार्थ इति ॥ आद्याधिकरणे यथा विद्यायाः स्वातंत्र्येण पुमर्थहेतुत्वमुक्तं तच्च त
थैवानुवर्तते यथा चाग्न्यादिषु स्व दर्शनाच्च पुरुषार्थहेतुत्वं कर्मापेक्षाविरोधीति निरस्तं ॥ नन्वाश्रमाणां दिसंग
तिर्वक्तव्या प्रथमाधिधिकरणस्यैव तत्फलविषयस्यास्य तस्याः सुगमत्वात्फलमपि पूर्वोत्तरपक्षयोस्त
५४ देवेत्यभिप्रेत्याह अस्येति । स्वार्थसिद्धावेवानपेक्षा न तु स्वसिद्धावेतच्च तदपेक्षास्तीत्यनंतराधिकरणे निर्द
ष्टमुपसंहार इति तत्फलमाह अधिकेति ॥ चरमविद्यास्वफलेनकर्मापेक्षाप्रमात्वात्संमतवदित्युक्तं तर्हि
न स्यात्परा वपि तदपेक्षाप्रमात्वात् इदं देवत्वाशंक्याह संवर्तिअधिकच्चिवदयेत्युक्तं यत्की कुर्वन्ब्रह्मविद्याप
धिकृत स्वफलाधिकरणन्यायाद्धि विविदिषा श्रुतेश्च संशयमाह इमिति ॥ अत्र च स्वतंत्रपुरुषार्थहेतौ पनिषद
त्मज्ञानोत्पत्तौ यज्ञादीनां शमादीनां च विविदिषा वाक्यविनियोगोक्तेरस्तिपादसंगतिः पूर्वपक्षे यज्ञादी
नां विद्यान्वयेन तत्फलेपि तान्वसत्वा समुच्चयसिद्धिः सिद्धान्ते परंपरया तेषां ज्ञानान्वयेपि तत्फलान्वये हे
त्वभावात्तदसिद्धाज्ञानस्यैव तद्धेतुतासिद्धिरिति संगीत्य पूर्वपक्षयति नेत्तिति ॥ अपरोक्षधियोमान
मात्रायत्तत्वात्प्रामाणिकज्ञानस्य मानहेतुपुसस्तु कर्मयज्ञावेनानुदयादर्शनात् केवलव्यतिरेकाभा
वे च यज्ञादीनां हेतुत्वकल्पना योग्याद्विविदिषाश्रुतेश्च वर्तमानापदेशित्वाद्विनियोजकत्वायोगात्ज्ञान
स्य फलवद्गुत्वात्तावपि नान्वयस्तेषामिति भावः ॥ विविदिषावाक्ये वर्तमानापदेशेपि यस्य पर्णमयी ५४
त्यादाविवापूर्वत्वात्पंचमलकारेणाप्यलानुजवकामोय यज्ञादीनि कुर्यादिति विध्युपगमादागमस्य

केवलव्यतिरेकानपेक्षत्वाद्विषयसौंदर्येच्छायांसाक्षात्त्वयायोगात्तत्फले ज्ञाने यज्ञाद्यन्वयसिद्धेर्यज्ञेनेत्या
दिकरणश्रुत्या च तेषां भिद्यमाणापरोक्षधीसाधनत्वदृष्टेर्ज्ञानस्यचमानायत्ततया साक्षाद्यज्ञाद्यसाध्यत्वेपि ते
षां चित्तशुद्ध्याद्यत्यन्तप्रवणतामुखाद्यापरोक्षज्ञानेपर्यवसानात्पारंपर्येपि पञ्चतिका इत्येरितिवन्तत्करणावि
नक्ति संभवाद्युक्तेर्ज्ञानस्य कर्मापेक्षास्तीति सिद्धान्तयतीदमितिआपातेन फलाचर विरोधमन्तीति शंक
तेन च्चिति । विनियोगोत्साद्यत्याहनेतीति ॥ उक्तव्यवस्थायां प्रश्नपूर्वकं हेतुमाह कुत इति ॥ हेतुं विवृणोति तथा
हीति ॥ न च वन्ध्यत्वविविदिषासंयोगे यज्ञादीनां ज्ञायते यदितस्यां विषयसौंदर्यलभ्यायां तेषामन्वयायोगादि
च्छमाणाज्ञानेन्वयोभ्युपगम्यते तर्हि ज्ञानस्य मानाधीनत्वात्तत्कर्मणां तत्रान्वयासिद्धेः श्रुतत्यागेतत्फले मोक्षे कि
मित्यन्वयो नेष्यते तत्राह विविदिषेति ॥ मोक्षहेतुत्वकल्पनायां नास्त्यन्ततः इतेनेत्यादि विरोधस्तत्परंपरया श्र
यापि हेतुत्वेबाधत्वाद्वा शुद्धिशुद्ध्यातदुत्पत्तावेवान्वयो यज्ञादीनामित्यर्थः ॥ यज्ञादिश्रुतेरितिवाक्यान्तर
मपि यहीतव्यमित्याहाध्येति तत्र यज्ञादीनां ज्ञानसाधनत्वेपि विज्ञातं लिंगमाहात्रेति ॥ तत्रैव लिंगान्तरमाह
इ सर्वइति ॥ परंपरया कर्मणां धीहेतुत्वे संस्मृतिमपि दर्शयति स्मृतिरिति ॥ उत्पत्तावेव फलेपि ज्ञानस्य क
र्मापेक्षा किं न स्यादित्यत्र दृष्टान्तमाहयथाकरोत्यश्ववदित्यादिना ॥ ज्ञानोत्पत्तौ वहिरंगमुक्त्वा तत्रैवांतरंगमु
पदिशति शमादीति ॥ अत्र व्यावर्त्त्यांशंकामाह यदीति । विधास्तावकत्वेनापि संभवत्यर्थवत्त्वे वर्तमानता
संगेन विधिकल्पनमयुक्तं वाक्यत्रेदप्रसंगादतः शब्दमात्रलभ्यादिविधेतिभावः ॥ एवं तवापि प्रायेपि हेत्वं

आनं ६० न्तरमवश्यमनुष्ठेयं न चा ऽ क्रमात्तलब्धा विधेतिसत्त्रयोजनया परिहरति तथापीति विविदिषावाक्यस्तु त्यत
याशमादिवाक्यस्य नास्ति विधिपरत्वेति शंकते नचेति। यस्मादेवंभूतं विदित्वा पापेन कर्मणा न लिप्यते
५५ तस्मादेवं वित्तानी शमाद्युपेतो भूत्वा विचारयेदिति गम्यते विधिरिवाहन्नेतीति विध्यभावेन त्वर्थं सावेयत्व प्र
दुक्त विधिसिद्धिरित्यर्थः॥ काण्वपाठे विधिमुक्त्वा माध्यंदिनपाठे विध्यभावशंकापि नास्तीत्याह पश्येदिति चेति
विधिफलमाह तस्मादिति। यज्ञादिनामसाधनत्वशंकामापाततो ऽप्युपेत्य साधनांतरापेक्षो [illegible] न त्वस्या
धनत्वशंकापि न युक्तेत्याह यज्ञादीनीति। उक्तं स्मारयित्वा परिहरति नचेत्यादिना॥ संयोगस्यापूर्वत्वमेव स्प
ष्टयति॥ नहीति। सत्यपि महावाक्ये वेनुष्ठानयोग्यापूर्वार्थविधिरवांतरवाक्ये न क्रियते तेन तत्र वाक्यभेदो
दोषइत्यत्र पूर्वतंत्रसम्मतिमाह तस्मादिति॥ दर्शपूर्णमासयोः श्रुतं तस्मात्पश्येत्सादित त्रय [illegible] द्रव्य
संबंधः सामासिकः वेन च द्रव्यदेवतापि [illegible] इत्थं दर्शपूर्णमासयोरस्ति तेन तदेकवाक्यतायोगात्का
लत्रया [illegible] द्रव्यदेवतासंबंधस्याधिनात्त्वेन यागविध्युपरूपकत्वा व्यवहारसिद्धये विधिपदमध्या
हृत्यप्रकरणादुत्कर्षेयादृषोद्देशेन [illegible] यागः कर्तव्य इति विलक्षणोसंबंधः योऽयं पौर्णमास्या [illegible]
येताचोदनाप्रकृता विलत्र विचारित इत्यर्थः॥ अवांतरवाक्यभेदेन सत्र कृतापि स्वीकृतो विधिरित्याह ५५
तथा चेति स्मृत्यनुसारेणाप्यवान्तरवाक्यस्य विधायकत्वं वाच्यमित्याह स्मृतिष्विति। कर्मणां ज्ञानोत्प
त्तिहेतुत्वे श्रुतिस्मृतिन्याय सिद्धे फलितमाह तस्मादिति। यज्ञादिनाम पि श्रुतिस्मृतिन्याये भ्यो नुष्ठे

यत्वे शमादीनां तेभ्यो विशेषाभावाद्विधोदयमविशेषेणाप्यनुष्ठानं स्यादित्याशंक्याह तत्रापीति॥ यज्ञादीनां शमा
दीनां च विद्यासंनिहितानां तच्छेषतोक्ता तत्संगाद्विद्यासंनिधुक्तं सर्वान्नाप्यनुज्ञानस्यापि विद्याशेषता
माशंक्य पठत्याह सर्वान्नेति॥ प्राणविदः सर्वान्नानुज्ञानं विषयं वक्तुं शाखान्तरस्थां श्रुतिमाह प्राणो तिग जग्धं भक्षितं
विषयवाक्यार्थं संग्रहेणाति सर्वमिति॥ अपूर्वत्वाद्विध्यश्रुतेश्च संशयमाह किमिति अत्र प्राणविद्यायाः स्वतंत्रप्र
मर्थहेतुतो वाक्यार्थज्ञानोपयुक्ता यास्तुत्यर्थं सर्वान्नानुकीर्तनमिति कथना स्यादिति संगतिः पूर्वपक्षे प्राणवि
दो भक्ष्याभक्ष्यविभागासिद्धिः सिद्धांते विदुषो विदुषश्चानापदि तत्सिद्धिरिति मत्वाऽऽहः संशयमनूद्य पूर्वप
क्षयतीति संशयइति विधिपक्षेनुष्ठानविशेषलाभं हेतुमाह तथाहीति॥ सर्वान्नानुज्ञानं स्वतंत्रमेव विधीयता
मित्याशंक्य संनिधिविरोधान्नैवमित्याह न तु इति॥ सर्वान्नात्वं प्राणविद्यांगं चोत्तरार्हिनकलं कुंनद्दा येदित्यादि
शास्त्रविरुद्धमेतेति शंकते नचेति॥ प्राणविदतिरिक्त विषयं तदिति विरोधं परिहरति नेत्यादिना॥ उप
पत्तिमेव कर्म विषयदृष्टांतेन परिहरति यथेति तत्रैव [illegible] विषये दृष्टान्तमाह यथा चेति॥ यदुपमंत्रयतेस
हिंकार इत्यादिना ग्राम्यधर्मप्रारंभगत चेष्टा सुहिंकारा [illegible] हिता सा वामदेव्यविद्या तत्रोपमंत्रणासंकेत
करण्यादृष्टान्तयोरर्थं दार्ष्टान्तिकेयोजयत्येवमिति॥ विधिदिषावाक्ये च वर्तमानोपदेशेप्यपूर्वत्वादिसंभवप्र
कारांगीकारे पाविधिकल्पनवद्त्रहेतुत्वा वर्तमानापदेशेपि अपूर्वत्वाद्विधिरिति मतमनूद्य स्वत्राप्यहरिवसि
द्धान्तमाहैव मिति॥ तत्र हेतुमाह नहीति॥ यस्यपर्णमयीत्यादावपि वर्तमानापदेशे विकल्प्यो विधिरित्याशं
क्याहन चेति॥ सामान्यविधिबाधकत्वं श्रुतविशेषविधेरिष्टं विशेषकल्पनात्तु सामान्यविधिनाबाध्यकल्प

नापादिरोधाभावापेक्षत्वादित्यर्थः। इतश्चवस्तुत्वार्थमेवेदं वचनं विधिरित्याह प्रापि चेति। आच्छन्नआशङ्कानिष्प
आक्रीडयतेति। अंगेभ्यस्त्वेतन्नमिति सिद्धवत्परा दृशवक्रविशेषयो विधिर्नसंभवतीत्याह नचेति। तर्हि वचनवैयर्थ्यमित्या
शंक्य सर्वेषां चासान्न मिति धीस्तुत्यर्थत्वान्नैवमित्याह शक्तेति। उक्तेऽर्थे सत्प्रमाणं दर्शयितुमुत्तरमाह राजिज्ञाकरोस्त्वे
तदिति। अदत्तो शस्त्रयःपाषाणदृष्टयो रक्तवर्णाः स्तुत्यपत्तिविशेषावालेह तेषु कुरुक्षेत्रदेशस्थसस्येष्विति यावत् आ
रव्यापिकार्थमाहचाक्रायणइति सहि दुर्भिक्षेजातेजायया तु पमानपयो धरादिस्त्री व्यंजनयासह देशांतरं प्रतिचक्र।
मेसकदाचिदिभ्यग्रामे निवसन्निभ्येनसहस्त्यारोहेण स्वामिनो जितान ईक्षत्तितान् कुल्माषानकुत्सितान्माषान् नतृप्ति
तवानित्यर्थः। अनुपानं ग्रहणेत्युक्ते सत्युच्छिष्टं मे पीतं स्यादितिप्रतिषिद्धं किमिते पुच्छिष्टमनेति परशो तेकारणं चानु
पाननिषेधे कथितवानित्याह नुपानं चेति। कुल्माषश्चेन्नतत्पतिजीवनमेव मेनस्यात् कामः स्वेच्छातो मे तदकादिषू
दकपानं भविष्यतीत्यर्थः। स्वयं स्वादित्वाशिष्टान् जायायै मा जहारतयाच भर्तृस्वभाव जया निहितानुत्तरदिने प्रातरेव न
ष्टितवानित्याह पुनश्चेति कुल्माषपणभुक्तेरभिप्रायमाहतदिति। अनुपाननिषेधश्रुतेस्तात्पर्यमाह एवं चेति। सर्वान्न भ
क्षैथावत्पाया निरंकुशत्वाभावे फलितमाह तस्मादिति। तस्यार्थवादत्वे हेत्वंतरमाह बाधाचेति। सामान्यशास्त्र विरोधाच्च
कच्चोविशेषविधिरित्युक्तमधुनासामान्यशास्त्रं दर्शयन्सूत्रं योजयत्येवचेति। स्वस्थावस्थायां नच्चाभक्ष्यं चेदसतीति
यावत् आपदवस्थायामपि भक्ष्यभक्षणानुज्ञानेस्मृतिसंकोचयत्यपीति। स्मृतिरपि विदधियपेत्याशंक्याह विचेति। सुरापानं
अवस्थाद्वयेपि न कार्यमित्याह तत्पेतिब्राह्मणो वर्जयेदितिशेषः। जीवितात्यय स्मृत्यासुरापि तदत्ययेपातव्येत्याशंक्याह।
पुरापस्येति। उष्णां सुरामितिशेषः। उष्णामग्निनातप्तामितियावत् मरणांतिकप्रायश्चित्तदृष्टेस्तत्प्रसंगेपि सा न पातव्येत्यर्थः ५६
इतश्च सा सदा नपेयेत्याहसुरापाइतितत्रहेतुरभक्ष्येति। मद्यमित्यादिस्मृतेस्तात्पर्यमाह वर्जनेति स्मृतिश्चामावर्ण्य
तन्मूलश्रुतिमाहशब्दश्चेति। तस्माद्ब्राह्मणस्य सुरापस्य मरणांतिकप्रायश्चित्तदर्शनादिति यावत् श्रौतनिषेधस्य प्रकृतो
पयोगमाह सोपीति। श्रुतिस्मृतिसिद्धमर्थमुपसंहरन्नुत्तरसूत्रं व्याचष्टे तस्मादिति। सर्वान्नत्वोक्तिः शास्त्रान्तरविरोधे
स्तुतिरित्युक्तमेवं विद्यार्थत्वोक्तिर्यज्ञादीनां तु स्तुतिरित्यत्र श्रुतिविरोधादित्याशंक्याह विहितत्वाच्चेति। अवहितेन संबंधमा
ह सर्वापेक्षेति। अग्निहोत्रादिकर्मण्यधिकृत्यविहितत्वाद्विद्यायुक्तविनियोगायोगान्न संशयमाह इदानीमिति। अत्राग्निहो
त्रादीनामुभयथात्वोक्त्या स्वतंत्रपुमर्थहेतुत्वास्वत्वाभावविक्षेपायोपवर्णनात्तादृग्लिंगत्वेः पूर्वपक्षे विद्याहेतुत्वोक्तेः
स्तुतित्वात् विविदिषावाक्यस्य विधित्वे तार्थत्वासिद्धिः सिद्धान्ते संयोगपृथक्त्वन्यायाच्चकर्मणामुभयत्रसंभवात् तत्सिद्धि
रित्यभिप्रेत्य पूर्वपक्षमाह तत्रेति। यावज्जीवश्रुतेरमुमुक्षोरपि तान्यनुष्ठेयानीत्याशंक्याहाश्रमेति विविदिषाश्रुतेर्विद्या
संयोगोपि तेषामवश्यंभावीत्याशंक्याह नित्येति। आवश्यकत्वाभावात् विद्याकामनायाः काम्यतयाकर्मणामनावश्यकत्वं
नित्यतयाचावश्यकत्वमित्येकत्रैकस्यावश्यकत्वानावश्यकत्वे विरुद्धे स्यातामतो विद्योपायत्वोक्तिः स्तुतिरेवेत्यर्थः। सिद्धान्त
सूत्रमवतार्य व्याकरोत्यस्यामिति नित्यतयाविहितानां विद्यार्थत्वासिद्धिं विद्यानंगत्वमुक्तमित्याशंक्याहनहीति। उक्तमनर्थोन्तरत्वेन सूत्रमवतारयत्यथेत्यादिना। नित्यत्वेपि विद्यासंयुक्तत्वमग्निहोत्रादीनां विधिवशादस्त्वविति
व्याचष्टे विद्येति। विविदिषासंयोगमात्रमत्र श्रुतं कुतो विद्यासंयुक्तत्वं तत्राह तदुक्तमिति। सह कारित्वोक्त्या फलं
प्रत्युपकारित्वमाचार्याणां कर्मणामित्याशंक्याह नचेति। शास्त्रीयमन्यद्व्यतिरेकसिद्धं चापकारकत्वं न
चात्रोत्तयमस्तीत्याह विधितिअलब्धीकार्येनचोदितापेक्षाचोदितत्वान्नर्थत्वमित्यर्थः अलब्धीः स्वफलेनेतिकर्त
व्यतापेक्षास्वतो साध्यफलत्वात् कूपखननव्यापारवदित्याह साध्यत्वादिति। अविधिलक्षणत्वं व्यतिरेको हरणेन।
हा

आनंद० प्रपंचयति विधीति ॥ अंगभावश्चाहकग्रहणपूर्वकत्वाद्विधेर्ग्रहिकत्वाद्धि हितं दर्शपूर्णमासादि प्रयाजादेर्भिन्नाहिकं ग्रही
तेरंगे पुरुषपतेनाधिहिता विधिरित्यर्थः ॥ तथापि कथमसाध्यफलत्वेन विधायां कर्मणामन्वय इति तत्राह तथा चेति क
पु० पन्ना हिंसेत्युक्तादित्वत्वचनं तत्राह तस्मादिति सहपुत्रे नरं वहतीर्मद्दीनीति तत्कर्मसु सर्वस्वैव विद्यास्वकार्यं चव्याजिपत
स्तस्यापि दिवस सहकारित्वोक्तिरित्यर्थः ॥ परोक्तमुक्ताव्यप्रत्याहन चेति ॥ संयोगभेदं विशदयति नित्यो हीति तुल्य वजस
५१ ति द्वयेनदृष्टकोवसंबंध विधिः संयोगभेदस्तस्मादुभयथात्वमविरुद्धमित्यर्थः एवमस्य साल्कमयत्वे संयोग पृथक्त्वमि
सत्रे तत्त्विं नित्ति मित्युदाहरकोऽन दर्शयतियथेति ॥ ब्रेव्यावस्वा दिरोबायाजाशोवत्वेको नित्यः संयोगस्तेन कत्वर्थस्य ट
रवादिरस्परवादिरं वीर्यकामस्येत्यपरः संयोगो नित्यस्तेनपुरुषार्थतित्येकस्य खादिरस्यो नयथात्वे संयोगपृथक्त्वे
हेतुस्तथा कर्मस्वभेदेपि संयोगभेदादुभयथात्वमित्यर्थः ॥ ननु प्रकरणांतरस्थेभ्यो नित्यकर्मभ्यो भिन्नान्येव कर्मा
णि विविदिषावाक्ये विद्यासंयुक्ततया विधीयंते प्रकरणभेदस्य भेदकत्वात्तत्कथं तस्योभयत्वं तत्राह सर्वथेति ॥ प्र
तिज्ञां व्याचष्टे सर्वथापीति ॥ एकैवकारंव्यावर्त्यं दर्शयति तएवेतीति भेदशंकानिवृत्तिं व्यतिरेकदृष्टांतेनस्प
ष्टयति नित्येति यथेति ॥ कुंडपायिनामयनगताग्निहोत्रस्य प्रकरणभेदात् प्रसिद्धाग्निहोत्रात्कर्मांतरत्ववद्विविदिषं
तीति विद्यासंयुक्ततया विहितानामपि कर्मणां प्रकरणभेदात्कर्मांतरत्वं प्रसक्तं कार्यं मासमग्निहोत्रं जुहोतीति होमविधि
श्रुतेर्मासाख्यकालस्य चानुपादेयत्वेनाविधेयत्वादग्निहोत्रशब्दस्य चाख्यातपारतंत्र्यादाख्यातस्य च जुहोतेः ५१
संनिहितरूपवत्कर्महित्वाद्व्यवहितनैयमिकाग्निहोत्रपरामर्शित्वायोगात्ख्यातवाचिनोग्निहोत्रशब्दस्या
पि कर्मांतरविषयत्वमेवेति युक्तं विविदिषावाक्ये तु विविदिषायामेव विधिश्रवणात्प्रसिद्धानामेव यज्ञादी

नां यज्ञादिशब्दैरनुवादाद्विद्यासंयोगमात्रं विधीयते तेषामिति न कर्मांतरत्वमित्यर्थः ॥ उक्तमेवार्थं प्रश्नद्वारा हेतुमवतार्य स्फो
टयति यज्ञादिशब्दैरयमिति कुत इत्यादिना ॥ प्रसिद्धकर्मसु संस्कारत्वप्रसिद्धिरपि तेषां चित्तमलनिरासेन ज्ञानोत्पत्त्युप
पकारकत्वमावेदयंती कर्मान्निर्देक्ष्यचयतीत्याह एतेति गर्भाधानादयः सहधर्मचारिणीसंयोगांताः चतुर्दश पंच
महायज्ञाः सप्त हविःसंस्थाः सप्त पाकसंस्था इति चत्वारिंशत्संस्काराः ॥ कर्मणां दाशंकायोगे फलितमाह तस्मादि
ति नित्यानि कर्माणि स्वल्पपुण्यलोकावाप्तिफलान्यपि स्नानकामेनानुष्ठितानि ज्ञानार्थानीत्युक्तमिदानीं ब्रह्मचर्यादी
नामाश्रमकर्मणां क्लेशतन्करणेन विद्योदयहेतुत्वे तत्र लिंगमाह तपसानिचेवं चेति ॥ सूत्रस्य तात्पर्योक्तिपूर्वकमक्षरार्थं
कथयति सहकारित्वस्येति उभयविध्यधीनमर्थमुपसंहरति तस्मादिति ॥ आश्रमकर्मणां विद्योपायत्वे सत्यनाश्रम
कर्मणां नैव मिति मन्वानं प्रत्याह अंतरेति ॥ अनाश्रमिणो विधुरादेर्विद्याविषयी कृत्पते वा कर्मित्वप्रसिद्धे निदानसिद्धेश्च
संशयमाह विधुरेति ॥ अत्रामो नाश्रमकर्मणा प्रत्यक्षविद्याहेतुत्वोत्पादादिसंगतिः पूर्वपक्षे यथा विधुरकर्मणां
विद्याहेतुत्वासिद्धिस्तथैवाश्रमकर्मणामपि विद्याहेतुत्वासिद्धिः सिद्धांते त्वाश्रमी तस्य ज्यायस्त्वात्तत्कर्मणां स्तु
तयां तक्तिद्धिरिति मन्वानः संशयमनूद्य पूर्वपक्षमाहेति संशय इति विविदिषावाक्ये यज्ञादिषु प्रत्येकं करणावि
नक्तिश्रुतेराश्रमकर्म नावेपि वर्णमात्रधर्माणां दानादीनां संभवाद्विधुरादीनामपि विद्याधिकारः स्यादित्याशं
क्य केवलवर्णधर्माणां विद्यासाधनत्वे सत्याश्रमकर्मणां वैयर्थ्यादनाश्रमिणामनधिकारो विद्यायामित्याह
आश्रमेति ॥ अनाश्रमकर्मणां न विद्याहेतुत्वमिति पूर्वपक्षमनूद्य सिद्धांतयत्येवमिति प्राप्तेऽभिधीयते अनाश्रमित्वे
नेति तद्दृष्टेरिति व्याचष्टे रैक्वचेति ॥ श्रोतीदृष्टिं शिष्टास्मातीमपि दर्शयत्यपीति ॥ स्मृतिस्पृष्टेति ॥ न्यां सिद्दे सि
द्धांतेनंतरसूत्र निरस्यं चोद्यमाहनन्विति ॥ अंतरा कृतादपि कर्मणो रैक्वादीनां विद्यासंभवाद्दृष्टेपा धम

वुक्तात्कर्माणो विधेस्तत्रश्रुतिस्मृत्योरनियामकत्वात् नियामकान्तरं वक्तव्यमित्यर्थः ॥ आश्रमधर्माभावेपि वर्णधर्मा विशेषै
आनं ६० रनुगृहीता विद्योदेप्यतीति सूत्रेण समाधत्तेसेति ॥ अविरुद्धैरनाश्रमित्वाविरोधिभिरितियावत् अतएव पुरुषमात्रसंबंधि
भिरिति सूक्तं समाश्रमधर्मशून्यानां जपादिषु विशेषाद्विज्ञाधिकारोस्तीत्याशंक्याह तथाचेति ॥ मोत्रोपि ऋतमवः सर्वभूताहिं
५९ सको स्याद्वानित्यर्थः ॥ किंचनैयोगिकफलेषु कर्मस्थानेतद्भ्यस्याध्योदितत्वान्नियतकालत्वेन यौगिककर्माभावेप्यमु
ष्मिकैरेव कर्मभिर्विद्यानुविष्पत्ति सत्त्वस्य आरब्धान्तरमाह जन्मांतरेति जन्मांतरसंचितकर्मणां विद्यानुग्राहकत्वे प्रमाण
माहतथाचेति ॥ अनेकेषु जन्मसु संचितसंस्कारैः ॥ सिद्धः सम्यग्धीपरिपाकवानित्यर्थः ॥ यथास्मिन्जन्मन्यधीतवेदो धर्मजि
ज्ञासाधिकारी तथास्मिन्नेवजन्मन्याश्रमकर्मातिजिरुत्वादितिविविदिषो विद्याधिकारीत्यस्यादित्याशंक्याह दृष्टार्थेति ॥ अविद्या
निवृत्तेर्दृष्टफलत्वान्नियमापेक्षाभावादित्यातक निषेधस्याभावमात्रेण तत्र पुरुषस्यप्रवृत्तिरित्यर्थः ॥ श्रुतिस्मृतिन्यायसिद्धमर्थ
मुपसंहरति तस्मादिति ॥ वर्णोपाश्रयुक्तधर्ममात्रादपि विद्योत्पत्तेचेत्ताश्रमित्वमनर्थकमित्याशंक्याह तत्त्विति ॥ विद्यापाश्रि
राचिरव्यक्तिहेतुतयाश्रमित्वानाश्रमित्वयोर्विशेषात्तेपर्याप्तमिति मत्वा व्याचष्टे इति ॥ साधनोपचयादचिरेण विद्याहेतुत्वं
ज्ञापकस्त्वमाश्रमित्वस्यज्यायस्त्वेश्रुतिस्मृत्युपगृहीतत्वं हेतुमाह श्रुतीति ॥ श्रुतौ पुण्यकृत्वविशेषणालिंगाच्छ्रेष्ठमाश्रमित्व
मित्याह श्रुतीति ॥ तेनज्ञानमार्गेण ब्रह्मविदेति ॥ श्रुतिब्रह्मणो तिस च पुण्यकृत्त्वमाश्रमोक्तं कर्मकरोतीति पुण्यकृदुच्यते तेनाश्रमिप
रमात्मन्यात्मत्वेनवर्ततइति ॥ ---- स्तत्र पुण्यकृत्त्वविशेषणादाश्रमित्वं ब्रह्मज्ञाने तिहेतुतया श्रेष्ठं सिद्धमित्यर्थः ॥ आश्रमि
त्वस्यश्रेष्ठत्वेस्मार्त्तमपिलिंगमनुकूलयति अन्नाश्रमीति ॥ अनाश्रमित्वेनाकर्म विविद्याहेतुश्चेदारूढपतितस्यपूर्वाश्रमप्राप्त ५९
स्यकर्मकिमुत्याज्यमित्याशंक्याह तद्भूतस्येति ॥ व्याचष्टे विषयसंचयतिसंतीति ॥ नानाश्रमात्मस्यधीपूर्वेश्रम्यच्युत
स्य कर्मानिषयस्तत्किंविविद्याहेतुर्नवेतिसंशयसिद्धवत्कृत्य तद्धेतुमाह तांस्त्विति ॥ कथंचिदाश्रमच्युतेकादित्यर्थः ॥ स्ता

मानवतीनवेतिविमर्शार्थः ॥ ऊर्ध्वरेतस्त्वं बुद्धिपूर्वं प्रच्युतानां कर्मापियोक्तविद्याहेतुर्नेत्युक्त्वापादादिसंगतिः ॥ पूर्वपक्षेप्रकोक्ताश्र
ममित्वश्रेष्ठ्यासिद्धिः सिद्धान्ते प्रच्युतेरप्रामाणिकत्वात्तदुक्तसिद्धिरिति स्वीकृत्य पूर्वपक्षयति पूर्वेवेति ॥ पूर्वाश्रमोक्तयमादि
धर्माः सुखेनशक्योनुष्ठातुमितितत्रचिकीर्षया रागद्वेषवशेन च प्रत्यवरोपि प्रामाणिकः स्यात्तथाचानाश्रमिकर्मणेदितमपि
यथाविद्यासाधनमुक्तं तथाप्रत्यवरूढस्यापि कर्मविद्याहेतुराश्रमावरोहेन स्यात्तदारोहावरोहयोरन्यतरत्वात्तदारोहवदि
त्यवरोहस्यप्रामाणिकत्वादित्यर्थः ॥ सिद्धान्तसूत्रमवतार्य व्याकरोत्येवमिति ॥ उत्तराश्रमं प्राप्तस्यपूर्वाश्रमप्राप्तिरप्रामाणिकी
त्यत्रप्रश्नपूर्वकं हेतुत्रयमाह कुतइति ॥ तत्र नियमं व्याचष्टे तथाहीति ॥ अरण्यमिसंक्रांतोपलक्षितपरमहंसादिस्तत्त्वं तद
याऊर्ध्वेति पदं ब्रह्मामार्गस्तत्स्तस्मादरण्यात्पुनरेयान्नेत्युत्तर नानि प्रत्यवरोहे वृथेप निवृत्तस्येमित्यर्थः ॥ स्मार्त
मपि नियमं कथयत्याचार्ययेति ॥ उक्तनियमतात्पर्यमाह एवमिति ॥ अतद्रूपमप्रत्यवरोहं व्याकरोति यथाचेति ॥ अत्राशिष्टाचारा
भावं व्याचष्टे नचेति ॥ परोक्तमनुमानमनन्वयस्य विरोधेन दृश्यतीयस्त्वित्विति ॥ इतश्चानुमानमयुक्तमित्याह न्यायाच्चेति ॥ यत्तु
रागादिवशात्प्रत्यवरोहणमिति तत्राह नचेति ॥ ततोन पुनरियादिनियमशास्त्रं अपशिष्टसत्त्वादयं व्याचष्टे जैमिनेरिति ॥
अत्रेति प्रामाणिकप्रच्युत्यभावोक्तिः ॥ उभयसंप्रतिपत्तिफलमाह पतिपत्तीति ॥ प्रत्यवरोहणमशास्त्रीयमित्युक्तं संप्रतिप्रमा
दात्प्रत्यवरोहे प्रायश्चित्तमस्तीति वक्तुं पूर्वपक्षमाह नचेति ॥ ऊर्ध्वरेतसो धीपूर्वच्युतब्रह्मचर्या विषयस्तेषां किंनास्तिप्राय
श्चित्तमुतास्तिप्रायश्चित्ताभावस्मृतेर्महापातकेष्वनुक्तेश्च संशयमाह यदीति ॥ प्रमादादित्यधीपूर्वच्युतब्रह्मचर्याणामू
र्ध्वरेतसां प्रायश्चित्तचिंतेति द्योतयति अवकीर्णीति ॥ योनौरेतःसिंचेदवकीर्णी योनौ चित्तं रेतो स्यास्तीत्यवकीर्णी प्रमादच्यु
तब्रह्मचर्याणामूर्ध्वरेतसां कृतप्रायश्चित्तानां कर्मविद्याहेतुरित्युक्त्वापादादिसंगतिः ॥ पूर्वपक्षे प्रमादिनामूर्ध्वरेतसाम
स्त्वंतिकारद्ध्यःपातात्तुमर्थासिद्धिः ॥ सिद्धान्ते तेषामपि प्रायश्चित्तेन पतनसमाधानात्तत्सिद्धिरित्युपेत्य पूर्वपक्षसूत्र

आनंद०

पर्ढ

प्रवर्तार्थयोजयत्स्तु अत इति ॥ तद्देवप्रतिपादकयेनि ऋरितं प्रायश्चित्तमुदाहरन्नवकीर्णी ति ब्रह्मचार्यवकीर्णी तत्र पशुऽद्रोमार्थ
माधानं कर्तव्यं लौकिके वाग्नि पुत त्कर्मे तिसंदेहे पर्वाधिकरणे यदाहवनीये जुहोतीति नसर्व्वो स्वामी ॥ यो लोभवती स्याहव
नीयस्य सर्वहोमार्थत्वा दाहवनीयेताव दुपनयन होमाः कार्या इति प्राप्ते जातपुत्रोग्नीनादधीतेति तत्रदारस्याग्न्याधानम्धि
धानाद्दुपनयनकाले दाराभावादाधानस्याप्रसक्तत्वादाहवनीयाभावा लौकिकाग्निरुपनयन होमा इति राद्धान्तितेब्रह्मचा
रीयया वकीर्णी सेवतस्य भार्या स्यात्ततो ग्न्याधानमित्यधिकाशंकां निराकर्तुं प्रातिदेश्याधिकरणमवकीर्णी पशुश्चेति यथोक्ति पन
यनकाले लौकिकाग्नौ होमस्तथा वकीर्णि पशुश्च तत्रैव होतव्य ॥ आधानस्य पत्नीपरिग्रहोत्तरकालत्वात् यावद्वैधाग्न्यभावादि
तरस्याश्च परपरिग्रहभूतायाभार्यात्वकल्पनया धने माना भावादित्यर्थः यद्यधिकारलक्षणे निर्णीतमाधिकारिकं प्रायश्चित्तं
तदपि नैष्ठिकस्य भवितुं नार्हतीति संबंधः प्रश्न पूर्वकं हेतुमाह किमित्यादिना ॥ किंविषयं तर्हि प्रायश्चित्तवचनं ब्रह्मचारित्वा विशे
षादुपकुर्वाणस्यापि त द्योगात्तत्राहोपेति ॥ तादृशिस्य प्रतिसमाधेयत्वोक्तिः सिद्धान्तयत्युपपूर्व मित्युपपदं पूर्वे यस्य प
तनस्य तदुपपूर्वमिति व्याकरोत्यपिरिति ॥ प्रायश्चित्ताभावं व्यावर्तयितुमपीति प्रयुक्तं । एवकारार्थमाहनेति ॥ नैष्ठिकव्रत
लोपस्योपपातकत्वेपि प्रायश्चित्तसत्वे किं जातमित्याशंक्योपपातक सामान्यप्रायश्चित्तं तस्यादितिसूत्रावयवं व्याकुर्वन्नाह
तस्मादितिगउ क्रमर्थं दृष्टांतमवतार्यस्य ए यस्य शनयदिति ॥ प्रायश्चित्तं न पश्यामीति स्मरणात् कथं तद्भावधीरित्याशं
क्याहचेहीति ॥ प्रायश्चित्तं नास्तीति स्मरणाभावान्न पश्यामीति दर्शनाभावमात्रस्य रणादित्यर्थः ॥ भावनादिना मपि तुल्याम्
नानुपपन्नश्चिरित्याशंक्याहयेत्विति नतु न पश्यामीति ॥ स्मरणस्य प्रायश्चित्तनिषेधार्थत्वमनुमायतदर्थश्रुतिकल्पनात्त पर्ढ
द्विरोधे सामान्यश्रुत्या प्रायश्चित्तसत्तानाभ्युपगम्यते तत्राहतस्मादिति भाव दर्शनाभावस्मरणस्य प्रायश्चित्तनिषेधार्थत्व
कल्पनयातदर्थश्रुतिरनुमीयते तावद्विशेषप्रवृत्ता प्रायश्चित्तं श्रुतिर्गमयतीति तस्मात्प्रायश्चित्ताभाव धीरिति भावः ॥

ऊर्ध्वरेतस्वेवरा हाधिकरणसम्पत्तिमाह तदुक्तमिति यवमयश्चरुर्वाराही उपानहौ विल्वत्रय यवयवराहद शब्दानां प्रियंगु क स
शकुनिग्रहोवा दीर्घ शुक सूकर ग्रहोवेति संदेहे पूर्वपक्षमाह समेति । केचित् दीर्घशुकेय वशब्दं प्रयुंजते प्रियंगुषु चापरे वराहश
ब्दमपि सूकरे केचिदाहुः शकुनौ चान्ये ते न प्रयोगसाम्यात् समानत्वाद्विकल्पेन प्रतीति ॥ प्रतीतिः स्यादित्यर्थः ॥ सिद्धान्त
माह शास्त्रस्थेति ॥ वाशब्दः पक्षव्यावृत्यर्थः ॥ या शास्त्रस्थानां धीः सैवग्राह्या शास्त्रनिमित्तत्वात् धर्म्मधियं दिशास्त्रस्थास्त्वेवं च
यदा मेषा वाऽप्यधियो म्लायंत्यथैते यो ह्यानास्ति संतिवराहंगावोनुधावंतीति यवचवराहशब्दयो दीर्घशूकसूकरविषयत्व
स्यावगम्यता साम्याभावात् विकल्पासिद्धेर्यथाशास्त्रं फलप्रसिद्धिः सेवयास्येति प्रथमेध्याये सिद्धंतथा चापि शास्त्र मूलत्वात्प्राय
श्चित्ताभावप्रसिद्धेस्तस्सत्वं युक्तमित्यर्थः ॥ प्रायश्चित्तं न पश्यामीति स्मृतेस्तर्हि का गतिस्तत्राह प्रायश्चित्तेति ॥ एवं सति सा
मान्यश्रुत्या प्रायश्चित्तसत्वेनिश्चितेसतीत्यर्थः ॥ यदि कथं चिन्नैष्ठिकस्य ब्रह्मचर्यं लुप्येत तदा न प्रायश्चित्तं दृश्यते तेन नै
ष्ठिकेन ब्रह्मचर्ये यत्नवता भाव्यमिति तद्विषयत्वस्याप्रमादेन सदा कार्यता रूपं गौरवमुत्पादयितुं प्रायश्चित्ताभावस्म
रणमित्यर्थः नैष्ठिके हि दृष्टिं तन्याय मितरयोरपि दृश्यत्वेवमिति विशेषतोपि प्रायश्चित्तविधेस्तयोरस्ति प्राप्तादिके ब्रत
लोपे प्रायश्चित्तमित्याह वानप्रस्थ इति ॥ दीक्षानेदं ब्रह्मलोपेऽप्रमादतो ब्रह्मचर्य भंगे कृच्छ्रं चरित्वा महाकक्षं वर्धयेदित्युक्तं
देशं वर्धयेदितिसंबंधः ॥ कृच्छ्रं विशिनष्टि द्वादशेति ॥ दिनत्रयमेकवारभोजनं दिनत्रयरात्रिभोजनं दिनत्रयमयाचि
तं दिनत्रयमुपवास करणमित्येवंरूपमित्यर्थः ॥ परिव्राजके प्रमादतो व्रतलोपे तु त्यक्त्वा तुष्णनमित्याह भिक्षुरिति
सोमस्य यज्ञांग त्वात्तदभिवृद्धिमिनात्यमहाकक्षं वर्धयेदित्याह सोमेति । सर्वपापप्रसक्तोपि ध्यायन् त्रिमिव म...
पुनः सपूतो भवति पंक्तिपावन एव चामनो वाक्का यजान् दोषान् ... प्रमास्तान् ॥ सर्वान्दहति योगाग्निः कूटरा
शिमिवानलः ॥ उपपातकेषु सर्वेषु पातकेषु महत्सु च ॥ प्रविश्य रजनी पादं ब्रह्मध्यानं समाचरेत् ॥ नित्य— —तुकु
वीत प्राणायामास्तु षोडश । अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः इत्यादि परिव्राजक विषयं शास्त्रं तेनाहितः स

स्कारो ध्यानादिः स च कर्तव्योऽभिप्रेतः गोत्वात्स्वशास्त्रे लि॥ कुर्द्धरेतं तस्मात्प्रमादकुलत्वलच र्षाणां कृतप्रायश्चित्तानामधिकारो
आनं ६० ऽस्ति विद्यायामिति भावः॥ कृतप्रायश्चित्तानामपि तेषां मेवं शीघ्रं व्यवहार्यत्वमाह न हि स्विति॥ कृतप्रायश्चित्तैः सह शिष्टाचारकृ
पंक्तमर्पितविषयत्वं किं विद्यांगं किं वान्यदिति संशये प्रागुक्तप्रायश्चित्तैरेव तेषां व्यवहार्यता सिद्धेरंगमिति प्राप्ते सिद्धान्तमाह इहेय
६० ऽपीति॥ प्रतिज्ञार्थमुक्ता हेतुद्वयं व्याकरोत्यारूढ इत्यादिना॥ दुश्चरिताचरणकृतमेनो लोकद्वयेऽपि कर्तुरशुद्धिमादधाति
तत्र प्रायश्चित्तेन लोकद्वयेऽपि कस्यचिच्छुद्धिरपनीयते कस्यचित्तु पारलौकिकाशुद्धिरपाक्रियते ऐहिकाशुद्धिरनुवर्तते
उक्तं हि बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः॥ शरण्याय तं हन्यात्स्त्रीहन्तॄंश्च न संवसेदिति तच्चेहाप्यारूढोऽनेहिष्ठ
मित्यादिस्मृतिलिंगात्॥ आचाराच्च लोकाशुद्धेरपनीतत्वे पृथ्व्यवहार्यत्वायोगमात्रेणोर्ध्वरेतसामाचारस्पर्शाद्यंगत्वं तदेव
युक्ताचारस्योक्तविधानांगत्वाभिधानात्सेमिकी प्रसिंगतिः पूर्वपक्षे बालघ्नांश्चेत्यादिस्मृतिविरोधः सिद्धान्ते तु तदनु
गुणमिति भावः॥ अन्यस्मिन्नपकारिणि तेन व्यवहारस्यान्यस्य तत्प्रकारवदन्यस्मिन्नुपास्तिकर्तरि तेन व्यवहारात्फलमन्य
योपकारमन्यं यजमानस्य दर्शयन्सर्वपर्तयति स्वामिन इति। कर्मांगेषूपासनानि विषयस्तेषु किं कर्तृकाधियास्ते
यमाहांगेष्विति॥ शास्त्रीयांगाश्रितोपास्तीनां स्वतन्त्रफलानाममविरुद्धं कर्तृत्वेऽपि यजमानगामिफलत्वोक्तेरस्ति पादादिसं
गतिः पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरेकाधिकरण्यसिद्धिः सिद्धान्ते प्रकृतस्य कर्तुरस्वातन्त्र्यात्तस्य यजमानाधीनत्वात्त
त्कर्तृत्वमपि तदधीनमित्येकाधिकरण्याविरुद्धमिति सिद्धवत्कृत्य संत्यन्तप्रश्नपूर्वकं पूर्वपक्षमाह॥ किमिति तत्र हे
तुं प्रश्नद्वारा दर्शयति कुत इति फलश्रुतिमेव तिशयेत्यफलेऽहीति॥ श्रुतमपि फलमत्विगातं किं नस्यात्तत्रा ६८
रुतश्चेति॥ तत्र हेतुस्तस्येति॥ उद्गीथाद्युपास्तिविधीनां प्राप्तोद्देशत्वात्कर्तृत्वाधिकारविधाएवद्वासेत्तस्यैवोद्देश्यत्वो
गात्तद्धर्मित्वोपास्तीनांगोदोहनवदधिकृताधिकारित्वात्कर्तृत्वेऽधिकरण एवगोदोहनफलवद्विधा फलेन संगति
रित्याशयः धिकृतत्वेऽति तथापि कथमुपास्तीनां याजमानत्वं तत्राह फलं चेति॥ अकर्तृत्वेऽफलितमपि यजमानस्य न

स्यात् कर्तृत्वभोक्तृत्वयोरेकाधिकरण्यादित्यर्थः॥ यजमानगामिफलमित्यत्र व्यभिचारं शंकते नन्विति॥ उक्तमर्थं यौ
तो यजमानं फलं वचनादेव वाहः स्यादित्याहुनतस्येति॥ वाचनकापवादाभावे तत्सर्वं गृह्णीति दित्युपसंहरति तस्मादिति॥
अंगोपास्तीनां याजमान्यत्वात्स्वतन्त्रफलत्वेति प्राप्ते सिद्धान्तयत्यार्त्विज्यमिति तत्रप्रतिज्ञां विभजते नेत्यादिना॥ अन्यकर्तृ
त्वे कथमन्यस्य फलमिति। शंकते किंकारणमिति तस्यावपर्येवेनोत्तरमाह तस्मै हीति॥ ऋत्विजो यजमानेन स्वगामिनो फला
य क्रीतत्वान्नानुपपत्तिरित्यर्थः॥ ---- र्थं क्रीतत्वेऽपि ध्यानार्थमक्रीतत्वात्कथमुपास्तीनामार्त्विज्यं तत्राह उतदिति
अंगोपास्तीनामधिकृताधिकारत्वे फलितमाह तस्मादिति॥ तासामार्त्विज्यकर्तृत्वे श्रौतं लिंगमाह तथा चेति॥ तमुद्गीथारब्ध
प्रायश्रापादिहि विविष्टं बको नाम दाल्भ्यः स्यापत्यं दाल्भ्यो विदांचकार विदितवान् विदित्वा च नैमिशीयानां सत्त्रिणामु
द्गातासीदित्यर्थः॥ पूर्वपक्षबीजमनुवदति यत्त्विति॥ तस्यार्थतो याजमानत्वेऽपि फलस्य वचनादपवादो यत्र नैवंतत्रोत्सर्गस्थितिरि
त्युक्तमित्याह नेत्यादिना॥ इतश्चोपास्तीनामार्त्विज्यकर्तृकत्वं यजमानगामिफलत्वं चेत्याह श्रुतेश्चेति॥ उक्तमर्थं तत्श्रुतिलिंगे
श्च सिद्धमर्थमुपसंहरति तस्मादिति॥ सिद्धेऽप्युपास्तीनामार्त्विक्कर्तृकत्वे तन्निर्धारणानियमन्यायेन स्वतन्त्रफलत्वसिद्धिरि
ति भावः॥ विधुरप्रभृतीनामंगाधिकारीणां धीसाधनोक्तौ प्रसंगेनांगोपासनमधम धीसाधनमेवनीर्यपुनरुक्तममेव
धीसाधनं वक्तुमारभते॥ सहकार्यन्तरेति विषयवाक्यमुदाहरति तस्मादिति॥ यस्मात्पूर्वे ब्राह्मणा विदित्वात्मान
मेषणाभ्यो व्युत्थाय भिक्षाचर्यं चरन्ति स्म तस्मादधुनातनोऽपि ब्राह्मणः पांडित्यं ज्ञानबलं बुद्धित्वा बाल्यं तिष्ठासेत्
स्वरूपं पांडित्यं श्रवणं तेन विधिनिश्चयेन तद्ध्यानात्मत्वेन ज्ञानबलभावेन युक्तितोसंभावनानिरासरूपमननेन शुद्धधी
त्वेनायति स्मसेत् स्थातुमिच्छेत् उक्तहात्र्यर्थं वाल्यं चेत्सादि-- वादः श्रवणमननानंतरं मुनिर्मननशीलो निदिध्यासन
परः स्यात् मौनादन्यच्च बाल्यं पांडित्यं च मौनं निर्विद्याथ हलमौनं मौनं च निर्विद्य शब्दस्य सिद्धे पादिवाक्ये साधने स्नानाद्यासे प्र

आनं० मौनं च निदिध्यासनं निश्चयेन तच्चोक्तं हेतु --- ब्रह्मधीहेतुत्वात् तद्ब्रह्माहमित्यवगच्छतीति आत्मनः साक्षात्कृतब्रह्मा ।भ
वतीत्यर्थः ॥ तत्र श्रुतं मौनं विधेयं चेत्तस्य मौनशब्दस्य सिद्धेः पारिव्राज्ये साध --- ज्ञानाभ्यासे ऽप्रयोग सिद्धेः संशय माह तत्रेति
६१ निरूपाधिविद्योतः रे ॥ साधनमौन विधिशास्त्राद्यादिसंगतिः पूर्वपक्षे --- न स्यानुष्ठेयत्वासिद्धेः सिद्धान्ते तस्यानुष्ठेयत्वसि
द्धिरितिमत्वा तेहेत्वादिवाक्यशेषादंगोपासनमविहितविधिकर्मेतिवत् तथा ब्राह्मण इति विधीः हीनवाक्यशेषो बाल्यमुनिरिति सो
पि न विधिरितिपूर्वपक्षयतिनेत्यादिना ॥ ननु बाल्येन तु पक्रमे विधिश्रुतेर्मैने विधिर्विधिर --- स्तुनेत्याह । बाल्येनेति ॥ तद्वेवोप
पादयति नहीति ॥ यथाप्राप्तिविधिपर्यन्तं तर्हि विधेः फलं येन बाल्यबलतः मौनार्थं सत्यश्रवणादि ध्यानभावसिद्धिरित्यर्थः ॥ तर्हि —
मौनवाक्यस्य का गतिरस्तुतत्वाह । तस्मादिति ॥ अनधि --- स्यानुवादायोगादन्यत्र विधानपर्यन्तविधिरेवायमितिशंकते कु
त --- इति पांडित्यविधानादेव मौनमपि सिद्धं तस्यैव मौनत्वादित्याह मुनी --- मुनिशब्दस्य निन्दु वचनत्वे पितस्याप्यत्र विधाना
दत्रानुवाद एवेतिमत्वा मौनस्याविधेयत्वे हेत्वन्तरमाह । निर्वेदेति ॥ एकवाक्यतानुरोधान्मौनवाक्येपि न विधिरित्यर्थः ॥ यद्यपा
ण्डित्येन मौनस्याप्राप्तिस्तथापि विधीयमानबाल्यस्यैव प्रशंसा न हि पाण्डित्यं स्वरूपेण तन्न किंतु बाल्येन सीतेनेत्यस्मन्
नापरयपांडित्यं कृतं स्यात्तस्मात् बाल्यं शास्तं यत्मौनस्योत्तम --- अमस्य विधेयत्वं तत्प्राप्तस्यानुवादस्तद्वा बाल्यमात्रा
नुष्ठानवानुत्तमपि मिति व्यत्येन स्तूयत इति व्यक्तास्तुतिरितिमत्वाह तस्मादिति ॥ बाल्यपाण्डित्यातिरिक्तस्य मौनस्याविधेयत्वा
न्नतत्सुप्तलोरनुष्ठेयमिति प्राप्ते पदाभ्युपसिद्धान्तमाहैव मिति अपूर्वत्वमसिद्धमिति शंकते न चेति ॥ पांडित्यशब्द
स्य ज्ञानार्थमात्रत्वान्मुनिशब्दस्य --- तद्दतिशययोगमित्यादर्थनेऽपि पाण्डित्यशब्देन तु मुनिशब्दस्य ज्ञानार्थत्वे ६१
त्याहनेत्यादिना ॥ वहुप्रयोगाभावात्कथं तदर्थत्वं तत्राह मुनीनामिति ॥ आश्रमेपि प्रयोगादिनि यतं ज्ञानातिशयवाचित्वं
तस्य चात्राविधानाद्दतुबाधत्वमेवेतिशंकते न चेति ॥ उत्तमाश्रमे मुनिशब्दो साक्षाच्छ्रयाः साधारणो वेति विकल्पाद्यं प्रत्या

हनेति ॥ साधारणत्वं त्वेकस्मान्न कार्यत्वा योगाद्युक्तमित्यभिप्रेत्य प्रयोग ॥ अन्यथासिद्धिमाहेतरे ति ॥ मौनस्यापूर्वत्वमुपपाद्यत्त्वी
यमिति पदं व्याकुर्वन् फलितमाह तस्मादिति । वाक्यभेदप्रसंगादेकत्रैव विधिरित्युक्तं तत्राह यत्विति ॥ उपरि प्रकरणवशान्नं वाक्यभेदे
न विधेयमिति सूत्रे यद्धेत्वन्तरमाह निर्वेदनीयत्वेत्विति ॥ कस्येदं मौनं विद्यासहकारितया विधीयते तत्राह तद्वत इति विशेषणा
प्राप्तं कं एच्छति कथमिति ॥ प्रकरणं तथेत्याह तदिति ॥ पक्षेणेतिपदस्यार्थं कोत्तरत्वेनावतारयति न चेत्यादिना ॥ ब्रह्मैव प्रत्य
गात्मत्वं वस्तु सर्वमविद्यामयमिति शास्त्रयुक्तिभ्यां सिद्धेतु साक्षात्कारसाधनाभ्यासे स्वयमेव पुरुषस्योत्सुक्याद्दनर्थको वि
धिरिति चोदिते संन्यासप्रकरणात्तत्कर्मणां स्यप्रिवपादेः साक्षात्कारहेतुभावस्यापूर्वत्वादेकत्वे व्यस्तद्विधिरिति समाधिः ॥ विद्या
वंतमधिकारि विशेषं प्रतिविधेरानर्थक्यमुक्तमित्याशंक्य विद्यावत इति विद्यातिशययुक्तोयनोपत्त किंतु विद्योत्यायत उपा
याभ्यासे प्रवृत्तस्तेनास्यप्रत्येकदाचिद्भेददर्शनं प्राप्नोत्यतो विधेरर्थवत्त्वेति । सूत्रपादार्थं विवृणोति एतदिति ॥ अतन्निष्ठस्याव
स्य तद्विध्यय कत्वेदृष्टान्तमाह विध्यादिवदिति ॥ तदेव व्याचष्टे यथेति ॥ आग्नेयादिप्रधानं विधेरादिर्विध्यादिर्दर्शपूर्णमास
विधिः धिः समिदादिस्तुतेति विध्यंगस्तत्राश्रुतविधिकेपि विधिरास्तेयइत्यर्थः ॥ दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयत्येवमि
ति ॥ बाल्यादिप्रधानः संन्यासोयं यद्युक्तो यस्तर्हि कस्मात्कार्हस्थ्येनोपसंहरति श्रुतिरित्यनंतरसूत्रव्यावर्त्यमाहैवमिति
ज्ञ हिणोपसंहारेपि केवल्याश्रमस्य किं जातमित्याशंक्य ॥ नारक्षाविषयत्वप्रासमित्याह तेनेति ॥ बहुजायाससाध्यकर्म
बाहुल्यात्तेनोपसंहारो तेनैव समापनादित्याह तद्इति ॥ सूत्रं व्याचष्टे तुशब्द इति ॥ ननु यथाग्निहोत्रो यज्ञादीनि कर्तव्यत्वे
नोक्तानि तथाश्रमांतराणामपि करुणासंयमादीनि कर्माणि तराणपुच्यन्ते तथा चाकास्य विशेषस्तत्राह श्रमांतरेति ॥ कर्मणिनि
विशेषे सिद्धे फलितमाह तस्मादिति ॥ मौनगार्हस्थ्यमित्याशीप्रमदयोक्तेरितराश्रमाभावाशंकाकस्यचित्स्यात्तन्निरासार्थमा
ह । मौनिवदिति कथं तयोः श्रुतिमत्वं तत्राह दर्शितेति ॥ श्रुतिमत्वा विशेषे फलितमाह तस्मादिति ॥ इतरेषामिति बहुत्वाग्ना
र्हस्थ्यापि परामर्शो ननु सिद्धवदुपन्यास इत्याशंक्याहेतरेषामितीति ॥ गायत्रो ब्राह्मणः प्राजापत्यो ब्रह्म न्निति ॥ --

आनं ६० ब्रह्मचारी चतुर्विधो गृहस्थोऽपि वार्त्तावृत्तिशालीनवृत्तियायावरोघोरसन्यासीति चतुर्विधः॥ वानप्रस्थोऽपि वैखानसौदुंबर
वालखिल्यफेनपभेदैश्चतुर्विधः॥ तथा परिव्राजकोऽपि कुटीचकबहूदक--- हंसपरमहंसभेदैश्चतुर्विधः इति विशेषोऽन्यत्र द्र
६२ ष्टव्यः आश्रमास्तत्तद्धर्मविशेषयुक्ताः श्रुतिस्मृतिप्रसिद्धास्ततो ब्रह्मचारिणि--- वानप्रस्थे वानुष्ठानं तन्मेदमनुष्ठानं मेदं चापेक्ष्य
बहुत्विर्न गार्हस्थ्यमध्ये स्वलस्य प्रागेवासंदिग्धत्वेनोक्तत्वादि सर्वं॥ बाल्यस्य विधेयत्वमुपेत्यावान्तरवाक्यभेदेन मौनमपि विधेय
त्वान्मुमुक्षुणा कार्यमित्युक्तमिदानीं किं तद्बाल्यमिति विचारायामाह नाविष्कुर्वन्निति॥ अनुष्ठेयत्वेन श्रुतं बाल्यं विषयत्वे
नोदाहरति॥ तस्मादिति॥ तत्र बाल्ये विषये संशय इत्यंश्रितिसंबंधः॥ संशयकारणमाह बालस्येति तर्हि बालभावो वयो
विशेषो विकल्प्यतामित्याशंकानवग्रहे हेतुमाह बालेति॥ तद्धितश्रुत्या परिशिष्टं बाल्यमाश्रित्य संशयमभिनयति य
थेति॥ बाल्यशब्दार्थविवेचनेन स्वतंत्रपुरुषार्थहेतुविद्यांतरंगत्वेवात्रापि निरूपणात्पादसंगतिः॥ पूर्वपक्षे लिंगमत्र
त्वात्रापि विदुषोऽनुष्ठेयं सिध्यतीति सिद्धांते बाल्यस्याप्ररूढेंद्रियत्वादिभावरूपे भावशुद्धेरंतरंगत्वात्तद्विदुषोपयोग
चेष्टासिद्धिरिति मत्वा प्रश्नपूर्वकं पूर्वपक्षमाह किं तावदिति॥ चरणं चारो वदनं वादोऽत्रत्तणं भक्षणं तेकामतो यस्य स त
था तस्य भावः स्तत्ता यथोपपादं यथासंभवं यत्र क्वापि मूत्रं च पुरीषं चास्येति तयोक्तस्तस्य भावस्तथात्वं॥ तत्र लोक
प्रसिद्धिं हेतुमाह प्रसिद्धेति॥ शास्त्रांतरविरोधाद्युक्तमुक्तविधबाल्यस्य विधेयत्वमिति शंकते नन्विति॥ आदिश
ब्देन शिष्टगर्हा गृह्यते॥ सामान्यशास्त्रस्य संकोचो विशेषविधेः स्यादित्याह नेत्यादिना॥ सामान्यविधेर्विशेषविधिना
संकोचे दृष्टान्तमाह पश्विति॥ विदुषो यथेष्टचेष्टायामपि न दोषोऽस्तीति पासमग्नघसि सिद्धांतमाहैवमिति॥ विदुषो यथे ६२
ष्टचेष्टा न विधेया शास्त्रांतरविरोधादिति॥ प्रतिजानीते नेति॥ सामान्यशास्त्रस्योक्तः संकोचो बाल्येनेति शास्त्रेदिति
वचनादित्याशंक्याह वचनस्येति॥ सामान्यप्रवृत्तनियमशास्त्राविरुद्धेऽर्थे संभवति तद्विरुद्धार्थकल्पनायोगात्

कामचारादि विधेयमित्युक्तमेव व्यनक्ति विरुद्धे हीति॥ इतश्च कामचारादि न विधेयमित्याह प्रधानेति॥ किं तत्प्रधानं
यदंगत्वेन बाल्यादि विधीयते तत्राह ज्ञानेति॥ उक्तप्रधानोपकारित्वाभावाच्च न कामचारादि विधेयमित्युक्तं तद्वि
रोधित्वाच्च तद्विधेयमित्याह नचेति॥ किं तर्हि विधेयं बाल्यं तत्राह तस्मादिति॥ इहेति॥ प्रकृतवाक्योक्तिः उक्तेऽर्थेस्व
त्रमादायायोजयतीतरदाहेति॥ कथं यथोक्तेऽर्थे बाल्यशब्दः प्रयुज्यते तत्राह यथेति॥ अन्वयादिति पदं व्याकरो
ति वंहीति॥ अप्ररूढेंद्रियत्वादिरूपभावशुद्धिलक्षणबाल्यस्य प्रधानोपकारित्वमानमाह तथा चेति॥ कु
तत्वप्रकटनेसत्वे तद्वैपरीत्यमसत्वे शास्त्रार्थज्ञानराहित्यमश्रुतत्वं तद्वैपरीत्यं बहुश्रुतत्वं सदाचारनिरतत्वं
सुव्रतत्वं दुराचारनिरतत्वं दुर्वृत्तत्वमितिभेदः॥ तत्किं सिद्धांते ज्ञानलब्धी योग्यस्य मुमुक्षोर्नास्त्येव किंचिदनुष्ठे
यं तत्राह गूढेति॥ चक्षुरिंद्रियपारवश्यं निरसितुं मं धवदित्युक्तं रसनादिपारवश्यं निरस्यति जडवदिति
ज्ञानेंद्रियपारवश्यं परिहरति मूकवदिति॥ धर्माद्यज्ञानित्वप्रकटनमव्यक्तलिंगत्वं तदेवं मुमुक्षोरुपरत
सर्वेन्द्रियस्य श्रवणादिपरस्य मोक्षसाधनं तत्वज्ञानमवश्यंभावीति भावः॥ बाल्यांतमुपायं च विधायेदानीं तस्य काल
फलविद्याजन्मकालं निरूपयति ऐहिकमिति॥ उक्तहेत्वधीनधीजन्मविषये कारीर्यादिफलेविचित्रादिफले
चोभयोर्लब्धे वर्त्तनानुवादपूर्वकं संशयमाह सर्वेति॥ श्रवणादिसामग्रीजनितं बंधशून्यां विशिष्टधीप्रसवभूमि
रित्युक्तेरत्रपादादिसंगतिः॥ पूर्वपक्षे श्रवणादीनां विद्योपायत्वनियमासिद्धिः सिद्धान्ते प्रतिबंधाभावापेक्षया
तेषां तन्नियमसिद्धिरित्युपेत्य प्रश्नपूर्वकमैहिकत्वनियमं पूर्वपक्षमाह किमिति॥ फले द्वैविध्ये पलब्धौ तन्निय
मे नास्ति हेतुरिति शंकते किमिति॥ तत्र कारणमाह॥ श्रवणादीति॥ चित्रादिवदमुत्रापि धीहेतुत्वं श्रवणादे
स्यादित्याशंक्याह नचेति॥ कथं तर्हि तेषु प्रवृत्तिरित्याशंक्य तेषां कारीर्यादितुल्यत्वमाह समान इति॥

आनं० ६० श्रवणादीनां चतुरादिवद्विद्यासाधनत्वात्कालान्तरीयकं मोक्षफलं भाव्यं चेत्तत्कल्पनाभाववज्जन्मान्तरीयविद्यायै
१ श्रवणादिषु प्रवृत्त्ययोगादुपजन्मान संसारदुःखनिवृत्तये च विद्यासाधनानुष्ठानकारीर्यादिवत्तुल्यजन्मन्येव विद्या
६२ जन्मेत्यर्थः। यज्ञादीनां जन्मान्तरीयफलानां धीहेतुत्वस्य विविदिषावाक्ये सिद्धत्वात्कर्मणां तदेव धीजन्मेत्याशयेनाह य
ज्ञेति॥ तेषां धीशुद्ध्या श्रवणादिप्रयुक्तत्वाच्छुद्धिरैहिकी श्रुतेषु धीयाजन्यं भावमित्यैहिकत्वनियमः इत्यर्थः। श्रवणादीनां
कारीर्यादितुल्यत्वेऽपि फलजिज्ञासामाह तस्मादिति॥ श्रवणादिषु कृतेष्वपि न चेदत्र धीः स्यात्तेषामतद्रूपाद्यानैवे निष्फलत्वमी-
मन्वपि चावदनियतफलधीसाधनमिति सिद्धान्तमाहेवमिति। कृतेऽपि श्रवणादिषु कदाचिद्विद्या नोत्पद्यते
चेत्तर्हि तेषां तद्रूपायत्वमनियतं स्यादित्याशंक्याह कृतेति। कृतेष्वपि श्रवणादिषु तत्र विद्यानुदये कारीर्यादि
विवत्प्रतिबन्धो वाच्योपेक्षत्वात्तावाचातेषां कल्पनीयः प्रतिबन्धहानौ हि सामग्री कार्यहेतुर्न चेत्तावताऽतत्त्वहेतुत्वम
ति इत्यर्थः। उपस्थितविपाकश्रवणादिविरोधात्कर्म एव प्रतिबन्धमाशङ्क्योपस्थिते हि तैरेवेदं शादि
निर्विद्यार्थमिव श्रवणादिकर्म मिमिति निविपच्यते तत्राह यानीति। भोगार्थस्य कर्मणो ज्ञानार्थस्य च श्र
वणादेर्देशकालनिमित्तैकरूप्याभावे हेतुमाह यत इति। कर्मणां श्रवणादीनां प्रतिबन्धेभ्यो विद्योत्पत्ति
वादिशास्त्रं व्याहन्येतेत्याशङ्क्याह पास्त्रमिति। तथापि कर्मण एव बन्धकत्वं न श्रवणादीनामिति कुतो नियमस्त
त्राह इत्याधनेति। यच्चेह विद्याभावे कारीर्यादिवत्प्रतिबन्धादिसत्त्वं कल्प्यमिहैव मे विद्या स्यादित्यभिसंधिहुर्ष इति
तत्राह नचेति। दृश्यमानसंसारदुःखवस्थानेकजन्मागामित्वं जानतो यतः कदाचिदनर्थनिवृत्तिः स्यादितस्मि ६२
संधेः साधनसामर्थ्यानुसारेणाऽसंचितत्वात्कल्पाऽस्याहाभिसंधेरिति। यत्तु श्रवणादिनां चतुरादिवद्दृष्टफलत्व
मिति तत्राह श्रवणादीति। तेषां विधानाददृष्टद्वारापि साधनत्वमवघातवद्दृष्टगतं यत्तादीनामनीयमतया काल

फलानां ज्ञानसाधनत्वविधेश्च विद्योत्पत्तेरनियतत्वमित्यर्थः। यत्तु यज्ञादीनां प्रदत्त्वात्क्षुद्रिते सुश्रवणादिषु वि
धावशं भाविनीति तत्र प्रतिबन्धकसत्त्वस्य श्रौतलिङ्गासिद्धत्वान्नैवमित्याह तथा चेति आत्मनः श्रवणमपि दु
र्लभं बहुना भिमित्याह श्रवणायेति। कथं न च श्रवणेऽपि तत्त्वं ज्ञानं दुर्लभमित्याह शृण्वन्तोऽपीति। तत्र हेतुराश्च
र्य इति यथावदस्यात्मनो वक्ता आश्चर्यो द्भुतवत्कश्चिदेव संभवति सम्यगाचार्यात्सिद्धावपि तच्छ्रुत्वा लब्धासाक्षात्
कर्तास्याश्चर्य इति स्तुसाक्षात्कारः कुशलेनाचार्येणानुशिष्टोऽपि प्रशास्त्रात्सरोऽह्रलोप्या आश्चर्य एवेत्यर्थः॥ संप्रत्या
मुष्मिकत्वे धियो लिङ्गमाह। गर्भस्थ इति। कथानुपपत्त्या आक्षिरिममर्थं दर्शयति तत्राह नहीति। जन्मान्तरसंचितसा
धनं जन्मान्तरेः पिधियंसाधयतीस वचस्म तिमाह। स्मृता विति। श्रवणादीनां पोष्कल्येऽपि श्रुतिस्मृतिलिङ्गात्प
श्चादि फलचित्रादिवदनियतकालत्वसिद्धेर्नीनेकान्तिकफलत्वं तेषामित्युपसंहरति तस्मादिति। विद्यारूपे फले
कालोत्कर्षापकर्षकृतो विशेषनियमो दर्शितः। संप्रति विद्याफलो मोक्षे कस्यचिदपि विशेषनियमस्याभावं
दर्शयस्ये वमित्ति। विद्याफलं मुक्तिर्विषयः सा किं विद्यावदुत्कर्षापकर्षकृतविशेषवती किं वानेति फलस्योनय
था इहान्संशये प्रकृतविद्याफलस्य प्रसंगतो निरतिशयत्वोक्त्या पादिसंगतिः। पूर्वपक्षे मोक्षस्य कर्मसा
ध्यतया पुरुषार्थाधिकरणसिद्धिः सिद्धान्ते तस्य ज्ञानेकसाध्यत्वात्तत्सिद्धिरिति भिदेव पूर्वपक्षमाह य
धेति। मुक्तिरूपचयापचयवती फलत्वाद्विद्यादिवत्तुत्यनुमानात्स्यपाः कर्मसाध्यत्वानिगमात्पुरुषार्थाधि
करणमयुक्तमित्याशंकासिद्धान्तमवतारयति तांविभजते नखल्विति। उक्तेऽनुमानेऽनुजायते कथमाशं
कानिरवकाशेति शंकते कुत इति मुक्तिस्वरूपबले करूप्यावधारणाशास्त्रविरोधान्तानुमेतिमत्या

आनं० ६० सूत्रावयवमादाय व्याचष्टे तदवस्थेति। मुक्तिर्नाम काचिदवस्था विद्यते चेद् द्वितीयस्त्वविरोधः वदवस्था त्वस्य जाग्र
द्वस्थावदसाव पि स्थिति मलीस्यादित्याशंक्याह अत्र वेति॥ कथमेतावता मुक्तेरुत्कर्षनिकर्षहीन विशेषराहित्यं
६४ मित्याशंक्याह नचेति। नरस्थानतो पीत्यधिकरणे निर्विशेषत्वमस्य लोकादिश्रुत्या ब्रह्मणो निरूपितमिति स्मारयत्येके
ति॥ इतश्च मुक्तेर्निरतिशयत्वमित्याह। विद्येति। काशो पचयापचयाभ्यां ज्ञातो पचयापचयहेतोः। तरंग बहिरंग
तदवस्था सादिस्याधर्मापचयापचयाभ्यां विद्यायामुपचयापचयसंभवात्तत्फले मुक्तावपितौ स्यातामित्याशंक्याह इत्वं
तरं स्योरयतीति नविद्येति। विद्यैवसातिशयात्वसाध्ये पि कथं चिदतिशयमादधत्यादित्याशंक्याह लब्धीति॥ तर्हि मुमु
क्षूणां विद्यार्थिनो प्रवृत्त्यानर्थक्यं तत्राह विद्येति। तस्मात्मतिशयमाश्रित्य मुक्तो नातिशयोक्तिः---कश्चिदिदानीं
विद्याप्रमोक्षहेतुतत्त्वसाक्षात्कारलक्षणा नातिशयवतीत्याह नचेति। कथं तर्हि पूर्वाधिकरणे विद्याया विशेषो
दर्शितस्तत्राह तस्मादिति॥ मुक्तावपि तर्हि तादृशोतिशयो न विद्यतेति तत्राह नन्विति। विद्योत्पत्तिनांतरीयकत्वे
नाविद्यानिवृत्तेरेकरूपायामुक्तेरावश्यकत्वादित्यर्थः। मुक्तेर्निर्विशेषत्वे हेत्वंतरमाह विद्येति। एकरूपत्वा
दात्मनस्तदाकारविद्यायां विशेषाभावादेकरूपफलोत्पत्त्यादकत्वायोगात्तत्फले विशेषासिद्धिरित्यर्थः। वि
द्यायां भेदाभावं प्रपंचयति न हीति॥ सगुणविद्यावत्त्वविद्यात्वात्तस्य विद्याया भेदः स्यादित्याशंक्य विषयभेदा
त्तत्र भेदेपि नात्र विषयभेदोस्तीत्याह सगुणास्विति। तत्र फलभेदमानमाह तथा चेति॥ दार्ष्टांतिके विशेषमाहनैव
मिति। तत्त्वविशेषे गुणभावे स्मृतिमाह तथा चेति। कस्यचिन्निर्गुणविद्यावतः पुरुषस्य गतिः फलमिति यावत्। तत्रान्य ६४
नाधिकभावाभावे हेतुमाह। सलिलेति। पुनरुक्तेरर्थवत्त्वमाह तदवस्थेति तदेवं मुक्तेर्निरतिशयत्वान्न कर्मसाध्यत्वेति
मुक्तेः पुरुषार्थाधिकरणमिति भावः॥ ॥ इति श्रीमत्परमहंसपरिव्राजकश्रीशुद्धानन्दपूज्यपादशिष्य
भगवदानंदज्ञानेकृते श्रीशारीरकभाष्यविभागे न्यायनिर्णये तृतीयस्याध्यायस्य चतुर्थः पादः॥४॥